CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5091

मैत्र्युपनिषत् ।

रामतीर्थविरचित दीपिकासहिता ।

State Museum Library
5091
Lucknow

ॐ ब्रह्मणे नमः ।

*प्रणम्य रामं प्रणताभयप्रदं
गुरूंस्तथा कृष्णमुखांस्तदात्मनः ।
मैत्रायणानां श्रुतिमौलिमर्थतः
प्रसाध्य विष्णोः परमे पदेऽर्पये ॥ १ ॥

"ब्रह्मयज्ञो वा एष" इत्याद्या मैत्रायणानामुपनिषत् । तस्याः पूर्वकाण्डेन सम्बन्धः । काण्डचतुष्टयात्मके पूर्वस्मिन् ग्रन्थेऽनेकानि कर्माण्यग्निहोत्रादीनि विहितानि । तानि चोच्चावचफलार्थतया श्रुतानि यद्यपि, तथापि न परमपुरुषार्थपर्यवसितानि, यतः साध्यफलानि तानि, साध्यञ्चानित्यं यत्कृतकं तदनित्यमिति नियमात् । श्रुतिश्चात्र भवति—

'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छान्दो० अ० ८) इति ।

'यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एव' (बृहदा० अ० १ । ब्रा० ४) इति च । तथा—

---

* गणाधिपतिमस्वल्पविघ्नग्रासं महोदरम् ।
विपदुत्सारणाभ्यासलम्बीकृतकरं नुमः ॥
अयं श्लोक आनन्दाश्रमग्रन्थावलीमुद्रितपुस्तकेऽधिको वर्तते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'यो वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति' (बृहदा० अ० ३। ब्रा० ८) इति च। तस्मात् स्वभावतो नित्यनिरतिशय-पुरुषार्थार्थिनः पुंसोऽभिलषितसाधनोपायप्रदर्शनाय प्रवर्तमानो वेदोऽनादिभवपरम्परानुभूतानेकविषयवासनावासितान्तःकरणं वासनापरवशतया प्रवर्तमानं विषयासक्तमानसं प्रति सहसा विषय-प्रवणतापरावर्तने[१] परमपुरुषार्थरूपाविद्यानिवृत्तिपरमानन्दाविर्भावसाधनप्रत्यगात्मतत्त्वब्रह्मप्रवणतामापाद्य परं ब्रह्मात्मतत्त्वं बोधयितुमशक्नुवन्नादौ कर्माण्येव पुरुषार्थसाधनतयोपदिशति, पुनस्तत्रैव निष्ठां सम्पाद्य तन्निष्ठस्य नित्यनैमित्तिककर्मानुष्ठानप्रभावतः शनैः शुद्ध्यमानान्तःकरणस्य पुनरीश्वरार्पणबुद्ध्यैव निष्कामकर्मानुष्ठानादतितरां शुद्धान्तःकरणस्य नित्यानित्यवस्तुविवेकवत इहामुत्रार्थ-भोगरागशून्यस्य शमदमादिसाधनवतो मोक्षमात्राकाङ्क्षिणोऽधिकारसम्पत्तिमालक्ष्य प्रत्यगात्मतत्त्वं ब्रह्माध्यारोपापवादन्यायेनावगमय्य स्वयञ्च तेनैवावगमेन सह तस्मिन्नेवात्मतत्त्वे ब्रह्मणि विलीयमानो ब्रह्मात्ममात्रादयं सत्यज्ञानानन्तानन्दैकरसमवतिष्ठत इति पूर्वापरभावेन कर्मज्ञानकाण्डयोर्हेतुहेतुमद्भावः सम्बन्धः सिद्धः। तदनेन व्याख्येयोत्तरकाण्डस्य विषयप्रयोजनाधिकारिणो दर्शिताः। विषयस्य चात्मतत्त्वस्य वेदान्तापरमानासिद्धतया[२] व्याख्येयग्रन्थप्रतिपाद्यताऽर्थात् सिद्धेति सिद्धानुबन्धचतुष्टयमिमं ग्रन्थं पदशो यथामति व्याख्यास्यामः। पूर्वञ्च चयनादिकर्माऽऽम्नातं,

(१) नाऽऽ इति पु० पा०।

(२) वेदान्तर इति पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मयज्ञो वा एष यत्पूर्वेषां चयनं। तस्माद्यज-मानश्चित्वैतानग्नीनात्मानमभिध्यायेत् । स पूर्णः खलु

तच्चाग्निष्टोमातिरिक्तानां सर्वेषां यज्ञक्रतूनां साधारणं, तावता सर्वाण्येव कर्माण्युपलक्षणत्वेन गृहीतानि, तथा च सर्वेषां कर्मणां परमात्मज्ञानजन्मोपकारकत्वेन परमपुरुषार्थहेतुत्वं दर्शयितुं श्रुतिः प्रवृत्ते ॥

"ब्रह्मयज्ञो ० चयनं" इति। यदिदं पूर्वेषां कर्मप्रकरणोक्तानां कर्मणां चयनं चयनादि सर्वं कर्म एष ब्रह्मणः परमात्मनो यज्ञो यजनं पूजनं वै प्रसिद्धं, 'यज्ञो वै विष्णुर्यज्ञेनैव यज्ञं सन्तनोति' इति श्रुत्यन्तरात् । अत्र चयनग्रहणमस्यां शाखायां प्रथमकाण्डे चयनस्याम्नानात् । पूर्वत्र विहितानि सर्वाणि कर्माणि परमेश्वरार्पणबुद्ध्या फलासक्तिं परित्यज्यानुष्ठेयानीति तात्पर्यार्थः । तथा च भगवानाह (गी० अ० ५ । श्लो० १०)

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा"। इति ।

यस्माद्ब्रह्मपूजनार्थमेव सर्वं कर्म "तस्मात् ० ध्यायेत्" इति । यजमानः कर्मण्यधिकृत एतान् पूर्वोक्तानग्नींश्चित्वा अग्निचयनान्तं सर्वं कर्म यथाधिकारं निर्वर्त्य तत्प्रभावलब्धान्तःकरणशुद्धिः सन्नात्मानं प्रत्यञ्चं वक्ष्यमाणलक्षणमभि अभितः सर्वात्मब्रह्म-भावेन ध्यायेत् निरन्तरं चिन्तयेदित्यर्थः । अत्र क्त्वाप्रत्ययनिर्दे-शोऽनुष्ठानात्मध्यानयोर्नैरन्तर्यपरो न भवति, किन्तु पूर्वकालत्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वा श्रद्धाऽविकलः सम्पद्यते यज्ञः । कः सोऽभिध्येयोऽयं यः प्राणाख्यः । तस्योपाख्यानं ॥ १ ॥

मात्रपरः, तथा चास्मिन् जन्मनि जन्मान्तरे वा वृत्तकर्मानुष्ठानकृतशुद्ध्यतिशयफलं विविदिषां प्राप्य कर्मभ्यो व्युत्थाय प्रत्यक्तत्त्वब्रह्मविचारपरो भवेदित्यभिप्रायः । एवं सति किं स्यादित्येतदाह "स पूर्ण० यज्ञः" इति । स यज्ञः प्रागनुष्ठितः खलु निश्चितं वै प्रसिद्धं श्रद्धा साक्षात् निरुपचरितं पूर्णः पूर्णफलः सम्पद्यते । यद्वा स यज्ञो यजमानः 'यज्ञो वै यजमानः' इति श्रुतेः, पूर्णोऽध्यात्मपरिच्छेदाभिमानहान्याऽनवच्छिन्नः परमात्मा सम्पद्यते, श्रद्धा खलु वै इत्युक्तार्थम् । आत्मानमभिध्यायेदित्युक्तं ध्येयमात्मानं प्रश्नप्रतिवचनाभ्यां सङ्क्षेपतो निर्दिशति "कः स० प्राणाख्यः" इति । स आत्माभिध्येयः पूर्वोक्तः कः किंस्वरूपः किम्प्रमाणकश्चेति प्रश्नभागार्थः । यः प्राणाख्यः प्राणेन प्राणनेन प्राणनादिव्यापारेणाख्यायते प्रख्यायतेऽस्तीति निश्चीयते इति प्राणाख्योऽयं स ध्येय आत्मेति प्रतिवचनभागार्थः । तथा च श्रुतिः—

'को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्' (तैत्ति० उ०) इति ।

'यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः' (बृहदा० अ० ३ । ब्रा० ४) इत्याद्या च । यो देहादिसङ्घाताख्यात्मा सोऽभिध्येय इत्यर्थः । उक्तार्थसङ्ग्रहप्रपञ्चनं प्रतिजानीते "तस्योपाख्यानं" इति । तस्य प्राणाख्यस्यात्मन उप समीपे आख्यानं तत्स्वभावस्य स्पष्टकथनमारभ्यत इति वाक्यशेषः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बृहद्रथो वै नाम राजा विराज्ये पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम। स तत्र परमं तप आस्थायादित्यमुदीक्षमाण ऊर्द्ध्वबाहुस्तिष्ठति। अन्ते सहस्रस्य* मुनेरन्तिकमाजगामाग्निरिवाधूमकस्तेजसा निर्दहन्निवात्मवि-

---

बृहद्रथो वा इत्याद्याख्यायिका सुखाववोधार्था तपोवैराग्ययोरात्मज्ञानाङ्गत्वख्यापनार्था च "बृहद्रथो० निर्जगाम" इति। विविधं राज्यमस्मिन्निति विराज्यं तस्मिन् विराज्ये सार्वभौमे आधिपत्ये इत्यर्थः। निधापयित्वा मन्त्रिभिर्निधानं स्थापनं कारयित्वेत्यर्थः। राज्यस्थेन्द्रे पुत्रमभिषिच्येति यावत्। स्वयं जीवति सति पुत्रस्य राज्यदाने निमित्तमाह, इदमिति। इदं शरीरमशाश्वतमनित्यं मन्यमान इति सम्बन्धः। वैराग्यं रागनिवृत्तिं उपेतः ऐहिकामुष्मिकभोगरागविनिर्मुक्त इत्यर्थः। अरण्यं ग्राम्यजनवर्जितं विविक्तमभयं देशं प्रति निर्जगाम प्रस्थित इत्यर्थः। "स तत्र० तिष्ठति" इति। तत्रारण्ये स राजा बृहद्रथनामा परमं दुष्करं कायशोषलक्षणं तप आस्थायोर्द्ध्वबाहुरूर्द्ध्वीकृतबाहुद्वय आदित्यं सवितारमुदीक्षमाणः सवितर्यारोपितदृष्टिः सन् तिष्ठति अतिष्ठदित्यर्थः। तपसि स्थिरचित्तानामभीष्टसिद्धिरवश्यम्भाविनीत्यभिप्रेत्याह "अन्ते सहस्रस्यान्तिकं० शाकायन्यः" इति। सहस्रस्य संवत्सराणामिति शेषः। एवं तपसि स्थितस्य राज्ञः

---

* सहस्राहस्या इति पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्भगवाञ्छाकायन्यः। उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति राजानमब्रवीत्। स तस्मै नमः कृत्वोवाच। भगवन्नाहमात्मवित् त्वं तत्त्ववित् शुश्रुमो वयं स त्वं नो ब्रूहीति। एतद्वृत्तं पुरस्ताद्दुःशक्यमेतत्प्रश्नमैक्ष्वाकान्यान्

संवत्सराणां सहस्रस्यान्ते भगवाञ्छाकायन्योऽन्तिकमाजगामेति सम्बन्धः। सहस्राहस्येति पाठे सहस्रदिवसात्मककालस्यान्त इति योज्यम्। शाकायनस्यापत्यं शाकायन्यस्तन्नामा कश्चिदृषिः, तस्याभीष्टवरदानसामर्थ्यद्योतनाय विशेषणानि, अधूमकोऽग्निरिवेति, उपशान्तविक्षेप इत्यर्थः। तेजसा स्वप्रभया ब्रह्मवर्चसेनेति यावत्। निर्दहन्निवान्यानभिभवन्निवेत्यनेनाज्ञानसंशयादिप्रतिबन्धरहितं तत्त्वज्ञानमस्यास्तीति द्योतितम्। कुत एवम्प्रभावोऽयमित्यतो विशिनष्ट्यात्मविदिति। आत्मतत्त्ववित्त्वे लिङ्गमाह, भगवानिति।

'उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति'॥

(विष्णुपु॰ अं॰ ६। अ॰ ५) इति स्मृत्युक्तो भगवच्छब्दार्थः सर्वज्ञ इत्यर्थः। आगत्य किं कृतवानिति तदाह "उत्तिष्ठ॰ अब्रवीत्" इति। स्पष्टोऽर्थः। ततो राजकृतमाह "स तस्मै॰ उवाच" इति। तस्मै शाकायन्याय स राजा नमो नमनं नमस्कारं कृत्वा तं दण्डवत्प्रणम्योवाचोक्तवान्। किमुवाचेति तदाह "भगवन्॰ ब्रूहीति" इति। इत्युवाचेति सम्बन्धः। हे भगवन् पूजावन् अहमात्मविन्न आत्मतत्त्वविन्न भवामीत्यर्थः। त्वं तत्त्वविदात्मतत्त्वस्य वेत्ता, इति शब्दोऽत्राध्याहार्यः। इति वयं शुश्रुम विसर्गान्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामान् वृणीष्वेति शाकायन्यः। शिरसाऽस्य चरणावभिमृशमानो राजेमां गाथां जगाद ॥ २ ॥

पाठः छान्दसः। अतः स त्वमात्मतत्त्वं नोऽस्मभ्यं ब्रूहि प्रतिपादयेत्यर्थः। एवं पृष्टवते शाकायन्यः किमाहेत्येतदाह "एतत्० शाकायन्यः" इति। यत् त्वया पृष्टमात्मतत्त्वमेतद्वस्तु पुरस्तादतीते काले वृत्तं सिद्धं निर्णीतं पूर्वतनैर्ऋषिभिरिति योज्यम्। इदानीं त्वेतत्प्रश्नं दुःशक्यं, लिङ्गव्यत्ययेन एष प्रश्नो दुःशक्यो दुःशक इत्यर्थः। यद्वा एतद्वृत्तमेतस्यात्मतत्त्वस्य वृत्तं याथात्म्यं एतत्प्रश्नं प्रश्नवचनञ्च पुरस्तात् प्रथमं चित्तैकाग्र्यादिति योज्यं, दुःशक्यं दुःशकं वक्तुं श्रोतुं च, दुर्लभमेतदित्यर्थः। तथा च। श्रुतिस्मृती—

'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः।

आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः"

(कठोप०) इति।

'आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।

आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्'

(गी० अ० २। श्लो० २९) इति। हे ऐक्ष्वाक इक्ष्वाकुकुलोद्भव! अन्यान् कामान् स्वर्गभोगानप्सरःप्रभृतीनैहिकान् वा धनतरुणी प्रभृतीन् वृणीष्व प्रार्थयेथा इति शाकायन्यः उवाचेत्यनुषङ्गः। ततो राजा वृत्तान्तमाह "शिरसा० जगाद" इति। इमां बुद्धिस्थां वक्ष्यमाणां गाथां यथास्थितार्थां कथां जगादोक्तवान् राजा, सुगममन्यत् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भगवन्नस्थिचर्मस्नायुमज्जमांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तकफसङ्घाते दुर्गन्धे निःसारेऽस्मिञ्छरीरे किं कामोपभोगैः। कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसम्प्रयोगक्षुत्पिपासाजरामृत्युरोगशोकाद्यैरभिहते ऽस्मिञ्छरीरे किं कामोपभोगैः ॥ ३ ॥

यदुक्तमन्यान् कामान् वृणीष्वेति तत्र भोगायतनस्य स्वभावालोचनायां न कामः कामाय कल्पत इति द्योतयन् स्थूलशरीरं तावत् बीभत्सितं वर्णयति "भगवन्० भोगैः" इति। श्लेष्मा शिङ्घाणको नासाद्वारकमलः, दूषिका नेत्रमलः, कफो हृत्कण्ठरोधी पिच्छिलो मल इति भेदः। अस्थ्यादिसङ्घाते घने दुःसहगन्धे कदलीस्तम्भवन्निःसारे ऽन्तःसारवर्जिते ऽस्मिन् स्थूले शरीरे वर्तमानस्येति शेषः, किं कामोपभोगैः कार्यं। आघातं नीयमानस्य वध्यस्येव भोजनाच्छादनालङ्कारादि न तोषमुपैष्यतीत्यभिप्रायः। न केवलमिदं शरीरं स्वतो बीभत्सितत्वात् कामानर्हमपि त्वतिबलवदरिनिवहैरभिभूयमानत्वादपीत्याह "काम० भोगैः" इति। कामोऽप्राप्ताभिलाषः। क्रोधः प्रसिद्धः। लोभः प्राप्तेष्वपि विषयेष्वलम्बुद्धिराहित्यम्। मोहोऽनर्थे ऽर्थबुद्धिः। भयं परित्रासः। विषादः शोकः। ईर्ष्या परप्रद्वेषः। इष्टवियोगः स्वानुकूलपुत्राद्यनुबन्धवैकल्यम्। अनिष्टसम्प्रयोगः स्वप्रतिकूलानुबन्धसङ्कलनम्। एताभ्यां दुःखं लक्ष्यते। एवमेतेऽन्तःकरणधर्माः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वं चेदं क्षयिष्णु पश्यामो यथेमे दंशमशकादय-स्तृणवनस्पतयोद्भूतप्रध्वंसिनः । अथ किमेतैर्वा परे ऽन्ये महाधनुर्धराश्चक्रवर्तिनः केचित् । सुद्युम्नभूरिद्युम्नेन्द्र-

---

क्षुत्पिपासे प्राणधर्मौ । जरादयो देहधर्मा आगन्तुकाः । शोकः शोकनिमित्तो देहावसादः कार्श्यमिति यावत् । आदिशब्दा-द्वृद्धिविपरिणामौ गृह्येते । अन्यदुक्तार्थम् ॥ २ ॥

एवंविधोऽपि सङ्घातो यदि चिरस्थायी स्थिरः स्यात् तदा कथञ्चिदपि विषकीटवदभिलष्येत नैवमस्तीत्याह "सर्वं चेदं० प्रध्वंसिनः" इति । सर्वं चेदं यथा वर्णितं सङ्घातरूपं चयशीलं नश्वरं पश्यामो निर्धारयाम इति प्रतिज्ञा, तत्र हेतुरुद्भूत-प्रध्वंसित्वादिति योज्यम् । कादाचित्कत्वादित्यर्थः । यथेमे इत्या-दि प्रध्वंसिन इत्यन्तं निदर्शनमिति विभागः । तथा चायं प्रयोगः, विमतः सङ्घातोऽशाश्वतः उत्पन्नप्रध्वंसित्वाद्य एवं स एवं यथेमे दृश्यमाना दंशमशकादयो यथा वा तृणवनस्पतय उद्भूतप्रध्वंसिनोऽशाश्वतास्तथा चायं तस्मात् तथेति । वनस्पतयो-द्भूतेति सन्धिश्छान्दसः । वोकारो वाऽत्र लुप्तो द्रष्टव्यः । उक्त-दृष्टान्तेष्वप्रकृष्टकर्मजत्वमुपाधिमाशङ्क्य तस्याप्रयोजकतां दर्शयन् प्रकृष्टकर्मजेष्वप्यशाश्वततामाविष्करोति "अथ किमेतैः० केचित्" इति । अन्यच्चेत्यस्मिन्नर्थे ऽथशब्दः, एतैरुदाहृतैः क्षुद्रजन्तुस्थावरैः किम् । वाशब्दोऽनादरे । परे उत्कृष्टा अन्ये उक्तेभ्यो महाधनु-र्धरा महाशूराश्चक्रवर्तिनः सार्वभौमाश्च केचित् अस्माल्लोकादमुं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्युम्नकुवलयाश्वयौवनाश्ववध्र्यश्वाश्वपतिः शशबिन्दुर्हरिश्चन्द्रोऽम्बरीष*ननक्तुसर्यातिर्ययात्यनरण्योक्षसेनादयः। अथ †मरुत्तभरतप्रभृतयो राजानः। मिषतो बन्धुवर्गस्य महतीं श्रियं त्यक्त्वाऽस्माल्लोकादमुं लोकं प्रयाता इति। अथ किमेतैर्वा परेऽन्ये गन्धर्वासुरयक्ष-

लोकं प्रयाता इत्युत्तरेणान्वयः। तानेव चक्रवर्तिनः कांश्चिद्गणयति "सुद्युम्नभूरिद्युम्न० सेनादयः" इति। अत्राश्वपतिः शशबिन्दुरित्यादिपदविच्छेदपाठश्छान्दसः प्रामादिको वा, एते सूर्यसोमवंशजा राजान उक्ताः। एतेष्वपि विशिष्टतरानन्यानुदाहरति "अथ मरुत्त० राजानः" इति। †मरुत्तो नाम संवर्तकेन योगिना याजितो राजा, यस्य यागे समागता इन्द्रादयः सायुधा एव स्तम्भिताः पुनश्च चमसाध्वर्यवे नियुक्ताः सः भरतो दौष्यन्तिर्येनाश्वमेधानां त्रिशती कृता सः। प्रभृतिरित्यादिपदपर्यायेण प्रियव्रतादयो गृह्यन्ते। ते किं तदाह "मिषतो बन्धुवर्गस्य० प्रयाता इति" इति। बन्धुवर्गस्य भोग्यजातस्य मिषतः पश्यतो जीवत एव सतोऽचुम्बस्येति यावत्। महतीमपरिमितां, श्रियं विभूतिं, त्यक्त्वा अनिच्छन्तोऽपि तां परित्यज्यास्मात्प्रतिपन्नाल्लोकादिहादमुं लोकं परोक्षं प्रयाताः नष्टा बभूवुरिति निश्चितमित्यर्थः। एवं मनुष्यशरीराणामुत्कृष्टानामप्यनित्यतामुदाहृत्यामनुष्येष्वप्युत्कर्ष-

* नघुष इति इउरोपीयपुस्तके पठितं।

† मरुंत इति लिखितं किन्तु मरुत्त इति शतपथब्राह्मणे महाभारतीयशान्तिपर्वणि च पठ्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राक्षसभूतगणपिशाचोरगग्रहादीनां निरोधं पश्यामः। अथ किमेतैर्वान्यानां शोषणं महार्णवानां शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं व्रश्चनं वातरज्जूनां निमज्जनं पृथिव्याः स्थानादपसरणं सुराणामित्येतद्विधेऽस्मिन्संसारे किं कामोपभोगैः। यैरेवाश्रितस्या-

---

निकर्षतारतम्येन स्थितेष्वनित्यतामावेदयन्नादौ तेषु निकृष्टाननुक्रमते "अथ किं० पश्यामः" इति। अथापि च एतैः पूर्वोक्तैः किं वा, इतोऽप्यन्ये परे चिरस्थायितयोत्कृष्टाः सन्ति, तेषां गन्धर्वादीनां निरोधं नाशं पश्याम इति योजना। पिशाचा उन्मादापस्मारादयः। ग्रहा बालग्रहा मातृकादयः। अन्ये प्रसिद्धाः। "अथ किं० कामोपभोगैः" इति। अथाप्येतैरुक्तैः किं वा, इतोऽपि स्थिरत्वेन प्रतिपन्नानामन्यानामन्येषामित्येतत् स्थिरतां न पश्याम इति योजना। यतः शोषणं महार्णवानां प्रलयकाले, अर्णानामिति पाठे ऽर्णांस्यर्हन्तीत्यर्णा नद्यः, तासां शोषणं महार्णवानाञ्च शोषणमिति योजनीयम्। शिखरिणां महामेरुप्रभृतीनां गिरीणां प्रपतनमुच्छेदः ध्रुवस्य सर्वज्योतिश्चक्रावलम्बनस्य प्रचलनं स्वमण्डलात्प्रच्यवनं, वातरज्जूनां वातमयानां रज्जूनां शिशुमारचक्रबन्धनानां व्रश्चनं छेदनं, पृथिव्या अपि सप्तद्वीपवत्या निमज्जनमुदकान्तर्लयः। एवं स्थाननाशे तत्स्थानां सुराणां ब्रह्मादीनां तस्मात् तस्मात्स्थानादपसरणमपसर्पणं स्थानभ्रष्टतया क्षीणभोगत्वं, इतीत्थमेतद्विधे एतादृक्प्रकारे सर्वथा नश्वरेऽस्मिन् ब्रह्मादिस्तम्बपर्यन्ते संसारे कि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सकृदिहावर्तनं दृश्यता इत्युद्धर्तुमर्हसि । अन्धोदपानस्थो भेक इवाहमस्मिन्संसारे भगवंस्त्वं नो गतिस्त्वं नो गतिः ॥ ४ ॥

इति मैत्र्युपनिषदि प्रथमः प्रपाठकः ।

कामोपभोगैरिति व्याख्यातम् । भोगस्थानानां भोग्यदेहेन्द्रियविषयाणां तद्विशिष्टभोक्तॄणां चानित्यत्वं प्रसाध्य भोगानामपि तत्प्रसाधयति "यैरेवाश्रितस्यासकृत्० दृश्यते" इति । यैराश्रितस्य भोजितस्य ब्रह्मलोकपर्यन्तेषु स्थानेषु तर्पितस्य पुंस इह मनुष्यलोकेऽसकृन्मुहुर्मुहुरावर्तनमावृत्तिर्दृश्यते, तैरनित्यैः कामोपभोगैः किं ममेत्यर्थः । तदनेन प्रबन्धेनानात्मविषयो वरः प्रत्याख्यातोऽनेन चात्मज्ञानयोग्यता दर्शिता । एवं गुरुवैराग्यं विवेकपूर्वकमुपवर्ण्य स्थितो गुरोरनुग्रहदृष्टिमालक्ष्य तत्पादोपसर्पणं विद्योपदेशग्रहणाङ्गं विदधद्गुरुं प्रार्थयते "इत्युद्धर्तुमर्हसि" इति । यतोऽहं निर्विण्णोऽस्मि अतो मामुद्धर्तुमर्हसि इत्युक्तवानित्यर्थः । कुत उद्धरणं तदाह "अन्धोदपानस्थो० गतिः" इति । अन्धोदपानं निरुदकः कूपस्तत्र स्थितो भेको मण्डूक इवास्मिन् यथावर्णिते संसारे स्थितो दुःखयस्मीत्यस्मादुद्धर्तुमर्हसीत्यर्थः । कोऽप्यन्यस्त्वामुद्धरिष्यतीति मा शङ्किष्ठा इत्याह "भगवंस्त्वं नो गतिस्त्वं नो गतिः" इति । अभ्यास आदरार्थः, अध्यायसमाप्तिद्योतनार्थो वा ॥ ४ ॥

इति रामतीर्थविरचितायां मैत्र्युपनिषद्दीपिकायां
प्रथमः प्रपाठकः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ भगवाञ्छाकायन्यः सुप्रीतस्त्वब्रवीद्राजानम् । महाराज बृहद्रथेक्ष्वाकुवंशध्वज शीघ्रमात्मज्ञः कृतकृ-

---

अथ द्वितीयः प्रपाठकः ।

एवं वरान्तरैः प्रलोभ्यमानोऽप्यप्रचलिततया सुपरीक्षितो जिज्ञासुरुपसन्नः शिष्यो न गुरुणोपेक्षणीय इति गुरोः प्रवृत्तिं दर्शयति श्रुतिः "अथ भगवान्० राजानं" इति । स्पष्टोऽर्थः । किमब्रवीदिति तदाह "महाराज बृहद्रथ० विश्रुतोऽसीति" इति । महाराजेत्यादिशिष्यप्रशंसा वक्ष्यमाणार्थग्रहणयोग्यतां तस्य सूचयितुम् । प्रशस्यमानो हि गुरोः प्रसन्नतां बुद्ध्वा तदुक्तार्थं श्रद्दधानतया तमवधारयति । वंशध्वजत्वं तत्ख्या-तिकरत्वम् । त्वं शीघ्रमात्मज्ञः संवत्सरवासशुश्रूषादिविलम्बं विना मत्त आत्मज्ञानं प्राप्नोषि यतोऽतः कृतकृत्यस्त्वमिति । इतिशब्दोऽग्रेतन इह ज्ञेयः । इतिहेतोर्मरुन्नाम्ना मरुतो वायो-र्यन्नाम पृषदश्व इति तेन नाम्ना विश्रुतोऽसीति योजना । पृषन्तो महान्तोऽश्वा यस्य रथे भवन्ति स पृषदश्वो वायुः, महाश्वयुक्तरथो हि महान् भवतीति महारथ उच्यते वायुः, अयमपि तत्पर्यायत्वाद्बृहद्रथ इति ख्यातिमापन्न इत्यर्थः । अथवा जगत्प्राण इति यद्वायोर्नाम तेन नाम्नेदानीं विश्रुतो ऽसीति योजना । मत्प्रसादात् त्वं जगदात्मा संवृत्तोऽसीत्यभि-प्रायः । यदर्थमयमुपसन्नो राजा गुरुं तमात्मानमुपदिशति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यस्त्वं मरुन्नाम्नेति विश्रुतोऽसीति। अयं वाव खल्वात्मा ते। यः कतमो भगवा इति। तं होवाचेति ॥ १ ॥

अथ य एष उच्छ्वासाविष्टम्भनेनोर्द्ध्वमुत्क्रान्तो व्ययमानोऽव्ययमानस्तमः प्रणुदत्येष आत्मा। इत्याह

"अयं वाव खल्वात्मा ते" इति। ते तव अहं ममेति सङ्घातमनुभवतोऽयं वाव अयमेवानुभविताऽऽत्मा खलु नात्र संशयः कार्य इत्यर्थः। कोऽसावनुभवितेति पृच्छति "यः कतमो भगवा इति" इति। यस्त्वयोक्त आत्मा स कतमो भगवा हे भगवः देहेन्द्रियमनोबुद्धिप्राणानां मध्ये किमन्यतमः किं वा तद्विलक्षणोऽन्य इति प्रश्नार्थः। तत्र सङ्घातविलक्षण एवात्मेति गुरुरुत्तरं प्रतिजज्ञे इत्याह श्रुतिः "तं होवाचेति" इति। इतिशब्द ऐतिह्यार्थोऽनुवाकसमाप्त्यर्थो वा ॥ १ ॥

पूर्वमयं वावात्मेति जागरितेऽनुभविता आत्मेति प्रदर्शितं, तेन च स्थूलशरीरादन्यत्वमुक्तं। इदानीं सूक्ष्मस्य प्राणान्तःकरणसङ्घातस्य द्रष्टृत्वशङ्कापाकरणेन ततो विविक्तमात्मानमुपदिशति "अथ य० आत्मा" इति। अथ जाग्रद्भोगहेतुकर्मोपरमानन्तरं स्वप्नभोगोद्भवकाले य एष विद्वत्प्रत्यक्ष उच्छ्वासस्य उच्छ्वासनिश्वासव्यापारवतः प्राणस्याविष्टम्भनेनानिरोधेनोर्द्ध्वमुपरि, स्थूलाश्रयं सूक्ष्ममूर्द्ध्वमुपरीति चोच्यते, तत्प्रत्युत्क्रान्तः स्थूलशरीराभिमानं परित्यज्य सूक्ष्मशरीरमभिमन्यमान इत्यर्थः। व्ययमानो विविधमययमानो नानावासनावासितान्तःकरणविकारा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भगवान् मैत्रिः । इत्येवं ह्याह । अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य

ननु भवंस्तत्तदात्मना विप्रसृत इव[१] वभासमानोऽपि परमार्थतोऽव्ययमानो निश्चल एव संस्तमो मोहलक्षणं प्रणुदति प्रेरयति, पश्चात् क्रमेण मोहमाविशति जाग्रद्दृष्टं नानुसन्धत्त इत्यर्थः । एष आत्मा यः स्वप्ने करणानामुपरमाद्बाह्यान् विषयाननुभवन् वासनामयांश्चानुभवन् प्राणेन स्थूलं च देहं परिपालयन्नास्ते एष आत्मेत्यर्थः । तथा च श्रुत्यन्तरं

'प्राणेन रक्षन्नवरं कुलायं बहिः कुलायादमृतश्चरित्वा ।

स ईयते ऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एकहꣳसः'

(बृहदा० अ० ४ । ब्रा० ३) इति । उक्ते ऽस्मिन्नात्मनि प्रत्ययदार्ढ्याय वृद्धसम्मतिमाह "इत्याह भगवान् मैत्रिः" इति । मैत्रिर्मित्राया अपत्यमृषिर्मैत्रिर्मैत्रेयः । वृत्तमर्थं श्रुतिः स्वमुखेनाह "इत्येवं ह्याह" इति । शाकायन्य इत्याह भगवान्मैत्रिरित्येवं हि राजानं प्रत्याहेत्यर्थः । येनाहं ममेत्यनभिमन्यमानानामिदं स्थूलं शरीरं निर्व्यापारं पतति तदनु च येन प्रकाशितं प्राणान्तःकरणरूपं लिङ्गं विषयविषय्याकारेण व्याप्रियते स आत्मा तवेत्युक्तं, इदानीमेतस्यापि सूक्ष्मस्य यत्र तमोमात्रेण कारणात्मनि लयो लीनप्रपञ्चस्य यत्स्वभावोऽवतिष्ठते स मुख्य आत्मा साक्षादेव तमात्मेति गृहाणेत्याह "अथ य० ब्रह्मेति" इति । अथ

---

(१) इव इति पु० पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वेन रूपेणाभिनिष्पद्यत इत्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति ॥ २ ॥

स्वप्नदर्शनहेतुकर्मक्षये सति पुनर्जाग्रन्निमित्तकर्मानुद्भवे य एष स्वप्नविषयसाक्षी सम्प्रसादः सम्यक् प्रसीदत्यत्रेति सम्प्रसादः सुषुप्तिः, तदवस्थः आत्मेह सम्प्रसाद उच्यते, स्थूलसूक्ष्मोपाधिद्वयविलापनेन तत्सम्पर्कजनितकालुष्यविलयात् सम्प्रसन्नः सुषुप्तौ पुरुषो भवति। स सम्प्रसादोऽस्मात्पूर्वगृहीताच्छरीराद्देहद्वयात् समुत्थाय सम्यगुत्थाय तद्विस्मृत्य तदभिमानं परित्यज्येति यावत्। परं प्रविलीनप्रपञ्चकारणं ज्योतिः प्रकाशमात्रस्वभावमुपसम्पद्य तदैकात्म्यभावेन सम्पद्य स्वेनासाधारणेन रूपेणाभिनिष्पद्यते जीवावस्थामप्यभिभूय स्वस्वरूपमुपगतो भवति, एवं क्रमेण येन स्वरूपेणाभिनिष्पद्यते, एष आत्मेति होवाच शाकायन्य इति श्रुतेर्वचनमिदम्। एवंविधात्मस्वरूपज्ञाने सति ज्ञातव्यं नावशिष्यते कर्तव्यं वा प्राप्तव्यं वा किमपीत्याह एतदमृतमभयमेतद्ब्रह्मेति होवाचेति सम्बन्धः। अमृतमविनश्वरमत एवाभयमप्रकम्प्यमेतदेव ब्रह्म परिपूर्णमद्वयानन्दरूपमित्यर्थः। अतस्त्वं कृतकृत्योऽसीत्यभिप्रायः। अस्यानुवाकस्यापरा व्याख्या। पूर्वानुवाके अयं वाव खल्वात्मा त इति सामान्यतोऽनिर्धारितविशेष आत्मोपदिष्टस्तद्विशेषबुभुत्सया यः कतम इति पृष्टे तं विशेषतो वक्तुं प्रतिजज्ञे। तत्राऽऽत्मनो निर्विशेषस्वभावत्वाद्विशेषतो निर्वक्तुमशक्यत्वादुपाध्याकारजनित-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेषप्रविलापनेन निर्विशेषमात्मानं दर्शयितुमारभते "अथ य एषोच्छ्वासाविष्टम्भनेन" इत्यादिना । अथ यदि विशेषमात्मनोऽवगन्तुमिच्छसीत्यर्थः, तर्हि शृणु । यत्तुभ्यं मयोक्त एष एव उच्छ्वासाविष्टम्भनेन, ऊर्द्ध्वश्वासो यो मरणकाले भवति स उच्छ्वासस्तस्याऽऽसमन्तात् विष्टम्भनं निरोधः[१], तेन तन्निरोधं कृत्वा देहान्तःसञ्चारिणं प्राणमाश्रित्येत्यर्थः । ऊर्द्ध्वं हृदयात् कण्ठं कण्ठाच्च शिरःपर्यन्तमुत्क्रान्तो विप्रसृतः उपलक्षणमेतत्, अपश्वाससमाविष्टभ्य हृदयादधोऽप्यपक्रान्त आपादतलमस्तकमयःपिण्डमिव सन्तपन्नग्निश्चेतनतामापादयन् व्याप्य व्यवस्थित इत्यर्थः । तत्रैवं स्थितस्तत्तदिन्द्रियद्वारकबुद्धिवृत्तिभिर्व्ययमानो विविधं शब्दादिविषयाकारेणायमानः प्रवर्त्तमानस्तत्तद्विषयाकारबुद्धिवृत्त्यध्यासेन द्रष्टा श्रोता मन्तेत्याद्यनेकरूपतयाऽऽत्मव्यवहारमनुभवन्निति यावत् । तथापि स्वरूपतस्त्वव्ययमानोऽप्रचलितस्वभावः कूटस्थ इति यावत् । तमो विषयानभिव्यक्तिलक्षणं प्रणुदति अपसारयति विषयेषु स्वचैतन्यकर्मापादयंस्तेषामज्ञातताम पनयतीत्यर्थः । एवं यो व्यवहरन्नेतद्देहमवष्टभ्यास्ते एष आत्मेत्यादि व्याख्यातम् । तथाच मन्त्रवर्णः

'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इति ।

एवं सोपाधिमात्मानमुपाधिद्वारोपलक्ष्य तमेव पुनरुपाधिविलापनेन निरुपाधिकं शुद्धमात्मानमुपस्थाप्य तस्य ब्रह्मरूपत्वमुपदेष्टुं प्रवर्तते "अथ य एष सम्प्रसादः" इत्यादिना । व्याख्यानं समानम् ॥२॥

(१) विरोधः इति पु० पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ खल्वियं ब्रह्मविद्या सर्वोपनिषद्विद्या वा राजन्नस्माकं भगवता मैत्रिणाऽऽख्याताऽहं ते कथयिष्यामीति। अथापहतपाप्मानस्तिग्मतेजस ऊर्द्ध्वरेतसो वालखिल्या इति श्रूयन्ते। अथ क्रतुं प्रजा-

---

एवं सङ्क्षेपत आत्मतत्त्वमुपदिशन् शाकायन्यः पुनर्विस्तरेण तस्यात्मनः स्वभावमुपदेष्टुकामः स्वाचार्यद्वारा स्वस्यैतद्विद्याप्राप्तिं दर्शयति। सङ्क्षेपविस्तराभ्यां हि निरूप्यमाणोऽर्थः सुखावबोधो दृढनिश्चयश्चापद्यत इत्यत आह "अथ खलु ० कथयिष्यामीति" इति। अथशब्द उत्तरारम्भार्थः। हे राजन् बृहद्रथ? यदिदमात्मतत्त्वज्ञानं मया तुभ्यमुक्तमियं खलु ब्रह्मविद्या सर्वशाखोपनिषत्प्रतिपाद्या वा विद्या, वाशब्दश्चार्थे, सा चेयमेव नान्याऽस्माकं भगवता मैत्रिणा गुरुणाऽऽख्याता कथिता तामेवाहं कथयिष्यामि, तेन मह्यं येन प्रकारेणोक्तं तेनैव प्रकारेण महदाख्यानेन निरूपयिष्यामीत्यर्थः। अयमाशयः सङ्घातविलक्षणस्तत्साच्यात्मैव ब्रह्मेति यदिदमेतच्छाखाप्रवक्तुर्मैत्रेराचार्यस्य मतं तत्सर्वशाखासम्मतं सर्वब्रह्मवित्सम्मतञ्च न पुनस्तार्किकसमयवत्परस्परविगीतं, अतो दृढविश्वासः कर्त्तव्य इति। किं तत् महतां पूर्ववृत्तमाख्यानं मैत्रिणोक्तमित्यभिमुखीभवन्तं शिष्यं प्रत्याख्यायिकामाह "अथापहत ० श्रूयन्ते" इति। अथेदानीमिदं शृणु किं अप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पतिमब्रुवन् । भगवन् शकटमिवाचेतनमिदं शरीरं कस्यैष खल्वीदृशो महिमाऽतीन्द्रियभूतस्य येनैतद्वि-धमेतच्चेतनवत् प्रतिष्ठापितं प्रचोदयिता वा अस्य यद् भगवन् वेत्सि तदस्माकं ब्रूहीति तान् होवाचेति ॥ ३ ॥

हतपाप्मानस्तपोनिर्धूतकल्मषाः तिग्मतेजसस्तीव्रतेजसोऽत्यूर्ज्जित-प्रभावाः तेजसा इत्येवंविध एतच्छाखासङ्केतपाठश्छान्दसः सर्वत्र । ऊर्द्ध्वरेतसोऽस्खलितब्रह्मचर्या जितेन्द्रिया इति यावत् । वाल-खिल्या वालखिल्यसञ्ज्ञा इत्येवंविधा ऋषयः श्रूयन्ते श्रुतिस्मृति-पुराणेष्वित्यर्थः । किं तत इत्यपेक्षायामाह "अथ क्रतुं० अब्रुवन्" इति । अथ कदाचित् ते क्रतुनामानं प्रजापतिं गत्वाऽब्रुवन्नुक्तवन्त इत्यर्थः । किमब्रुवन्निति तदाह "भगवन्० होवाचेति" इति । हे भगवन् प्रजापते ! इदं शरीरं सावयवत्वाद्रू-पादिमत्त्वाच्च शकटमिवाऽन इवाचेतनं जडं, एवमपि चेतनावदिव शकटविलक्षणमनुभूयतेऽतः पृच्छामो येनैतद्विधमेतच्छरीरं चेतन-वत्प्रतिष्ठापितं स एष महिमा माहात्म्यं कस्य खल्वतीन्द्रिय-भूतस्यादृश्यस्याग्राह्यस्य सत ईदृश एतादृशः । को वास्य चेतयि-तेति प्रश्नार्थः । किञ्च प्रचोदयिता वास्य शरीरस्य शाकटिक इव शकटस्य प्रेरयिता वा कोऽस्ति । यदत्र चेतयितृत्वेन प्रेरयितृत्वेनानुगतं वेत्सि हे भगवन् ! तदस्माकं ब्रूहीति अब्रुवन्निति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योह खलु वावोपरिस्थः श्रूयते गुणेष्विवोर्द्ध्वरेतसः स वा एष शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्मा-

---

पूर्व्वेणान्वयः। "तान् होवाच" इति श्रुतिवचनं। तान् प्रति प्रजापतिर्ह उवाचोक्तवानुत्तरमित्यर्थः॥ २॥

"यो ह० वैषोऽप्यस्येति" इति। ह स्फुटं। खलुशब्दो वाक्यालङ्कारार्थः। वावशब्दोऽवधारणे। य एवोपरिस्थः सर्वस्य प्रपञ्चस्योपरि निष्प्रपञ्चे स्वरूपेऽवस्थितः। यद्वा वावशब्दो भिन्नक्रमः, यो ह खलु उपरिस्थित एव प्रपञ्चान्तरनुगम्यमानोऽपि न तस्मिन् स्थितः, किन्त्वसङ्गतया प्रपञ्चातीते स्वस्वरूपे स्थित एव सन् स्वचैतन्याभासेन प्रपञ्चमवभासयंस्तत्र स्थित एव भवति न वस्तुतस्तत्रास्ति, तस्य स्वात्मन्यध्यस्तस्य मिथ्यात्वादित्यभिप्रायः। तथा च श्रूयते—

'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं'

इति, श्रुत्यन्तर इत्यर्थः। प्रपञ्चानुगतस्यापि तद्धर्मास्पृष्टत्वेन तत उपरिस्थत्वे दृष्टान्तमाह "गुणेष्विवोर्द्ध्वरेतसः" इति। यथोर्द्ध्वरेतसो योगिनो गुणेषु विषयेषु वर्त्तमाना अपि तत्रासङ्गितया तेभ्य ऊर्द्ध्वा एव तथायमपीत्यर्थः। अथवा यो ह खलु उपरिस्थोऽध्यक्षतया स्थित एव गुणेषु गुणकार्येषु देहादिष्विव श्रूयत इति योजना। तथा च श्रुतिः—

'यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः' (बृहदा० अ० ३ ब्रा० ७)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठत्यजेनेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता

इति। ऊर्द्ध्वरेतस इति सम्बोधनं। यत एवमसङ्गस्वभावोऽत एव स एष वै शुद्धो रागादिकालुष्यरहित एव। पावयति पुनातीति वा पूतः कर्त्तरि निष्ठा न कर्मणि, आत्मान्यस्य सर्वस्यापि जड-तयाऽशुचेरात्मपावयितृत्वानुपपत्तेः। शून्यो निष्प्रपञ्चः। शान्तो निर्विकारः कूटस्थ इत्यर्थः। अप्राणः प्राणहीनः प्राणनादिधर्मरहित इत्यर्थः। निरात्माऽत्रात्मेति मन उच्यते मनोरहितः सङ्कल्पाध्य-वसायादिधर्मरहित इत्यर्थः। अन्तो विनाशस्तद्रहितोऽनन्तः। अक्षय्यः क्षेतुमशक्योऽपक्षयरहित इत्यर्थः। स्थिरो वृद्धिरहितः। शाश्वतः शश्वद्भवः सर्वदैकरूपो विपरिणामशून्य इत्यर्थः। अजो जन्मरहितः। स्वतन्त्रो जन्मानन्तरभाव्यस्तित्वविकाररहितः। एवंविध आत्मा क्व तिष्ठतीत्यपेक्षायामाह “स्वे महिम्नि तिष्ठति” इति। स्वस्वरूपे स्थितो नास्याधारोऽस्तीत्यर्थः। तथा च श्रुत्यन्तरं—

‘स भगवः कस्मिन् प्रतिष्ठित इति। स्वे महिम्नि यदि वा न महिम्नि’ (छा० अ० ७। खं० २४) इति।

अन्यो ह्यन्यस्मिन् प्रतिष्ठितो भवति, नास्यान्योऽस्ति यत्रायं प्रतिष्ठितः स्यात्, तस्मात् स्वमहिम्न्येवावस्थितो नान्याधीनतयेत्यर्थः। य एष एवंलक्षण आत्मा अनेनेदं शरीरं चेतनवच्चेतनमिव प्रतिष्ठा-पितं व्यवहारकालेऽबाधिततया स्थापितं, अस्य शरीरादिसंघातस्य प्रचोदयिता प्रेरकश्च यो वास्ति सोऽप्येष एव इति होवाचेति सम्बन्धः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैषोऽप्यस्येति। ते होचुर्भगवन् कथमनेनेदृशेनानिष्ठेनैतद्विधमिदं चेतनवत् प्रतिष्ठापितं प्रचोदयिता वैषोऽस्य कथमिति तान् होवाच॥ ४॥

स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञोऽबुद्धि-

अचेतने देहादौ चेतयितृत्वनियन्तृत्वाभ्यां ताटस्थ्येनास्तीति प्रतिपन्नस्य जिज्ञासितस्य स्वरूपमेतत् स वा एष इत्यादितिष्ठतीत्यन्तेनाभिहितं। एतच्चोपदेशमात्रेणोक्तं, युक्तितो व्यवस्थापयितुं पुनः प्रश्नमुत्थापयति "ते होचुः॰ होवाच" इति। ईदृशेनोक्तलक्षणेन स्वे महिम्नि स्थितेनेत्यर्थः। अत एवानिष्ठेन, निष्ठा तात्पर्यं ममानेन भाव्यमित्येवमाकारा प्रणतिः सा यस्य नास्ति सोऽनिष्ठस्तेन। देहादावहम्ममताहेतुशून्येनेत्यर्थः। अनिष्टेनेति पाठेऽयमर्थः, इष्टमिच्छा भावे निष्ठा, नास्तीष्टं यस्य सोऽनिष्टः इच्छारहितस्तेनेति। अणिष्ठेनेति पाठे तु सूक्ष्मतरेण दुर्लक्ष्येणेत्यर्थः। व्याख्यातार्थमन्यत्॥ ४॥

सत्यमेवंविधस्यात्मनः परमार्थतश्चेतयितृत्वं प्रेरयितृत्वं वा न सम्भवति तथापि शुक्त्यादौ रजतादिवत् स्वात्मन्यध्यस्तस्यान्यत्राभावादधिष्ठानपारतन्त्र्यात् तद्धर्मकमिवाचेतनमपि चेतनमिवानधिष्ठितमप्यधिष्ठितमिवावभासते शरीरादि न वस्तुत इत्यभिसन्धायोक्तं स्वरूपमनूद्य तस्याविद्याकृतकार्योपाधिप्रवेशनिमित्तमिदं धर्मद्वयमित्युत्तरमाह प्रजापतिः "स वा एष॰ एवं" इति। स वै पूर्वोक्त एष विद्वत्प्रत्यक्ष आत्मा सूक्ष्मोऽविषयः यतोऽग्राह्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वमिहैवावर्ततेंऽशेनेति सुप्तस्येवाबुद्धिपूर्वं विबोध[१]

कर्मेन्द्रियागोचरोऽदृश्यो ज्ञानेन्द्रियागोचरो नापि मनोगोचरः, 'अप्राप्य मनसा सह' इति श्रुतेः। एतेनानुमानादिगोचरत्वमपि निरस्तं, उक्तलक्षणात्मस्वरूपव्याप्तलिङ्गादिसम्बन्धानिरूपणादतो निरतिशयमस्य सौक्ष्म्यं सिद्धमित्यर्थः। यदि सर्वप्रमाणागोचरः कथमस्य सद्भावस्तत्राह "पुरुषसंज्ञः" इति। पूर्षु शेते इति वा पूर्णमनेन सर्वमिति वा पूर्वमेवास्ते इति वा पुरुषः, अतः पुरुष-संज्ञया प्रसिद्धः स्वतःसिद्धसद्भाव इत्यर्थः। तथा च श्रुतयः—

'स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैतेन किञ्चनानावृतं नैतेन किञ्चनासंवृतं' इति।

'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं' इति।

'पूर्वमेवाहमिहासमिति तत् पुरुषस्य पुरुषत्वं' इति च। स एवंविध आत्माऽसङ्गस्वभावोऽप्यबुद्धिपूर्वमसङ्कल्पितमेवेहैव देहादि-सङ्घात एव आवर्त्तते आसमन्तादापादतलमस्तकमहमित्यभिमन्य-मानो वर्त्ततेंऽशेन एकदेशेन संघाताविविक्तस्तदनुगतः स्वचैतन्या-भासोंऽश इत्युच्यते न पुनर्निरवयवस्य विभोरात्मनः स्वाभाविकों-ऽश एकदेशलक्षणः, सम्भवति अतस्तेनांशेनैवेहावर्त्तते, इतिशब्दः प्रकारवचनः, ईदृशो वर्तत इत्यर्थः। स्वमायावेशवशाच्चित्सदा-नन्दानन्तब्रह्मरूपतां स्वाभाविकीं विस्मृत्याहं मनुष्य इत्याद्यतद्रूप-मेवात्मानमकस्मात् मन्यत इत्यस्मिन्नर्थे दृष्टान्तमाह "सुप्तस्येव"

---

(१) विबोधाः इति पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमिति। अथ यो ह खलु वावैतस्य सोंऽशोऽयं

इति। इवशब्दो यथाशब्दार्थः। यथा 'सुप्तस्य' सुप्तस्य सुषुप्तिमुपगतस्य

'सता सौम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति'

इति श्रुत्यन्तरे ब्रह्मसम्पत्तिर्हि सुषुप्तावात्मनोऽधिगता, तथा सुप्तस्य यथाऽबुद्धिपूर्वकमकस्माद्विबोधो विषयविशेषदर्शनावस्थापत्तिरेवमिहावर्त्तनमस्येति। इति स्थितिरित्यर्थः। उक्तं निमित्तविशेषमनूद्य प्रश्नस्योत्तरमाह "अथ यो ह खलु ० वैषोऽप्यस्य" इति। अथ एवं स्थिते सति यो ह खलु वाव य एव एतस्यात्मनो यथा व्याख्यातोंऽशः सोऽयं विश्वाख्य इति सम्बन्धः। कोऽसौ यश्चेतामात्रः चेतनामात्रश्चित्स्वभाव इति यावत्। प्रतिपुरुषः प्रतिबिम्ब आदर्श इव मुखमप्पात्र इव सूर्यादिरन्तःकरणादौ प्रतिफलितः, अत एव क्षेत्रज्ञः क्षेत्रं शरीरं तदहमस्मीति जानातीति क्षेत्रज्ञः। तथाचोक्तं भगवता—

'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' इति।

(गीता० अ० १३)

तस्य क्षेत्रज्ञत्वे लिङ्गमाह सङ्कल्पेति। सामान्यत इदमिति विषयस्वरूपमात्रकल्पनं सङ्कल्पः। अध्यवसायस्तत्र निश्चयरूपा वृत्तिः। अभिमानोऽहं ममेदमिति स्वस्वामिभावोल्लेखः। तथा च सङ्कल्पाध्यवसायाभिमानैर्देहविषयैरस्त्यस्मिन् क्षेत्रज्ञोऽन्य इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यश्चैतामात्रः प्रतिपुरुषः क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वाख्यश्चेतनेनेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता वैषोऽप्यस्येति । ते होचुर्भगवन् यद्यनेनेदृशेनानिष्टेनैतद्विधमिदं चेतनवत् प्रतिष्ठापितं प्रचोदयिता वैषोऽस्य कथमिति तान् होवाचेति ॥ ५ ॥

प्रजापतिर्वा एकोऽग्रेऽतिष्ठत् स नारमतैकः सो

गम्यते इत्यर्थः । एवम्भूतो यः समष्टिदेहं विराडाख्यमभिमन्यते स प्रजापतिर्ब्रह्मा वैश्वानर इति चाख्यायते वेदान्तेषु । यः पुनः स एव व्यष्टिशरीरमण्डजादिचतुर्विधमभिमन्यते स विश्व इत्याख्यायते । तेनैवंविधेन चेतनेन स्वानुप्रवेशमात्रेणेदं शरीरं चेतनायुक्तमिव प्रतिष्ठापितं प्रचोदयिता वाप्यन्तर्यामिरूपेणैष एवास्येति सर्वमुक्तमित्यर्थः । नन्वसङ्गस्यात्मनः कूटस्थस्य कथं शरीरसम्बन्धनिबन्धनं चेत्रज्ञत्वं कथं वास्य शरीरे चेतयितृत्वेन प्रेरयितृत्वेन चावस्थितिरिति विस्मयमापन्ना इव पुनः पृच्छन्ति "ते होचुर्भगवन् ० होवाचेति" इति । व्याख्यातार्थोऽयं ग्रन्थः ॥ ५ ॥

नात्र विस्मयः कार्यो यतः स्वयमेव स्वमायाशक्तिमधिष्ठाय निर्माय चराचरं तत्रानुप्रविष्ट इति सर्वोपनिषत्सूद्घुष्यमाणत्वादित्यभिप्रेत्य सर्वशाखाप्रत्ययन्यायेन देहसृष्टिप्रकारं तावदाह "प्रजापतिर्वा ० असृजत" इति । प्रजापतिर्हिरण्यगर्भः, वैशब्दस्तस्य शाखान्तरोक्तविशेषस्मारकः । तथा हि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्मानमभिध्यात्वा बह्वीः प्रजा असृजत । ता अश्मेवा-

'सदेव सोम्येदमग्र आसीत्' 'तद्धेदं तर्ह्यव्याकृतमासीत्' 'आत्मा वा इदमेक एवाग्र आसीत्'

इत्यादिश्रुतिषु जगतः प्रागवस्थां सदात्मादिशब्दनिर्दिष्टपरमात्माभेदेनाम्नाय ततो नामरूपाभ्यां भूतसूक्ष्मक्रमेण जगद्व्याकरणं श्रूयते—

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' 'तत्तेजोऽसृजत' 'तन्नामरूपाभ्यामेव व्याक्रियत' इत्यादि ।

तथा चाकाशादिक्रमेण तन्मात्राणि भूतसूक्ष्माणि सृष्ट्वा तेभ्यश्च तदवस्थेभ्यः प्राणान्तःकरणकर्मज्ञानेन्द्रियप्रकारं लिङ्गमुत्पाद्य तदनुप्रविश्य हिरण्यगर्भसञ्ज्ञां प्राप्य जीवरूपतामापन्नोऽनन्तरं स्वोपाधिभूतभूतसूक्ष्माण्यपञ्चीकृतानि पञ्चीकृतानि सम्पाद्य तेभ्यो ब्रह्माण्डान्तं समष्टिव्यष्टिरूपं जगत् सृष्ट्वा तेष्वनुप्रविश्य पश्यञ्छृण्वन् मन्वानो विहरन्नचेतनं चेतयमानः सुकृतदुष्कृतकर्माचरन् तत्फले सुखदुःखे भुञ्जानः प्रेर्यप्रेरकभावमापद्यमानः क्षेत्रज्ञः संसारी विज्ञानात्मा पुरुष इति च तत्र तत्र व्यपदिश्यते । एवं शाखान्तरोक्तविशेषं वैशब्देन स्मारयित्वा शरीरसृष्टिं प्राजापत्यां प्राह, प्रजापतिर्वै मच्छब्दवाच्यादज्ञानशबलात् प्रथममुत्पन्नः, एको ऽसहायः, अग्रे चराचरसृष्टेः पूर्वमतिष्ठत् आसीत्, तथा च श्रुत्यन्तरं—

'आत्मैवेदमग्र आसीत् पुरुषविधः' इति ।

स एको ऽसहायत्वान्नारमत रमणं प्रीतिविशेषं न प्राप ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रबुद्धा अप्राणाः स्थाणुरिव तिष्ठमाना अपश्यत् । स नारमत सोऽमन्यतैतासां प्रतिबोधनायाभ्यन्तरं विवि-

---

सोऽत्मानं स प्रजापतिरात्मानं स्वमेवाभिध्यात्वाऽहं बहु स्यां प्रजायेयेत्याभिमुख्येनालोच्य बह्वीर्नानाप्रजाः देवतिर्यङ्मनुष्यलक्षणा असृजत सृष्टवान् सङ्कल्पमात्रेणैवानेकरूपोऽभवदित्यर्थः । एवं सृष्टिमुक्त्वा सृष्टेषु कार्येष्वनुप्रवेशप्रसङ्गमाह "ता अश्मेव ० अपश्यत्" इति । एवं सृष्टाः ताः प्रजा अपश्यत् दृष्टवान्, कीदृशीः अश्मेव पाषाणवदचेतनाः, अप्रबुद्धाः बुद्धिरहिताः अन्तःकरणशून्या इति यावत् । अप्राणाः प्राणवर्जिताः, अत एव स्थाणुरिव काष्ठमिव तिष्ठमाना अवतिष्ठमाना इति । एतेन सङ्घातचेतनतावादशङ्का परिहृता । ततः किं कृतवानिति तदाह "स नारमत ० विविशामि" इति । स प्रजापतिरेवं-विधाः स्वसृष्टाः प्रजा दृष्ट्वा पुनरपि नारमत नाप्रीयत, तदा सोऽरमणनिवृत्त्यर्थममन्यत विचारितवान् । किं एतासां प्रतिबोधनाय प्रबुद्धतामापादयितुं चेतनतामापादयितुमभ्यन्तर-मभितोऽन्तरं सर्वं देहमापादतलमस्तकं विविशामि विशेषेण विशामि प्रवेक्ष्यामीत्यमन्यतेत्यर्थः । अत्र ह्यात्माऽग्निरिवायः-पिण्डादिसमारूढो विशेषतः परिस्फुरति नान्यत्रेति देहेषु प्रवेश उच्यते न पुनस्तत्रैव गृहं कृत्वा ततोऽन्यः संस्तत्र प्रविष्टः किन्तु स्वात्मानमेव प्रसिद्धमायाविवद्बहुधा व्यूह्य तत्तद्देहाद्यभेदेन विशेषतो द्रष्टृश्रोतृमन्तृविज्ञात्रादिभावेन विभाव्यत इति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शामि। स वायुरिवात्मानं कृत्वाभ्यन्तरं प्राविशत्। स एको नाशकत् स पञ्चधात्मानं विभज्योच्यते। यः प्राणोऽपानः समान उदानो व्यान इति। अथायं य ऊर्ध्वमुत्क्रामत्येष वाव स प्राणोऽथ योऽयमवाङ् सङ्क्रा-

---

प्रवेशप्रकारमाह "स वायुः ॰ प्राविशत्" इति। स प्रजापतिरीश्वरः आत्मानं स्वरूपं वायुरिव कृत्वा वायुः प्राणः प्राणवायुमुपाधिं कुर्वंस्तद्भावमापन्नो वायुरिवेत्युच्यते इत्थमभ्यन्तरं प्राविशदित्यर्थः। तथा च श्रुत्यन्तरे

'तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं'

इति प्राणरूपं ब्रह्मोपक्रम्याम्नायते। एवमपि भस्त्रेव वायुना पूर्णा न व्यचेष्टत, यदा शरीरं जातं तदा किं कृतवानीश्वरस्तदाह "स एकः ॰ उच्यते" इति। एकरूपः सन् नाशकत्, देहं विचालयितुं नाशक्नोत्, स पुनरात्मानं पञ्चधा विभज्य क्रमाक्रमाभ्यां क्रियाभेदं कुर्वन् देहादिकं चालयन्नास्ते इति प्राणादिशब्दैः स एवोच्यत इत्यर्थः। के ते प्राणादयो विभागाः किंलक्षणाः किंकर्माणश्चेत्यपेक्षायामाह "यः प्राणः ॰ व्यान इति" इति। इत्येते पञ्च निर्दिष्टाः। अथैषां लक्षणं क्रियाश्च दर्शयति "अथायं ॰ उदानः"। अथैषां मध्ये योऽयं वायुरूर्द्ध्वमुत्क्रामति नाभेरूर्द्ध्वं शिरःपर्यन्तमुच्चैः क्रामति सञ्चरति मुखनासिकयोरुपलभ्यमान एष वाव सः एष एव प्राणः प्राणसञ्ज्ञो वायुभेद

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मत्येष वाव सोऽपानोऽथ येन वा एता अनुगृहीता इत्येष वाव स व्यानोऽथ योऽयं स्थविष्ठो धातुरन्नस्यापाने प्रापयत्यणिष्ठो वाङ्गेऽङ्गे समानयत्येष वाव स समानसंज्ञा

इत्यर्थः। एवंविधक्रियावत्त्वमेवास्य लक्षणमुक्तं वेदितव्यम्। एवमुत्तरत्रापि योजना। अथ योऽयं वायुविशेषोऽवाङ्नाभेरधः पायुपर्यन्तं सङ्क्रामति सञ्चरत्येष वाव सोऽपान इति पूर्ववद्योजना। उद्देशक्रमं परित्यज्य मध्ये व्यानं लक्षयति तस्य प्राणापानसन्धित्वेन तयोरन्तरा नियतत्वात्। तथा च श्रुत्यन्तरं—

'अथ यः प्राणापानयोः सन्धिः स व्यानः' इति।

चरमतोऽस्योद्देशस्तु सर्वशरीरचेष्टादिहेतुत्वेन सर्वप्राणव्यापकत्वादिति द्रष्टव्यम्। अथ येन वायुविशेषेण एता एतौ प्राणापानौ अनुगृहीता अनुगृहीतौ इत्येवं वर्तमान एष वाव स व्यानसञ्ज्ञः।

'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः'

इत्यादिश्रुत्यन्तरप्रसिद्धिमादायाशितस्य जाठराग्निपक्वस्य स्थूलसूक्ष्मविभागविनियोजनकर्ता समान इति व्युत्पादयति। अथ योऽयं प्रसिद्धो वायुविशेषोऽन्नस्य भुक्तस्य स्थविष्ठः स्थूलतमो धातुरसारभागः पुरीषाख्यो योऽस्ति तमपाने प्रापयति अपानवायुसञ्चारस्थानं गमयति, तथाऽन्नस्य यो वास्यणिष्ठोऽणुतरो मध्यमश्चेतिभागद्वयमेकीकृत्योच्यते, तं च देहमनःस्थितिहेतुमङ्गेऽङ्गे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्तरं व्यानस्य रूपं चैतेषामन्तरा प्रसूतिरेवोदानस्याथ योऽयं पीताशितमुद्गिरति निगिरतीति वैष

प्रत्यङ्गं शरीरस्य समानयति सम्यग् आसमन्तान्नयति प्रापयत्येष वाव स समानसञ्ज्ञा समानसञ्ज्ञ इत्यर्थः। समानव्यानयोर्मध्ये उदानस्योद्देशे कारणं सूचयन्नुदानस्याभिव्यक्तिस्थानमाह उत्तरमिति। एतेषां प्राणापानसमानानामुत्तरमुपरि एतेषां सम्यग्व्यापारानन्तरं व्यानस्य रूपञ्च व्यानव्यापारञ्चान्तरा मध्ये, प्रसूतिः प्रसवोऽभिव्यक्तिरेवोदानस्य अन्तरेवेत्येवकारोऽभिन्नक्रमः। उक्त एव चान्वयः। अयमर्थः प्राणापानाभ्यामुच्छ्वासनिश्वासाभ्यां धम्यमानो हि जाठरोऽग्निरन्नं भुक्तं पचति तत् पाकनिर्वृत्तञ्च समानो विभज्य समं नयति। एवमशितपीतयोः समं नीतयोः सतोः क्षुदुत्पद्यते पिपासा च, तदोदान उद्भूतवृत्तिरास्यगतं यत्किञ्चिन्निगिरति पित्तोद्रेकवशादोद्गिरति हृदयादिगतं कफादिकं ततो देहे बलपुष्ट्याद्याधानं व्यानवायोः कृतं भवति। एवमुक्तप्रकारेण पूर्वेषां चतुर्णां वायुव्यापाराणां यथावदनिवृत्तौ व्यानस्य सञ्चारसौष्ठवाभावाद्देहे बलपुष्ट्यादयो न जायन्ते इत्येतदनुभवसिद्धं शास्त्रसिद्धञ्च, अतो युक्तोऽयं क्रमनिर्देश इति। अथ योऽयं पीताशितं पीतञ्चाशितञ्च पीताशितं तदुद्गिरति ऊर्द्ध्वं निःसारयति, निगिरति वा नीचैर्गिरति तीरोदधातीति वा एष वाव स उदान इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाव स उदानः । अथोपांशुरन्तर्याममभिभवत्यन्तर्याम उपांशुञ्चैतयोरन्तरा देवौष्ण्यं प्रासुवत् यदौष्ण्यं स पुरुषोऽथ यः पुरुषः सोऽग्निर्वैश्वानरः । अन्यच्चाप्युक्त-

---

पूर्ववत् । एवमात्मनः प्राणोपाधिकस्य शरीरप्रवेशमुक्त्वा तद्व्यापारेण व्याप्रियमाणः शरीरं नियमयतीत्युक्तमिदानीं जाठराग्न्युपाधिकस्य शरीरे चेतयितृत्वं दर्शयितुं तदभिव्यक्तिं तावदाह "अथोपांशुः ० वैश्वानरः" इति । अथैतदुच्यते इति, अथशब्दोऽर्थान्तरोप-क्रमार्थः । अस्ति कर्मकाण्डे उपांशुग्रहोऽन्तर्यामग्रहश्चेति द्वौ ग्रहौ परस्परोपकार्योपकारकभावेन संसृष्टावित्याम्नातम् । यतः श्रूयते—

'प्राणापानौ वा उपांश्वन्तर्यामौ व्यान उपांशुसवनो यदेते पात्रे एतं ग्रावाणमातृतीयसवनान्न जहीतः' इति ।

तथान्यत्रापि—

'अग्निर्देवता गायत्री छन्द उपांशोः पात्रमसि, सोमो देवता त्रिष्टुप्छन्दोऽन्तर्यामस्य पात्रमसि, इति

मन्त्रयोरनयोरग्नीषोमदेवताऽधिगम्यते, तौ च प्राणापाना-त्मकत्वेनाध्यात्मशास्त्रे प्रसिद्धौ, अत इहोपांश्वन्तर्यामशब्दाभ्यां प्राणापानौ गृह्येते । तथा चायमर्थः । यथोपांशुग्रहोऽन्तर्याम-मभिलक्ष्य भवति अन्तर्यामग्रहश्चोपांशुं तयोश्चान्तरा सोमः सूयते तथात्रापि शरीरे प्राणोऽपानमभिभवति अपानश्च प्राणमित्यन्यो-न्याभिकाङ्क्षया प्रवर्तमानयोरुपांश्वन्तर्यामोपमितयोश्चैतयोः प्राणा-पानयोरन्तराऽन्तराले देवो द्योतनस्वभावश्चैतन्यात्मा औष्ण्यं उष्ण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति ।

स्वभावमात्मानं प्रासुवत् प्रसूतवान् उष्णरूपेणाभिव्यक्त इत्यर्थः । देवौष्ण्यमिति सन्धिश्छान्दसः । यद्वा एतयोरन्तरं मध्यं मूलाधारदेशस्तस्मात् प्राणापानाभ्यां पार्श्वगताभ्यां धम्यमानादेव न स्थानान्तरादिति यावत् । औष्ण्यं प्रासुवदिति पूर्ववत् । यदिदमौष्ण्यं स पुरुषो जीवो देहस्याग्निरूपेण धारयिता, ऊष्मरूपात्मावस्थाने हि जीवतीति प्रसिद्धिः, तदपगमे च मरणप्रसिद्धिः । तथा च श्रुत्यन्तरम्—

'उष्णो जीविष्यन् शीतोमरिष्यन्' इति ।

अथैवं सति यः पुरुष आत्मा सोऽग्निरग्रं नयतीत्यग्रणीरग्निरुच्यते । अयं हि सर्वधातुजातं पचन्नग्रं नयति अतोऽग्निः । वैश्वानर इति चायमुच्यते विश्वं सर्वं नरशब्दोपलक्षितं देहादिकं नयत्युत्तमभय तीति विश्वानरो विश्वानर एव वैश्वानर इति । एतदेव पुरुषाग्न्योरेकत्वमिहोक्तं सिद्धवत्कृत्य शाखान्तरे जाठरस्याग्नेरुपासनमुक्तं तदिह प्रसङ्गादुपदिशति—

"अन्यत्राप्युक्तं ० शृणोति" इति ।

अन्यत्र बृहदारण्यकेऽपीत्यर्थः । अयमग्निर्वैश्वानरः पुरुषाख्यो योऽयं प्रसिद्धोऽन्तःपुरुषे पुरुषः शरीरं शरीरमध्ये । तत्सद्भावे कार्यलिङ्गकं प्रमाणमाह, येन पुरुषान्तःस्थेनेदं वक्ष्यमाणमन्नं पच्यते पानस्याप्युपलक्षणं मेतत् । किं तदन्नं तदाह यदिदमद्यतेऽविशेषेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स वा एष पञ्चधात्मानं विभज्य निहितो गुहायाम्। मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प

सर्वैः प्राणिभिर्यदिदमोदनाद्यद्यते यद्वा पीयते तदन्नं पानञ्चेदं येन पच्यते परिपाकं नीयतेऽयमग्निर्वैश्वानर इत्यन्वयः। तत्सद्भावेऽनुमानमुक्त्वा प्रत्यक्षमप्याह तस्येति, तस्याग्नेरेष प्रसिद्धो घोषः शब्दो भवति। कोऽसौ यं घोषं, एतदिति क्रियाविशेषणं एवं श्रवणं यथा स्यात् तथेत्येतत्, कर्णावपिधायाच्छाद्य शृणोति सर्वो लोकः. एवमेष घोषोपलम्भो जाठराग्नौ प्रत्यक्षमित्यर्थः, 'तस्यैषा श्रुतिर्यत्रैतत् कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोति' (छान्दो० अ० ३ ख१ ३) इति छान्दोग्ये तस्याग्नेरेवैतच्छ्रवणमिति भाष्यकारैर्व्याख्यातत्वात्। जाठराग्नेर्वैश्वानरात्मनो घोषरूपेण श्रवणनिर्देशप्रसङ्गेनेदमपरमुच्यते पुरुषाणां पारलौकिकहितसाधनप्रवृत्तौ सावधानत्वाय, स पुरुषो घोषश्रवणवान् यदा यस्मिन् काले उत्क्रमिष्यन् मरिष्यन् भवति तदा एनं घोषं न शृणोति, तदश्रवणे आसन्नमरणतां ज्ञात्वा यत् करणीयं मन्येत तत् कुर्यादित्यभिप्रायः। एवं प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुवर्त्तयितुमुक्तार्थमनुवदति "स वा ० गुहायां" इति। स वै एष यो वैश्वानरः पुरुष इति चोक्तः प्राणाद्यात्मना पञ्चधाऽऽत्मानं विभज्य गुहायां, गूहति संवृणोति ज्ञानानन्दाद्यतिशयमिति गुहा बुद्धिः, तस्यां निहितः स्वयमेव स्वात्मना निषक्त इत्यर्थः। विशेषव्यवहारायान्तःकरणोपाधिं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आकाशात्मेति। स वा एषोऽस्माद्धृदन्तरादकृतार्थोऽमन्यतार्थानश्नानीति। अतः खानीमानि भित्त्वो-

प्राप्त इति तात्पर्यार्थः। तदेवमौष्ण्येन स्वरूपेण प्राणान्तःकरणभावमापन्नो विज्ञानात्मा यां यामवस्थामनुभवति तां तां क्रमेण वक्तुमारभमाणो बुद्धितत्स्थाभासाविवेकात् प्राप्तान् व्यपदेशभेदांस्तावदाह "मनोमयः ० आकाशात्मेति" इति। मनोमयो मनःप्रायो मनोवृत्तिभेदेष्वशेषेषु विशेषत उपलभ्यमानत्वात्। प्राणः शरीरमस्येति प्राणशरीरः प्राणभेदैरेव व्याप्रियमाणत्वात्, अन्यथा चिन्मात्रस्य कूटस्थस्य स्वतो विशेषभान(१) व्यापारयोरनुपपत्तेः। भाः चित्प्रकाशो रूपं स्वरूपमस्येति भारूपः। सत्याः सङ्कल्पा अवश्यम्भाविनः पूर्वकृतज्ञानकर्मसंस्कारभाविताः सङ्कल्पा अस्येति सत्यसङ्कल्पः। आकाशवदसङ्गोऽग्राह्य आत्मा स्वरूपमस्येत्याकाशात्मा। एवमुपाधिधर्मैः स्वधर्मैश्चाविविक्त आत्मा जीवभावमुपगत इत्यर्थः। तच्चोक्तं श्वेताश्वतरोपनिषदि 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोप्यवरोपि दृष्टः' इति। य एवमविद्याकृतोपाधिमात्मत्वेनोपगतो विस्मृतपरमानन्दनिजस्वभावः सोऽकृतकृत्यमात्मानं मेने इति तद्वृत्तान्तमाह "स वा ० अश्नानीति" इति। स वा एष पूर्वोक्तोऽकृतार्थोऽकृतप्रयोजनः सन्नस्मादेतच्छरीरगताद्धृदन्तरात्

(१) विशेषमात्रा० इति सो० पु० पाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दितः पञ्चभी रश्मिभिर्विषयानत्ति। इति बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः कर्मेन्द्रियाण्यस्य हया रथः शरीरं मनो नियन्ता प्रकृतिमयोऽस्य प्रतोदोऽनेन खल्वीरितः परिभ्रमतीदं शरीरं चक्रमिव

हृदयस्थानस्थादन्तःकरणाद्धेतुभूतात् अर्थान् विषयानश्नाति भुङ्क्ते व्याप्नवानीति वाऽमन्यत सङ्कल्पितवानित्यर्थः। ततः किं वृत्तं तदाह "अतः ० विषयानत्ति" इति। यत एवमतः इमानि प्रसिद्धानि शीर्षण्यानि खानि छिद्राणि त्वचञ्च भित्त्वा विदार्योदित उद्गतो गवाक्षेभ्य इवालोकः प्राणान्तःकरणोपाधिः सन् वक्ष्यमाणैः पञ्चभी रश्मिभिर्विषयान् शब्दस्पर्शादीन् अत्ति भुङ्क्ते व्याप्नोतीत्यर्थः। इदानीमस्य लोकसिद्धं विषयानुभवप्रकारमनुवदन् शरीरादे रथादिकल्पनां विदधानोऽस्य विषयमोक्षप्राप्तिमार्गयोः स्वातन्त्र्यं दर्शयति "इति बुद्धीन्द्रियाणि ० वैषोऽप्यस्येति" इति। इत्येवं विषयान् भुञ्जानस्य यानीमानि प्रसिद्धानि बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि तान्यस्य रथिनो हयरश्मयः प्रग्रहाः, कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यान्यस्य हयाः रथवाहाः, शरीरमिदं स्थूलमेव रथः, मनः सङ्कल्पाद्यात्मकं नियन्ता नितरां यन्ता सारथिरित्यर्थः, प्रकृतिः स्वभावः कर्मज्ञानवासना तन्मयस्तद्रूपोऽस्य प्रतोदः कशादिर्वाहननोदनसाधनम्। कथमयं प्रतोद

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृताच्चे[1] नेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता वैषोऽप्यस्येति ॥

स वा एष आत्मेहोशन्ति कवयः सितासितैः

इति तदुपपादयति अनेनेति, अनेन प्रकृतिमयेन खलु निश्चितमीरितः प्रेरितः परिभ्रमति। किमिदं शरीरं रथः। तत्र दृष्टान्तमाह चक्रमिवेति, मृत्पचः कुलालः तेनेरितं चक्रमिवेत्यर्थः। इदं शरीरमित्याद्युक्तार्थम् ॥ ६ ॥

यदिदं स्वसृष्टदेहाद्यनुप्रवेशेनास्य संसारित्वमुक्तं तन्नायं स्वतः संसारधर्मवान् किन्तूपाधिवशात् तथा भाति, तत उपाधेर्विविच्य तत्स्वरूपमन्वेषणीयमात्मनः संसारित्वभ्रमनिवृत्तय इति दर्शयितुमुक्तं ज्ञेयस्वरूपानवगमे तद्धानासम्भवादित्यभिप्रेत्य अयमेवात्मा मुञ्जादिषीकावद्देहादिसङ्घातादिविच्यावधारणीय इत्याह "स वा ० इत्यवस्थिता इति" इति। यमित्यध्याहारः, यमुशन्ति कमनीयतया जानन्ति कवयो मेधाविनः परमप्रेमास्पदतया प्रत्यग्रूपेण जानन्ति स वै स एवैष आत्मा न तु संसार्येवेत्यर्थः। ननु संसारितायाः अस्योक्तत्वात् कथं न संसारीति तत्राह सितासितैरिति। सितशब्देनोज्ज्वलत्वचा विना स्पृहणीयतोच्यते, असितशब्देन मलिनवाचिना प्रतिकूलवेदनीयतोच्यते, तथा च सितासितैः सुखदुःखैः कर्मफलै-

(१) मृत्यवेनेति सो० पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्मफलैरनभिभूत इव प्रति शरीरेषु चरत्यव्यक्त-
त्वात् सौक्ष्म्याददृश्यत्वादग्राह्यत्वान्निर्ममत्वाच्चानवस्थो-

-रनभिभूतोऽसंस्पृष्टः। इवशब्दोऽवधारणार्थः। प्रतिशब्दो व्यवहितक्रियया सम्बध्यते। कर्मफलैरनभिभूत एव शरीरेषु प्रतिचरतीत्यन्वयः। प्रतिशरीरेषु सर्वेषु शरीरेष्विति वा। यद्वा प्रति प्रातिलोम्येनाविषयत्वेन शरीरेषु चरतीत्यर्थः। अतो नायं स्वरूपतः संसारी किन्त्वलक्तकादिसन्निहितो लोहितात्मनेव स्फटिकः सङ्घातोपाधिसन्निहितः संसार्यात्मना भासत इति भावः। उक्तेऽर्थे हेतुमाह, अव्यक्तत्वादित्यादिना। व्यक्तं विषयरूपं दृश्यं देहाद्यज्ञानपर्यन्तं तद्विपरीतत्वमव्यक्तत्वं तस्मात्। न हि संसार्य्यव्यक्तो भवति व्यक्तविकारानुबन्धित्वात् तस्य। अतोऽव्यक्तत्वान्न संसारीत्यर्थः। कुतोऽव्यक्तत्वं चिदात्मनोऽहमिति व्यक्ततयोपलभ्यमानत्वादित्यत आह सौक्ष्म्यादिति। अनाधेयातिशयत्वं सौक्ष्म्यमुच्यते, न हि चैतन्यस्वरूपेऽमूर्त्तेऽनवयवे कश्चिदतिशय आधीयते आकाश इव कारकैः। यत्र पुनः कारकव्यापारापन्नोऽतिशयस्तद्व्यक्तमितिप्रसिद्धं यथा घटादि निष्पाद्यं प्रकाश्यं चेति, तस्मादस्य तद्वैलक्षण्यात् सौक्ष्म्यादव्यक्तत्वमितिभावः। तदेवोक्तलक्षणं सौक्ष्म्यं साधयति अदृश्यत्वादग्राह्यत्वाच्चेति। ज्ञानकर्मेन्द्रियाविषयत्वादित्यर्थः। चतुर्विधक्रियाफलविलक्षणत्वादिति भावः। हेत्वन्तरमाह निर्ममत्वाच्चेति। चकारान्निरहङ्कारत्वमपि समुच्चीयते। यत्राहन्ता भवति तत्संसृष्टे ममता भवति, अस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽसति कर्त्ताऽकर्तैवावस्थः स वा एष शुद्धः स्थिरोऽचलश्चालेप्योऽव्यग्रो निस्पृहः प्रेक्षकवदवस्थितः स्वस्थश्च।

तु सुखाद्युपलब्ध्यायतने शरीरेऽनुगतस्यापि तत्राहङ्कारममत्वयोरभावान्न संसारितेत्यर्थः। मन्ववस्थात्रयसम्बन्धिनः कथमहङ्कारममकारयोरभावस्तत्राह अनवस्थ इति। अवस्थात्रयरहितोऽवस्थासाक्षित्वात्, न हि दृश्यधर्मो द्रष्टर्युपरज्यत इत्यर्थः। अथवा ननु शरीरेषु चरतः कथं तत्राहम्ममताऽभावः इति तत्राहाऽनवस्थ इति। न विद्यतेऽवस्थाऽवस्थानं यस्य सोऽनवस्थः। निरवयवस्यामूर्त्तादिलक्षणस्याव्याःवृत्ताननुगतस्य न क्वाप्यवस्थितिरुपपद्यत इति भावः। ननु धर्माधर्माभ्यां शरीरादिकर्त्तुः कथमित्थमसंसारित्वं वर्ण्यत इत्यत आह असतीति। अव्याकृतशब्दितमज्ञानमसदित्युच्यते। अकर्तैवासत्यवस्थोऽवस्थितः कर्तेत्यन्वयः, वस्तुतोऽकर्तैव सन्नज्ञानावेशात् कर्तेवावभासत इत्यर्थः। एवमध्यारोपापवादाभ्यां विचार्य निर्णीतमात्मनः स्वरूपं व्यपदिशति स वा इत्यादिना। सवितरि दिवान्धपरिकल्पितान्धकारवदज्ञानस्यापि वस्तुत्वाभावादयमात्मा शुद्धो मिथ्याज्ञानाद्यशुद्धिसंसर्गरहितः सर्वस्यागमापायसाक्षित्वात् स्थिरः आगमापायशून्यः व्यापकत्वादचलः स्वतः क्रियाशून्यः चकारादनन्यप्रेर्योऽपीत्यर्थः। अतएवालेप्यो धर्माधर्मतत्फललेपानर्हः। न ह्यक्रियोऽकर्त्ता कर्मतत्फलभाग्भवतीत्यर्थः। अव्यग्रोऽसम्भ्रमो यतो निस्पृहः परिपूर्णपरमानन्दरूपत्वात्, स्पृहणीयाभावात् स्पृहाभावे सत्यव्यग्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋतभुक् गुणमयेन पटेनात्मानमन्तर्धायावस्थिता इत्यवस्थिता इति ॥ ७ ॥

इति मैत्र्युपनिषदि द्वितीयः प्रपाठकः ॥

इत्यर्थः । अतएव प्रेक्षकवदुदासीन इवावस्थितः । कुत्रावस्थित इति तदाह स्वस्थः स्वे स्वरूपेऽवस्थितो नान्याधार इत्यर्थः । 'स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदं सर्वं, (छान्दो० अ० ७) इति श्रुत्यन्तरात् । चकारः सर्वविशेषणसमुच्चयार्थः । उपसंहरति ऋत-भुगिति । एवंविध एवात्मा गुणमयेन पटेन त्रिगुणाविद्या-मयेनावरणेनात्मानं नित्यशुद्धत्वादिरूपमन्तर्धाय ऋतभुगवस्थित इत्यन्वयः । कर्मफलभोक्ता संसारीव भासमानो वर्तत इत्यर्थः । इतिशब्दः प्रतिवचनसमाप्तिद्योतनार्थः । अभ्यासो-ऽध्यायसमाप्त्यर्थः ॥ ७ ॥

इति श्रीरामतीर्थविरचितायां मैत्रीशाखोपनिषद्दीपिकायां द्वितीयः प्रपाठकः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ते होचुर्भगवन् यद्येवमस्यात्मनो महिमानं सूचयसीत्यन्यो वा परःकोऽयमात्माख्यो योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यता इत्यवा-(१)च्योर्द्ध्वा वा गतिर्द्वन्द्वैरभिभूयमानः परिभ्रमति॥ १॥

अथ तृतीयः प्रपाठकः।

नित्यशुद्ध एवात्मा त्रिगुणोपाधिप्रविष्ट ऋतभुक् संसारीत्युक्तमुपश्रुत्यैतदसंभावयन्तो वालखिल्याः पप्रच्छुरित्याह। ते होचु ० परिभ्रमति" इति। ते वालखिल्याः ह किल ऊचुः, किं, हे भगवन्! यद्येवमस्यात्मनो महिमानं त्वं सूचयसि नित्यशुद्ध इत्यादिकं तर्ह्येवंविधस्य ऋतभुक्तासम्भवादन्यो वास्मात् परो विलक्षणः वाशब्दः सम्भावनायाम्। तमेव प्रश्नपूर्वकं विशदयति, कोयमात्माख्य इति। जीवाख्य इत्यर्थः। योऽयं प्रसिद्धोऽहमस्मीति सितादिकर्मफलैरभिभूयमानः लिप्यमानः, सद्योनिर्ब्राह्मणादियोनिः असद्योनिः श्वशूकरादियोनिः तामापद्यते आत्मत्वेनाभिपद्यते इत्येवंप्रकारेणावांच्या अवाची ऊर्द्ध्वा वा तत्तज्जन्मकर्मानुरूपा गतिः फलप्राप्तिर्यतोऽतो द्वन्द्वैः शीतोष्णमानापमानसुखदुःखादिभिरभिभूयमानः परिभ्रमतीति प्रसिद्धं शास्त्रानुभवसारिणामित्यर्थः। अतएकस्य(२) विरुद्धधर्मसंसर्गविरोधादन्यो वा कस्मात् संसार्यात्मा न भवेदिति मन्यामह इत्यभिप्रायः॥ १॥

(१) अवाङ्स्योर्द्ध्वेति मूले लिखितं।

(२) अत एव कस्य इति सो॰ पु॰ पा॰।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अस्ति खल्वन्योऽपरो भूतात्माख्यो योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यता इत्यवाङ्च्योर्द्ध्वा वा गतिर्द्वन्द्वैरभिभूयमानः परिभ्रमतीत्यस्यो-

---

यद्येकस्य विरुद्धधर्मसंसर्गविरोधादृतभुगन्यः स्यादिति मन्यध्वे तर्ह्यस्त्वन्य ऋतभुक् संसारी यो द्वन्द्वैरभिभूयते इति तावद् गृह्णीतेत्युत्तरमाह प्रजापतिः "अस्ति ० उपव्याख्यानं" इति । योऽयं सितासितैरित्यादि परिभ्रमतीत्यन्तेनोक्तः स नित्यशुद्ध-त्वादिलक्षणादात्मनोऽपरोऽन्योऽस्ति कोऽसौ भूतात्मा भूताभेदे-नोपलभ्यमान इत्यर्थः । कोऽयं भूतात्मेति तत्राह तस्योप-व्याख्यानं, तस्य भूतात्मनः स्पष्टव्याख्यानं प्रपञ्चनं, शृणुतेति शेषः । "पञ्चतन्मात्रा ० भूतात्मेत्युक्त" इति । शब्दस्पर्शरूप-रसगन्धाः सूक्ष्माः पञ्चतन्मात्राख्याः अव्याकृताख्यादविद्याशबलि-तादात्मनः सकाशात् क्रमेण जाता भूतशब्देनापञ्चीकृतपञ्च-महाभूतशब्देनोच्यन्ते वेदान्तेषु । अथानन्तरमेतान्येव परस्परानु-प्रवेशेन पञ्चीकृतानि गुणगुणिभावेन परिणम्य स्थितानि पञ्चमहाभूतानि भूतशब्देनोच्यन्त इत्यर्थः । अथैवं सति तेषा-मुभयविधभूतानां यत् समुदयं यः समुदायः परिणामविशेष-स्तच्छरीरमित्युक्तं वेदान्तेष्विति योध्यम् । प्राणेन्द्रियान्तः-करणसहितसूक्ष्मभूतसमुदायो लिङ्गशरीरं, पञ्चीकृतपञ्चमहा-भूतसमुदायः स्थूलं शरीरमित्युक्तमिति विभागः । एवं भूत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पव्याख्यानम् । पञ्चतन्मात्रा भूतशब्देनोच्यन्ते अथ पञ्चमहाभूतानि भूतशब्देनोच्यन्तेऽथ तेषां यत् समुदयं तत् शरीरमित्युक्तमथ यो ह खलु वाव शरीर इत्युक्तं स भूतात्मेत्युक्तं । अथामृतोऽस्यात्मा[१] बिन्दुरिव

शब्दार्थं सकार्यमुक्त्वाऽऽत्मशब्दार्थमाहाथेति । अथैवं सम्पन्ने शरीरद्वयात्मना भूतजाते तस्मिञ्छरीरे यो ह खलु वाव य एव ह स्फुटं खलु निश्चये वावाऽहं ममेति रथित्वेन व्यवहर्तेत्युक्तं पूर्वं स भूतात्मेत्युक्तं वेदान्तेष्वित्यर्थः । तथाच वेदान्ताः ['तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः,] इत्यादिना सृष्टिमुक्त्वा ['तत् सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्'] (तैत्ति० उ०) इत्यादिकाः । तथा 'तत्तेजोऽसृजत' इत्यादिना भूतसूक्ष्मसृष्टिं प्रक्रम्य ['सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि'] (छान्दो० उ० अ० ६) इति, तथा ['आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत्सईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजत'] इत्युपक्रम्य शेषे ['स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत'] (ऐत०उ०) इति । एवं तत्र तत्र ['स एष इह प्रविष्ट आनखाग्रेभ्यः'] इत्यादि श्रुतयः सन्ति शतशः, इहापि पुरस्तादेतदुक्तं 'प्रजापतिर्वा एकोऽग्रेऽति-

(१) त्माद्बिन्दुरिव इति मु० सो० पु० पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुष्करा इति स वा एषोऽभिभूतः प्राकृतैर्गुणैरिति । अथोऽभिभूतत्वात् सम्मूढत्वं प्रयातः सम्मूढत्वादात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यद्गुणौघैरुह्यमानः

ष्ठत्' इत्यारभ्य 'स वायुरिवात्मानं कृत्वाभ्यन्तरं प्राविशत्' इति । एतदेव पुनःस्पष्टीकरिष्यते । तथाच चिदात्मैव भूतसङ्घातमनुप्रविष्टो भूताभेदेन गृह्यमाण उपाधिप्रधानत्वाद्भूतात्मेति चिदात्मनो भेदेन व्यपदिश्यते चिदात्मा चोपाधिभ्यो विविच्य वेदान्तेष्वात्मा ब्रह्म चिन्मात्रं प्रज्ञानघन इत्यादिशब्दैर्भूतात्मनो भेदेन व्यपदिश्यते तदेवमस्यस्यैवात्मन औपाधिको भेद इति संसार्यसंसारिभेदव्यवहारोऽनाद्यविद्यानिबन्धन उपपद्यत इति प्रकरणार्थः । इदानीं चिदात्मन एव भूतात्मत्वं चिदात्मस्वभावानुपमर्दनेति व्युत्पादयति "अथाम्रुतोऽस्यात्मा ० गुणैरिति" इति । अथैवमप्यस्य भूतात्मनोऽप्यमृतो ऽविकारः कूटस्थ आत्मा स्वरूपं पुष्करे पद्मपत्रेऽब्बिन्दुरिव नीरबिन्दुरिव तत्संश्लेषरहितोऽपि स वै एष आत्मा प्राकृतैर्गुणैः प्रकृतिविकारैः साभासमायाविकाररूपदेहद्वयलक्षणैरभिमानगृहीतैरभिभूतस्तिरस्कृतस्वभावावभास इत्यर्थः । यत एवं "अथोऽभि ० परिभ्रमति" इति । अथो अतः कारणात् सन्धिः छान्दसः, तदेवाहाभिभूतत्वात् प्राकृतैर्गुणैरेकीभूतत्वात् सम्मूढत्वमत्यन्ताविवेकित्वं प्रयातः प्राप्तवान्, तच्चेदं लिङ्गमुच्यते सम्मूढत्वादेव हेतोर्भगवन्तं नापश्यदिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कलुषीकृतश्चास्थिरश्चञ्चलो लुप्यमानः सस्पृहो व्यग्र श्चाभिमानित्वं प्रयाता इत्यहं सो ममेदमित्येवं मन्यमानो निबध्नात्यात्मनात्मानं जालेनेव खचरः कृत-

---

सम्बन्धः न पश्यतीत्येतत्। स्वतःसिद्धालुप्तज्ञानैश्वर्यादिशक्तिसम्पन्नतयोपलक्षितश्चिदात्मा भगवान् तं न पश्यतीति सम्मूढत्वमस्यावगम्यत इत्यर्थः। तस्य दूरस्थत्वाददर्शनं नास्य सम्मूढत्वादिति शङ्कां वारयत्यात्मस्थमिति। स्वात्मनि सत्तास्फूर्त्तिरूपेण स्थितमित्यर्थः। कथमयं स्वात्मस्थ इत्यत आह प्रभुमिति, प्रकर्षेण भवत्यस्मादिति प्रभुर्भूतात्मन उपादानमधिष्ठानञ्चेत्यर्थः। अतएव कारयितारं नियन्तारं, कारणाधीनं हि कार्यमिति न्यायात्, कारणत्वादेव नियन्तेत्यर्थः। तथाच श्रुत्यन्तरं ['एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते'] (कौषी० अ० ३) इति। किञ्च गुणौघैः प्राकृतिकैर्देहेन्द्रियविषयलक्षणैरुह्यमान इतस्ततश्चाल्यमानः कलुषीकृतश्च नानावासनाकषायरञ्जितश्चेत्यर्थः, अतएव वासनाभिः प्रेर्यमाणतयाऽस्थिरः कथञ्चिदुत्पाद्यमानेऽपि विवेकविज्ञाने स्थैर्यहीनः अतश्चञ्चलः शुभविषयैकप्रवृत्तिनिष्ठारहित इत्यर्थः। किञ्च लुप्यमानश्चाञ्चल्यवशाद्विवेकज्ञानधर्मसञ्चयैर्लुप्यमानोऽत एव सस्पृहोऽप्राप्तेऽशक्यसम्पाद्येऽपि स्पृहावान् अत एव व्यग्रो हीनः सुखभोगक्षणमलभमान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यानुफलैरभिभूयमानः सदसद्योनिमापद्यता इत्यवाञ्च्योर्द्ध्वा वा गतिर्द्वन्द्वैरभिभूयमानः परिभ्रमति। कतम एष इति तान् होवाचेति ॥ २ ॥

अथान्यत्राप्युक्तं यः कर्त्ता सोऽयं वै भूतात्मा करणैः

स्वेति यावत्। सर्वस्यापि विशेषणजातस्य मूलमिदमुच्यते। अभिमानित्वं प्रयात इति। इति शब्द इत्यमर्थे। कथमित्येतदाहाहमिति। अहं मनुष्यः कर्त्ता भोक्ता, स उ इति छेदः, उशब्दोऽप्यर्थे, सोऽपि परोऽप्यस्ति मादृशो मम मित्रं शत्रुरुदासीनो वा, इदमिति देहबाह्यं परिकल्प्य तच्च ममेति शोभनाध्यासपुरःसरमात्मीयतयाभिमन्यते अर्थादशोभनाध्यासान्न ममेति च, एवं मन्यमानोऽभिमन्यमान आत्मना स्वेनैवात्मानं निबध्नाति। बन्धनमात्रे दृष्टान्तमाह जालेनेव खचर इति। पक्षीवेत्यर्थः। अथवा खचरः कोशकारो वृक्षकोटराकाशे चरणात्। स यथात्मनैव कोशं कृत्वा तेनात्मानं निबध्नाति तद्वदित्यर्थः। एवं कुर्वन् कृतस्य कर्मणः शुभाशुभलक्षणस्यानु पश्चादवश्यम्भाविफलैः सुखदुःखैरभिभूयमानः परवशीक्रियमाणः पुनः सदसद्योनिमापद्यता इत्यादि व्याख्यातम्। पुनरप्यस्य विशेषजिज्ञासया पृच्छन्ति "कतम एष इति" इति। उत्तरमुत्थापयति "तान् होवाचेति" इति ॥ २ ॥

भूतात्मनश्चिदात्मनश्च वस्तुतो यद्यभेदस्तर्हि कथं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारयितान्तःपुरुषः। अथ यथाग्निनाऽयस्पिण्डो वाभिभूतः कर्तृभिर्हन्यमानो नानात्वमुपैत्येवं वाव खल्वसौ भूतात्मान्तःपुरुषेणाभिभूतो गुणैर्हन्यमानो नानात्वमुपैति। चतुर्जालं चतुर्दशविधं चतुरशीतिधा परि-

---

भूतात्मनि संसरति तदभिन्नश्चिदात्मा न संसारी भवेदिति पृष्टो दृष्टान्तेन व्यवस्थामुपपादयिष्यन्नुक्तावात्मानौ परामृशति "अथान्यत्राप्युक्तं ० पुरुषः" इति। अथैवमेवान्यत्रापि शाखान्तरेऽप्युक्तं किं यः कर्त्तास्मिञ्छरीरे सोऽयं वै भूतात्मा यस्तु करणैः सन्निधिसत्तामात्रेण स्वप्रेरितैः करणैः कारयिता सोऽन्तःपुरुषश्चिदात्मेति, एतदन्यत्राप्युक्तमित्यर्थः। अन्तःपुरुषव्याप्तस्य भूतात्मनो नानात्वापत्तिं सदृष्टान्तामाहान्तरपुरुषस्य स्वतो भेदशङ्काव्यावृत्तये "अथ यथा ० उपैति" इति। अथेदमुच्यते यथाग्निना प्रसिद्धेनाभिभूतो व्याप्तोऽयस्पिण्डो वा काष्ठादिपिण्डः सन्तप्तः कर्त्तृभिर्लोहकारादिभिर्हन्यमानस्ताड्यमानो नानात्वं विस्फुलिङ्गभावेनोपैति नानादिक्ष्वनेकधा विप्रसृतो भवतीत्यर्थः। एवं वाव एवमेवोक्तदृष्टान्तवत् खलु असौ भूतात्माऽन्तःपुरुषेणाभिभूतो व्याप्तो गुणैर्देहेन्द्रियान्तःकरणैर्गुणात्मकमायाकार्यैर्हन्यमानोऽवच्छिद्यमानो नानात्वमुपैति तत्तद्भूतसङ्घातभेदेन भिद्यत इत्यर्थः। नानाभावमेव वर्णयति "चतुर्जालं ० रूपं" इति। चत्वारि जालानि परि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

णतं भूतगणमेतद्वै नानात्वस्य रूपं। तानि ह वा एतानि गुणानि पुरुषेणेरितानि चक्रमिव मृत्पचेनेति[१]। अथ यथाऽयस्पिण्डे हन्यमाने नाग्निरांभभू-

---

च्छेदकानि यस्मिंस्तत्तथा। जरायुजाण्डजस्वेदजोद्भिज्जरूपैश्चतुर्भिर्जालैरवच्छिन्नमित्यर्थः। चतुर्दशविधं भूरादिचतुर्दशभोगस्थानप्रकारमित्यर्थः। पुनर्जरायुजादीनामवान्तरजातिभेदेन चतुरशीतिधा तावल्लक्षं तावतोऽप्यधिकं वा भेदेन परिणतमुपचितमित्यर्थः। किं तत् भूतगणं भूतानां गणोऽस्मिंस्तद्भूतगणं पञ्चमहाभूतसंहननं यदेवंविधमेतद्वै नानात्वस्य भेदस्य रूपं स्वरूपमित्यर्थः। उक्तस्य चराचरलक्षणस्य स्वतश्चेतनत्वशङ्कां व्यावर्त्तयंश्चिदात्मनोऽस्माद्भेदं सूचयति "तानि ह वा ० मृत्यवेनेति" इति। तानि जरायुजादिभेदेन चतुर्विधानि भूरादिभेदेन चतुर्दशविधानि च ह वै एतानि चतुरशीत्यादिप्रकाराणि गुण्यन्ते पुनः पुनरावर्तन्त इति गुणानि पुरुषेणान्तःस्थेनेरितानि मृत्पचेन कुलालेनेरितं चक्रमिव भ्रमन्तीति शेषः। इदानीं भूतात्मानुगतस्यापि चिदात्मनो भूतात्मगतावस्थादोषसंस्पर्शाभावं दृष्टान्तेनोपपादयन् संसारित्वासंसारित्वव्यवस्थामाह "अथ यथायस्पिण्डे ० संश्लिष्टत्वादिति" इति। अभिभूयति

---

(१) मृत्यवेनेति इति मु० सो० पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्येवं नाभिभूयत्यसौ पुरुषोऽभिभूयत्ययं भूतात्मोपसंश्लिष्टत्वादिति ॥ ३ ॥

अथान्यत्राप्युक्तं शरीरमिदं मैथुनादेवोद्भूतं संवृद्ध्युपेतं निरयेऽथ मूत्रद्वारेण निष्क्रान्तमस्थिभिश्चितं मांसेनानुलिप्तं चर्मणावनद्धं विण्मूत्रपित्तकफमज्जा-

---

अभिभूयते न हन्यत इत्यर्थः। न ह्यौष्ण्यप्रकाशस्वभावस्याग्नेः स्वतोऽवस्थाभेदो वक्रवर्तुलस्थूलसूक्ष्मत्वादिलक्षणोऽयस्पिण्डाद्युपाधिपरामर्शमन्तरेण निरूपणपथमवतरति। एवमेवासौ पुरुष अन्तरस्थिदात्मा नाभिभूयति नाभिभूयते भूतात्मगतावस्थाभिर्भेदविपर्यासलक्षणैर्न संस्पृश्यते, अत्राप्युपाधिपरामर्शमन्तरेण भेदविपर्यासयोरनिरूपणात्, अयं तु भूतात्माऽयःपिण्डाभेदेनाकारवत्तया गृह्यमाणाग्न्याभासवद्भूतसङ्घातोपसंश्लिष्टत्वात् तदात्माभिमानितयानुगतत्वादभिभूयत्यभिभूयते तदवस्थाभिरवस्थावान् भवतीत्यर्थः ॥ ३ ॥

यस्मादेवं देहाभिमाननिबन्धनमात्मनः संसारित्वं तस्माद्देहस्वभावालोचनया देहाभिमानत्यागः कार्योऽसंसारित्वायेति विवक्षन् देहस्य बीभत्सागोचरतामाह "अथान्यत्राप्युक्तं ० इव वसुना" इति। प्रथमं मैथुनादेवोद्भूतं शुक्रशोणितबिन्दुरूपं क्रमेण निरये निरयतुल्ये मातुरुदरे संवृद्ध्युपेतमङ्गप्रत्यङ्गकेशनखलोमप्रकारैः परिव्यूढं, अथ नवमे दशमे वा ततोऽप्यधिके

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेदोवसाभिरन्यैश्चामयैर्बहुभिः परिपूर्णं कोश इव वसुना ॥ ४ ॥

अथान्यत्राप्युक्तं सम्मोहो भयं विषादो निद्रा तन्द्री प्रमादो जरा शोकः क्षुत् पिपासा कार्पण्यं क्रोधो

वा मासे सति मूत्रद्वारेण योनिरन्ध्रेण निष्क्रान्तमेवंविधमिदं शरीरं प्रसिद्धमित्यर्थः। अवनद्धं पिहितं अन्यैश्चामयैरुदरशूलापस्मारादिभिर्बहुभिरसङ्ख्यातैः, कोशो भाण्डागारं, वसु धनं, प्रसिद्धार्थमन्यत्। निरयरूपेऽस्मिन् शरीरे विवेकिनाभिमानो न कार्य इत्यभिप्रायः ॥ ४ ॥

एवं स्थूलशरीरे वैराग्याय तत्स्वभावमुक्त्वा सूक्ष्मेऽपि शरीरे वैराग्याय तत्स्वभावमुपन्यस्यति "अथान्यत्राप्युक्तं सम्मोहो ० तामसानि" इति। सम्मोहो विपर्ययः। तन्द्री आलस्यं। प्रमादोऽवश्यकर्तव्येष्ववधानशून्यता। जरा देहधर्मोऽप्यन्तःकरणेन जीर्णोऽहमित्यभिमानात् तद्धर्मान्तरनुक्रान्ता। कार्पण्यं कृपणत्वं सत्यां सम्पत्तौ कदर्यता।

"आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीडयन्।

देवतातिथिभृत्यांश्च स कदर्य इति स्मृतः" इति

स्मृतौ कदर्यलक्षणमुक्तं, स एवेह कृपणः, तस्य भावः कार्पण्यमित्यर्थः। नास्तिक्यं आमुष्मिके श्रेयसि निरये वा नास्तीति बुद्धिर्वेदाद्यनादरस्य। अज्ञानमपेक्षितार्थास्फूर्त्तिः। परर्द्ध्यसहिष्णुत्वं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नास्तिक्यमज्ञानं मात्सर्यं नैष्कारुण्यं मूढत्वं निर्व्रीडत्वं निराकृतित्वमुद्धतत्वमसमत्वमिति तामसानि। अन्त-स्तृष्णा स्नेहो रागो लोभो हिंसा रतिर्द्दिष्टिर्व्याहृतत्व-मीर्ष्या ऽकाममस्थिरत्वं चलत्वं व्यग्रत्वं जिगीषाऽर्थो-

---

मात्सर्यम्। नैष्कारुण्यं नैष्ठुर्यम्। मूढत्वमविवेकित्वं विवेकरा-हित्यमिति यावत्। अतो न मोहेन पौनरुक्त्यम्। निर्व्रीडत्वं अकार्यकरणेऽनपत्रपत्वम्। निराकृतित्वं अनवस्थितस्वभावत्वम्। उद्धतत्वं साहसेषु निःशङ्कत्वम्। असमत्वं विषमबुद्धित्वम्। एतानि तामसानि तमोगुणोद्रेककृतानीत्यर्थः। अन्यत् प्रसि-द्धार्थम्। राजसान्याह "अन्तस्तृष्णा ० आप्नोतीति" इति। अप्राप्येऽप्यर्थेऽभिलाषोऽन्तस्तृष्णा। अतस्तृष्णेति पाठे अतः परं राजसान्युच्यन्त इति योज्यम्। स्नेहः पुत्रदारादिषु ममत्वाभि-निवेशः। रागः तेष्वासक्तिरात्मत्वाभिमानः। लोभो लब्धेषु विषयेष्वलंबुद्ध्यभावः। हिंसा परपीडा। द्दिष्टिर्द्वेषः। व्याहृतत्वं व्याहृताभिप्रायत्वं गूढाभिसन्धितेत्यर्थः। ईर्ष्या निरर्थकस्पर्द्धा। काम्यत इति कामः फलं तद्रहितं यथा स्यात् तथाऽस्थिरत्वं, चाञ्चल्यं, निरर्थकप्रवृत्तिमत्त्वमित्यर्थः। यद्वा आकाममाकामत्वं आ समन्तात् कामवत्त्वमसम्पूर्णकामत्वमित्यर्थः, अतएवास्थिरत्वमेक-स्मिन्विषये स्थैर्यरहितत्वम्। चलत्वं चलचित्तत्वमगाम्भीर्यमिति यावत्। व्यग्रत्वं व्यसनिता। धनविद्यादिभिः परान् जेतुमिच्छा जिगीषा। अर्थस्य पशुधनक्षेत्रादेरुपार्जनं येन केनचनोपायेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पार्जनं मित्रानुग्रहणं परिग्रहावलम्बोऽनिष्टेष्विन्द्रियार्थेषु द्विष्टिरिष्टेष्वभिषङ्गः शुक्लस्वरोऽन्नतमस्त्विति राजसान्येतैः परिपूर्ण एतैरभिभूता इत्ययं भूतात्मा तस्मान्नानारूपाण्याप्नोतीत्याप्नोतीति ॥ ५ ॥

इति मैत्र्युपनिषदि तृतीयः प्रपाठकः ॥

सम्पादनम् । तदर्थं मित्राणामुपकारिणामनुग्रहणं दानमानसत्कारैरनुसरणम् । परिग्रहावलम्बो गृहाश्रमोत्साहः । उत्तरं वाक्यद्वयं स्पष्टार्थम् । अभिष्वङ्गः प्रीत्यतिशयः । शुक्लस्वरोऽव्यक्तस्वरस्तद्वत्त्वमिति यावत् । अन्नतमो बहन्नः ख्यात्याद्युद्देशेनान्नदानपरत्वमित्यर्थः । तुशब्दः पूर्वोक्तात् तामसाद्व्यवच्छेदार्थः । इत्येवंविधानि राजसानीत्यर्थः । एतैरित्यादिः स्पष्टार्थः । यस्मादेवं तामसैराजसैश्च धर्मैरभिव्याप्तोऽयं भूतात्मा तस्मात् तद्वासनावासिततया पुनः पुनर्नानारूपाण्याप्नोतीति । अभ्यासः प्रपाठकसमाप्तिद्योतनार्थः ॥ ५ ॥

इति श्रीरामतीर्थविरचितायां मैत्रीशाखोपनिषद्दीपिकायां तृतीयः प्रपाठकः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ते ह खलु वावोर्द्ध्वरेतसोऽतिविस्मिता अभिसमेत्योचुर्भगवन्नमस्तेऽस्त्वनुशाधि त्वमस्माकं गतिरन्या न

अथ चतुर्थः प्रपाठकः।

पूर्वस्मिन् प्रपाठके एकस्यैव चिदात्मनो भूतात्मोपाध्यविवेकेन संसारित्वं तद्गतावस्थाभिरवस्थावत्त्वं नानात्वं चेत्येवमादिदोषसंसर्गी न स्वतः स्वतस्तु निर्धर्मको नित्यशुद्ध एवेति प्रतिपादितम्। तदेतदवधार्य भूतात्मभावोपमर्द्देन शुद्धात्मस्वभावावाप्त्युपायं जिज्ञासवो वालखिल्याः पृच्छन्तीत्याख्यायिकामेवानुसरन्ती श्रुतिर्मोक्षसाधनं तत्त्वज्ञानमन्तरङ्गवहिरङ्गसाधनोपेतमुपदेष्टुं प्रवर्त्तते। ज्ञातव्ये हि विषये निर्धारिते तज्ज्ञानोपायजिज्ञासावसर इति सङ्गतिमभिप्रेत्य तदर्थं गुरूपसत्तिं विदधाति "ते ह खलु० न विद्यता इति" इति। हशब्दः ऐतिह्यार्थः खलुशब्दो वाक्यालङ्कारार्थः। वावशब्दोऽवधारणार्थः। ऊर्द्ध्वरेतसः पूर्वोक्ता वालखिल्या ऋषयः। ते ह विस्मिताः, अवधारणस्यात्रान्वयः, किमिदमद्भुतमिव नित्यशुद्धश्चिदात्माऽस्मत्प्रत्यगात्मा सन्नपि परोक्ष इव शुद्धोऽप्यशुद्ध इव, अक्रियोऽपि सक्रिय इवेति विस्मिता एव सन्तः प्रजापतिं, गुरुमित्यध्याहारः, अभिसमेत्याभिमुखेन सम्यग्विधिपूर्वकमेत्य ऊचुरुक्तवन्तः। हे भगवन् ते तुभ्यं नमो नमनमिदमस्तु त्वमनुशाधि शनैः शिक्षय अस्माकमस्मानित्यर्थः। अथवास्मानिति पदमध्याहर्त्तव्यम्। अन्यान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विद्यता इति। अस्य को विधिर्भूतात्मनो येनेदं हित्वात्मन्नेव सायुज्य(१)मुपैति तान् होवाचेति ॥ १ ॥

अथान्यत्राप्युक्तं महानदीषूर्मय इवानिवर्तकमस्य यत्पुराकृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्यो-

---

प्रार्थयध्वमिति चेन्नैवं वाच्यमित्यभिप्रेत्योचुरस्माकं त्वच्छिष्याणां गतिर्गन्तव्यं स्थानं अन्या त्वदन्या न विद्यतेऽतस्त्वामेव पृच्छाम इत्यर्थः। यदर्थमुपसन्नाः तमर्थं पृच्छन्तीत्याह "अस्य को विधिः ० होवाचेति" इति। अस्य प्रत्यक्षानुभवसिद्धस्य भूतात्मनो भूतसङ्घातमात्मत्वेनोपगतस्य को विधिर्विधानं कः प्रकारो येन विधिना उपायभूतेनेदं भूतात्मत्वं हित्वा विहाय आत्मन्नात्मनि चिदानन्दसत्स्वरूप एव पूर्णात्मनि सायोज्यं सायुज्यं सयुग्भावं भूतात्मत्वविलापनेनोपैति निरस्तोपाधितया स्वस्वरूपेऽवतिष्ठेत स को विधिस्तं विधिं नो ब्रूहीत्युक्तवन्त इत्यर्थः। तान् होवाचेत्युक्तार्थः ॥ १ ॥

एवं पृष्टः प्रजापतिः प्रथमं वैराग्यदार्ढ्याय भूतात्मनः स्वरूपमुपन्यस्यति यस्मिन्नासक्तः संश्चिदात्मा स्वं रूपं परमं पदं न जानाति तदिदं विचिन्त्यतां तावदिति। "अथान्यत्रा ० परं पदं" इति। अस्य भूतात्मनो यत् पुरा कृतं तद-

---

(१) सायोज्यमिति मु० सो० पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रागमनं सदसत्फलमयैः पाशैः पङ्गुरिव बद्धं बन्धनस्थस्येवास्वातन्त्र्यं यमविषयस्थस्येव बहुभयावस्थं मदिरोन्मत्त इव मोहमदिरोन्मत्तं पाप्मना गृहीत

निवर्तकमित्यन्वयः नास्ति निवर्तकमस्येत्यनिवर्तकम् । पुराकृतं पुण्यापुण्यरूपं कर्म महानदीषूर्मय इव पुनः पुनरविच्छेदेन जायमानं यतो भोगेन क्षीयमाणमपि पुनः पुनः पुंसां क्रियमाणत्वान्नोद्वर्तेत, अतो ब्रह्मात्मज्ञानादन्यतो निवर्तकमस्य नास्तीत्यर्थः। तथा च श्रुतौ ["स हीदमन्नं पुनः पुनर्जनयते स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात् क्षीयेत ह"] इति ["भिद्यते हृदयग्रन्थिः" "नान्यः पन्था विद्यतेऽयनाय"] इति च। सत्कर्म वाऽऽत्मज्ञानं वा सम्पाद्योत्तरे वयसि कर्मचयं करिष्यामीत्याशा न कार्येत्याह समुद्रेति। अस्य भूतात्मनो मृत्योरागमनं मरणप्राप्तिः समुद्रस्योत्सर्पतो वेलेव वेलाधावनमिव, अनिच्छतोऽपि दुर्निवार्यमस्य मृत्योरागमनमित्यर्थः। यावज्जीवति तावत्यपि काले नेच्छया पुरुषार्थसाधनक्षममित्याह सदसदिति। तत्तत्कर्मोपदर्शितानेकसुखदुःखभोगवासनामयैः पाशैर्बद्धं निगडितं सत् पङ्गुरिव गमने सत्साधनप्रवृत्तावक्षममित्यर्थः। तत्र हेतुमाह, यतो बन्धनस्थस्य बध्यतेऽस्मिन्निति बन्धनं बन्धनागारं तत्स्थस्येवास्वातन्त्र्यमस्य भवत्यतः पंगुरिवाकिञ्चित्करं भूतात्मस्वरूपमित्यर्थः। अतोऽत्र विश्वासो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इव भ्राम्यमाणं महोरगदष्ट इव विषयदष्टं महान्धकारमिव रागान्धमिन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शनं कदलीगर्भ इवासारं नट इव क्षणवेषं चित्रभित्तिरिव मिथ्यामनोरममित्यथोक्तम् ।

न कार्य इत्यर्थः । इतोऽपि न विश्वासः कार्यः, यतो यमस्य दण्डयितुर्विषये गोचरेऽवस्थितस्य यथा बहुविधं भयं तथा बहुभयाविष्टा अवस्था यस्य तत्तथोक्तं सर्वस्मादपि शङ्कितभयमित्यर्थः । भूतसङ्घातमभिमन्यमानस्य विवेकोद्गमोऽपि दुर्लभ इत्याह मदिरेति । मोहोऽविवेकः स्तब्धता, पाप्मना पापग्रहेण गृहीत इव भ्राम्यमाणं सदैवावशमित्यर्थः । यद्वा ग्रहगृहीत इव पाप्मना पापेन भ्राम्यमाणमिति योजना । विषयदष्टं वासनारूपेण विषयैराविष्टमित्यर्थः । महानन्धकारो यस्मिंस्तत् महान्धकारं निशीथं तद्वद्रागो विषयासक्तिः सोऽन्धकार इव हिताहितप्राप्तिपरिहारोपायावरणं तेनान्धमावृतमित्यर्थः । इदानीमस्मिन् सत्त्वबुद्धिरपि न कार्येत्याह इन्द्रजालमिवेति । मायाविनिर्मितहस्त्यादिवद् दृष्टनष्टस्वरूपत्वान्मायामयमित्यर्थः । तत्त्वज्ञानबाध्यत्वादपि नास्मिन् सत्त्वमवधेयमित्याह स्वप्न इवेति । मिथ्यादर्शनं बाध्यदर्शनमित्यर्थः । विमतं बाध्यज्ञानप्रतिभासं कादाचित्कत्वात् स्वप्नदृष्टवदित्यनुमानमुक्तं भवति । कदलीगर्भस्तदन्तःशलाका तद्वदिदमसारं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दस्पर्शादयो ह्यर्था मर्त्येऽनर्था इवास्थिताः ।
येषां सक्तस्तु भूतात्मा न स्मरेत परं पदम् ॥ २ ॥

अल्पोपघातमप्यसहमानमित्यर्थः । प्रतिक्षणपरिणामादप्यविश्वास्यमित्याह नट इवेति । यद्वा नानाजात्यभिव्यञ्जकक्रममभाव्यनेकाकारपरिग्रहान्नट इव दुर्लक्ष्यमित्यर्थः । अस्मिन् सौकुमार्यसौन्दर्यादिबुद्धिरपि न कार्येत्याह चित्रेति । मांसशोणितादिभिर्बीभत्सितत्वान्न मनोरममित्यर्थः । तदुक्तं मनुना (अ० ६ । ७७ श्लो० ७६।७७) ।

"अस्थिस्थूणं स्नायुबद्धं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमसन्निष्ठं भूतावासमिमं त्यजेत्" ॥ इति ।

इत्यथ एवमुक्तेऽर्थे, उक्तं श्लोकरूपं वचनमिति शेषः । शब्दस्पर्शादयो हि विषया अनर्था अपि मर्त्ये मरणधर्मिणि भूतात्मन्यर्था इव स्पृहणीया इवाऽऽस्थिताः अङ्गीकृताः न त्वेते स्पृहणीया इति योजना । कुत इत्यत आह, भूतात्मा येषां सक्तो येष्वासक्तस्तु परमं पदं वैष्णवं धाम न स्मरेत नानुसन्दधीतेत्यर्थः । एवंविधं भूतात्मनः स्वरूपं ब्रह्मादिस्तम्बपर्यन्तं समालोच्य तस्मिन्नभिमानस्त्याज्यः श्रेयोऽर्थिनेत्यभिप्रायः ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयं वाव खल्वस्य प्रतिविधिर्भूतात्मनो यद्वेदविद्याधिगमः स्वधर्मस्यानुचरणं स्वाश्रमेष्वेवानुक्रमणं स्वधर्मस्य वा एतद्व्रतं स्तम्बशाखेवापराण्यनेनोर्द्धभा-

---

तदेवं वैराग्याय भूतात्मनः स्वरूपमुपवर्ण्येदानीमस्य त्यागोपायं पृष्टमुपदिशति "अयं ० निवर्तता इति" इति । अस्य भूतात्मनोऽयं वाव अयमेव खलु प्रतिविधिः प्रतिविधानं प्रतिक्रिया भूतात्मत्वप्रहाणोपायः । कोऽयं यद् योऽयं । वेदविद्याधिगमः, वेदद्वारा विद्याया आत्मतत्त्वविषयाया अधिगमः सम्यक्प्राप्तिरित्यर्थः । कथं विद्याधिगमो वेदादित्यपेक्षायां विविदिषन्ति यज्ञेनेत्यादिश्रुत्यन्तरविनियोगानुरोधेन स्ववर्णाश्रमविहितधर्मानुष्ठानप्रभावकृतस्वान्तशुद्धिं विना न ज्ञानाधिगम इत्यभिप्रायेणादौ बहिरङ्गानि कर्माणि विदधाति स्वधर्मस्येत्यादिना । स्वो धर्मः स्वधर्मः आवश्यकं कर्म तस्यानुचरणमनुक्रमेणानुष्ठानं, एतदेव स्पष्टयति स्वाश्रमेष्वेवेति । यस्य वर्णस्य यावन्त आश्रमा विहितास्तेष्वाश्रमेष्वेव विहितानां कर्मणां तेन तेन वर्णेनानुक्रमणमनुष्ठानमिति यदेतद्वै प्रसिद्धं स्वधर्मस्य व्रतं निष्ठा, अपराणि काम्यादीनि कर्माणि स्तम्बशाखेव तृणशलाकेव दृढानीत्यर्थः । एतदुक्तं भवति येन यच्छक्यं कर्तुं तन्न तस्य हितसाधनं किन्तु यस्य वर्णस्य यस्मिन्नाश्रमे यो धर्मो विहितः स तस्य हितसाधनं तेन सोऽनुष्ठेयः, काम्यादि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्भवत्यन्यथाऽवाङित्येष स्वधर्मोऽभिहितो यो वेदेषु न स्वधर्मातिक्रमेणाश्रमी भवत्याश्रमेष्वेवानवस्थस्तपस्वी

तु मुमुक्षुणा हेयमिति। अनेनोक्तप्रकारस्वधर्मानुष्ठानेन ऊर्द्ध्वभाक्, संसारमण्डलादुपरि यदसंसारि ब्रह्म तदूर्द्ध्वमुच्यते।

'ऊर्द्ध्वमूलो अवाङ्शाख एषोऽश्वत्थः सनातनः।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन'॥

(कठो० ६) इति श्रुत्यन्तरात्। तदूर्द्ध्वं ब्रह्म भजत इत्यूर्द्ध्वभाक् ब्रह्मज्ञानवान् भवतीत्यर्थः। अन्यथा स्वधर्मातिक्रमणे काम्यकर्मनिष्ठायां वाऽवाङित्यधो नरकादिस्थानमर्वाचीनानेकानित्यपुरुषार्थं वा भजेतेत्यर्थः, संसारमण्डलान्न व्यावर्तत इत्यभिप्रायः। उपसंहरति एष स्वधर्मो यो वेदेष्वभिहितो वर्णाश्रमनिबन्धनो न काम्यादि स्वधर्म इत्यर्थः। यद्यपि काम्याद्यपि कर्म कामिनः स्वाभिलषितसाधनत्वात् स्वो धर्मो भवति तथापि न तत् स्वरूपाविर्भावहेतुरिति न मुख्यं तस्य स्वधर्मत्वम्। स्ववर्णाश्रममात्राधिकारकस्तु धर्मश्चित्तशुद्ध्यादिपरम्परया स्वस्वरूपाविर्भावहेतुरिति मुख्य इति भावः। उक्तमेवार्थं व्यतिरेकमुखेन द्रढयति, न स्वधर्मातिक्रमेणाश्रमी भवति। केवलं तत्तदाश्रमलिङ्गधारणमात्रादाश्रमी न भवति, तस्य स्वरूपतोऽपुरुषार्थत्वात् पुरुषार्थहेतुत्वाच्चेति भावः। ननु किमि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वेत्युच्यता इत्येतदयुक्तं नातपस्कस्यात्मज्ञानेऽधिगमः कर्मसिद्धिर्वेत्येवं ह्याह ।

त्वेवमाश्रमधर्मेष्वतियत्नः क्रियते तपसैव ब्रह्मविद्योदयसम्भवात् "तपसा विन्दते" महदिति वचनादिति चेत्, सत्यं, तदप्याश्रमधर्माविरोध्येव साधनं न तद्विरुद्धमपीत्याशयेनाह आश्रमेष्वेवेति । आश्रमेष्वनवस्थ एवानाश्रमस्थ एव तपस्वी वा धार्मिको वेत्याद्युच्यते यत् तदेतदयुक्तमिति योजना । ननु तर्हि तत्र तत्रात्मज्ञानसाधनेषु 'तपसा ब्रह्म विजिज्ञासस्व' इत्यादि तपोविधानमनर्थकं, स्वधर्मानुष्ठानादेवात्मज्ञानसिद्धेरित्याशङ्कायामाह नातपस्कस्येति । अतपस्कस्य वैधकायशोषणरहितस्यात्मज्ञाने नाधिगमो नाधिगमनं आत्मज्ञानं न प्राप्नोतीत्यर्थः । न केवलमेतावत् किन्तु कर्मसिद्धिर्वा कर्मफललाभो वा तस्य न स्यादित्यर्थः । अस्मिन्नर्थे सम्मतिमिव श्लोकमुदाहरति, एवं ह्याहेति । तपसा स्वधर्माचरणेन तदविरोधिवैष्णवादिनिष्कामव्रतविशेषाचरणलक्षणेन च सत्त्वं सत्त्वगुणप्रधानं चित्तं प्राप्यते, विशुद्धसत्त्वता लभ्यत इत्यर्थः । तस्मात् सत्त्वान्मनः सम्प्राप्यते, मनुतेऽनेनेति मनो विवेकविज्ञानं, तस्मान्मनसो मननादात्मा पूर्णं तत्त्वं परं ब्रह्म हि निश्चितं प्राप्यते । आत्मतत्त्वसाक्षात्कार एवात्मप्राप्तिर्नान्या तस्याप्तिर्नित्याऽऽप्तस्वरूपत्वात्, अत आत्मसाक्षात्कारो भवतीत्यर्थः । कोऽयमात्मेत्यत आह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तपसा प्राप्यते सत्त्वं सत्त्वात् सम्प्राप्यते मनः ।
मनसः प्राप्यते ह्यात्मा यमाप्त्वा न निवर्तता इति ॥ ३ ॥

अस्ति ब्रह्मेति ब्रह्मविद्याविदब्रवीद् ब्रह्मद्वार-

यमाप्त्वा प्राप्य साक्षात्कृत्य न निवर्तते पुनः संसारमण्डले भूतात्मभावाय नावर्तते मुच्यत इत्यर्थः ॥ ३ ॥

इदानीमुक्तं साधनजातं राग्नित्रयमिव सम्पाद्योपायोपेय-भावेनात्मसाक्षात्कारे समुच्चयेन विधत्ते "अस्ति ० ब्रह्म" इति । यो ब्रह्मविद्याविद्ब्रह्मविषयां विद्यां श्रवणमननलक्षणां वेत्ति सोऽस्ति ब्रह्माऽखण्डसच्चिदानन्दात्मकं ब्रह्मास्तीत्यब्रवीत्, प्रमाण-युक्तिजन्यं ब्रह्मज्ञानं ब्रह्मप्राप्तिसाधनमित्युक्तवानित्यर्थः । तथाच श्रुत्यन्तरं ['अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते अस्तीत्ये-वोपलब्धव्यः'] (कठो॰ ६) इति । यस्तपसा पूर्वोक्तलक्षणेनापहत-पाप्मा विशुद्धसत्त्वः, सत्त्वे तदिदं तपो यथाव्याख्यातरूपं ब्रह्मद्वा-रमेव ब्रह्मप्राप्तिद्वारमारादुपकारकं भवतीत्याहेति मध्यग्रन्थयो-जना । यः पुनः सुयुक्तः सुतरामध्यात्मयोगनिरतः ओमित्यजस्रं चिन्तयति स एतच्चिन्तनालम्बनमोङ्काररूपं ब्रह्मणो महिमा माहात्म्यं आविर्भूतं ब्रह्म वै तदित्याहेति योजना । सर्वमर्थजातं वाचकशब्दसम्भिन्नत्वात् तस्मिन्नवगम्यमानं ततो न पृथगस्ति, वाचकशब्दभेदाश्च ['तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येव-मोङ्कारेण सर्वा वाक् संतृण्णा ओङ्कार एवेदं सर्वं'] (छान्दो॰अ॰ २)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिदमित्येवैतदाह यस्तपसापहतपाप्मा ॐ ब्रह्मणो महिमेत्येवैतदाह यः सुयुक्तोऽजस्रं चिन्तयति तस्माद्विद्यया तपसा चिन्तया चोपलभ्यते ब्रह्म। स

इति श्रुतेरोङ्कारान्नातिरिच्यन्ते। स चोङ्कारोऽपि स्फुरणावगुण्ठितत्वान्न ततोऽन्योऽस्ति, स्फुरणं च सर्वस्य नामरूपात्मकस्य ब्रह्मैव 'आत्मवास्य ज्योतिः' इति श्रुतेरात्मा च ब्रह्म 'अयमात्मा ब्रह्म' इति श्रुतेः। तथाच प्रणवेन ब्रह्मात्मानुसन्धानं ब्रह्मणः साक्षात् साक्षात्कारहेतुरिति प्रणवार्थानुसन्धाननिष्ठोऽब्रवीदित्युक्तं भवति। एवं त्रिधा विभक्तं साधनमिदानीं समुच्चित्य विधत्ते तस्मादिति। अत्र त्रयाणामेषामेकस्मिन् पुरुषे यौगपद्यासम्भवादवश्यम्भाविनि क्रमेऽग्निहोत्रयवागूपाकवदर्थक्रमो द्रष्टव्यः। तथाच प्रथमं तपस्ततो ब्रह्मविद्या श्रवणादिलक्षणा, ततः प्रणवैकनिष्ठतेति क्रमेण साधनत्रयवान् ब्रह्मोपलभेतेत्यर्थः। इदानीमुक्तसाधनत्रयातिशयवतः परमफलकथनपूर्वकं साधनत्रयविधेः प्राशस्त्याय ब्रह्मविदं स्तौति "स ब्रह्मणः ० ब्रह्मोपास्ते" इति। स एवं ध्यायन् विद्वान् ब्रह्मणो ऽपरस्य हिरण्यगर्भाख्यस्य शब्दब्रह्मणो वा परः परस्तात्परं ब्रह्म एता गन्ता भवति परं ब्रह्मैव भवतीत्यर्थः। इदं मुख्यफलकथनम्। ['ब्रह्म वेद ब्रह्मैव भवति'] इत्यादि च श्रुत्यन्तरम्। तत् किं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मणः पर एता भवत्यधिदैवत्वं देवेभ्यश्चेत्यक्षय्यमपरिमितमनामयं सुखमश्नुते य एवंविद्वाननेन चि-

---

हिरण्यगर्भोऽन्योऽस्ति यस्मात्परमयमेतीत्याशङ्क्य नहि नहि सोऽप्ययमेवेत्याहाधिदैवत्वमिति। देवेभ्यश्च देवेभ्योऽप्यधि उपरि यद्दैवत्वं सर्वदेवाधिपतित्वं तदप्ययमेता भवतीति योजना। अश्नुत इति वक्ष्यमाणेन वान्वयः। इतिशब्दः प्रदर्शनार्थः। देवाश्चायमेव भवतीत्येवंविधमस्य माहात्म्यमित्यर्थः। किञ्चाक्षय्यमविनाशि, अपरिमितमिति विशेषणमविनाशित्वसाधनं, यत् परिमितं देशतः कालतः स्वरूपतो वा परिच्छिन्नं तद्विनाशि दृष्टं यथा घटादि, इदन्तु तद्विपरीतत्वादक्षय्यमित्यर्थः। सांसारिकसुखवदस्य सातिशयत्वपारतन्त्र्यदुःखसम्भेदशङ्काव्यावृत्तये विशेषणमनामयमिति, एवम्भूतं यत्सुखं तदश्नुते प्राप्नोति भुङ्क्ते इति वा। क इत्यपेक्षायामाह य एवं विद्वाननेन त्रिकेण ब्रह्मोपास्ते स इत्यर्थः। पुनरपि फलान्तरमिव ब्रह्मसाक्षात्कारनान्तरीयकामुपाधिनिवृत्तिमुपन्यस्यति "अथ यैः ० सायोज्यमुपैति" इति। अथास्यामवस्थायामयं परिपूर्णः पूर्णात्मा सन्नात्मन्नेवात्मभूते ब्रह्मण्येव सायोज्यं सायुज्यमुपैतीति सम्बन्धः। सायुज्योपगमनप्रकारमाहावशिष्टैः पदैः] यैर्भूतपरिणामैर्देहेन्द्रियादिलक्षणैरयं विद्वान् पूर्वं परिभूत आत्मसात्कृतो रथितस्य रथं प्रापितो रथित्वं च प्रापित इति यावत् तैर्वैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केण ब्रह्मोपास्ते । अथ यैः परिपूर्णोऽभिभूतोऽयं रथितश्च तैर्वैव मुक्तस्त्वात्मन्नेव सायोज्यमुपैति ॥ ४ ॥

ते होचुर्भगवन्नभिवाद्यसीत्यभिवाद्यसीति । निहितमस्माभिरेतद्यथावदुक्तं मनसीत्यथोत्तरं प्रश्नमनु-

---

तैर्भूतपरिणामैः, वा एवेति छेदः, वाशब्दोऽप्यर्थे, तैरपि मुक्त एवेत्यन्वयः । तुशब्दः पुनर्बन्धशङ्काव्यावृत्त्यर्थः । आत्मन्नेवेत्यादि व्याख्यातम् ॥ ४ ॥

एवमात्मानात्मनोस्तत्त्वमात्मतत्त्वब्रह्मज्ञानं च ससाधनमुपश्रुत्य किं कृतवन्तो वालखिल्या इत्यपेक्षायां तद्वृत्तमनुवदन्ती श्रुतिर्लब्धविद्यैः शिष्यैर्गुरौ कर्तव्यमुपदिशति "ते होचुः ० अभिवाद्यसीति" इति । पुनर्वचनमादरार्थम् । अभिवादी अभिवदनशीलः आभिमुख्येन श्रोतॄणामनुभवपर्यन्तं तत्त्ववदनस्वभावोऽसि कृपयैव सर्वोपदेष्टासि नास्मद्गुणापेक्षयेत्यर्थः । एवं गुरुमभिपूज्य किं कृतवन्त इत्यपेक्षायां गुरूपदिष्टसर्वार्थावधारणोक्त्या तं प्रसादयन्तः पुनः किञ्चिन्मनोगतं पृच्छन्ति ध्येयस्वरूपविप्रतिपत्तिनिरासेन मनःसमाधानार्थमित्याह "निहितं ० ब्रूहीति" इति । हे भगवन् यदुक्तं भवता एतदस्माभिर्मनसि स्वचित्ते यथावदानुपूर्व्येण निहितं धृतं, अत्रास्माकं नास्ति संशय इत्यर्थः । अथ इदानीमुत्तरमितः परम-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रूहीति। अग्निर्वायुरादित्यः कालो यः प्राणोऽन्नं ब्रह्मा रुद्रो विष्णुरित्येकेऽन्यमभिध्यायन्त्येकेऽन्यं श्रेयः कतमो यः सोऽस्माकं ब्रूहीति तान् होवाचेति ॥ ५ ॥

ब्रह्मणो वावैता अग्र्यास्तनवः परस्यामृतस्या-

स्माभिः करिष्यमाणं प्रश्नमनुब्रूहि अनुसृत्योत्तरं ब्रूहि कथये-त्यूचुरिति पूर्वेणान्वयः। कः प्रश्नः स पृच्छ्यतामित्युक्ता आहुः "अग्निः ० होवाचेति" इति। एके ध्यायिनोऽन्यमभिध्या-यन्ति अन्यमन्यमिति वीप्सा द्रष्टव्या, एकेऽग्न्यादीनामेकैकम-भिध्यायन्तीत्यर्थः। एके ऽन्यं परं ब्रह्म परमात्मेत्युच्यमा-नमर्थं ध्यायन्तीत्यर्थः। अत्र कतमः पक्षः श्रेयः श्रेष्ठः श्रेयस्कर इति वा। यः पक्षस्तवाभिमतः श्रेयस्त्वेन स एवास्माकं श्रेयान्। तमस्माकं त्वं ब्रूहीत्यपृच्छन्निति योजना। यद्वा स त्वं विजानन् यः श्रेष्ठः पक्षस्तमस्माकं ब्रूहीति योजना। तान् होवाचेति श्रुतिवचनमुक्तार्थम् ॥ ५ ॥

श्रेयोऽर्थिभिरग्न्यादयो वा प्रत्येकं पृथक् ध्येयाः परिपूर्णं ब्रह्म वा ध्येयमिति पृष्टः प्रजापतिः सर्वत्र ब्रह्मैव पररूपेण स्वरूपेण चोपास्यं श्रेयोऽर्थिभिर्नाग्न्यादिस्वरूपमेवोपास्यं तदुपास-नाया अल्पफलत्वादित्यभिप्रेत्याग्न्यादीनामपि न ब्रह्मणोऽर्थान्तर-त्वमस्तीति प्रतिपादयन्नुपासनाव्यवस्थामुपदिशतीत्याह "ब्रह्मणः ० ह्याह" इति। एता अग्न्यादिलक्षणा ब्रह्मणो वाव ब्रह्मण एवाग्र्याः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शरीरस्य तस्यैव लोके प्रतिमोदतीह यो यस्या-

ष्टास्तनवो मूर्तयः, ब्रह्मैवाग्न्यादिरूपेण विभाव्यते, अतस्तेषु ब्रह्म-बुद्ध्योपासनं युक्तमिति भावः। किंलक्षणस्य ब्रह्मण इत्युच्यते परस्य। सर्वकारणस्य सर्वाधिष्ठानभूतस्येति यावत्। अतएवामृ-तस्य नित्यस्य, अशरीरस्याविर्भावतिरोभावधर्मवर्जितस्य ब्रह्मण एतास्तनव इति पूर्वेण सम्बन्धः। एवं चेद्यस्यैतास्तनवस्तदेव ब्रह्मोपास्यतामलं तद्दृष्ट्याऽन्योपासनयेत्यत आह तस्यैवेति। योऽर्थी देवो वाऽन्यो वा यस्य पुंसोऽनुषक्तोऽनुरागविषयीकृतस्तस्यैवेह लोके प्रतिमोदति प्रतिमोदते प्रतिमोदनं करोति सर्व इत्येवं लोकप्रसिद्धं ह्याहेत्यक्षरयोजना। यो यस्यानुराग-योग्योऽनुरज्यमानो वा तमेव लोकाः प्रीणयन्त्यनुसरन्तीति च प्रसिद्धं लोके। तथा च परस्य ब्रह्मणोऽगोचरत्वान्निराकार-त्वात् तस्मिन् साक्षान्मनोनिरोधं कर्तुमशक्नुवतां प्रथममग्न्या-दिदेवतास्वेव यथारुचि ब्रह्मदृष्ट्योपासनं श्रुतिषूपदिश्यत इत्य-भिप्रायः। यद्वा तस्यैव ब्रह्मण इह लोके प्रतिमा मूर्तिरुदति उदेत्यग्न्यादिरूपेण। तथाच योऽग्न्यादिर्यस्योपासकस्यानुषक्तः स तदेव ब्रह्म प्रतिमारूपमुपासीतेत्येवं ह्याहेति योजना। अग्न्या-दीनां देवानां ब्रह्माव्यतनुत्वमुक्तं साधयति "ब्रह्म खल्विदं ० सर्वं" इति। इदं सर्वं ब्रह्म वाव ब्रह्मैव खल्वित्यन्वयः। तथाच श्रुत्यन्तरं ['सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत']

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नुषक्त इत्येवं ह्याह। ब्रह्म खल्विदं वाव सर्वम्। या वाऽस्या अग्र्यास्तनवस्ता अभिध्यायेदर्चयेन्नि-

---

(छान्दो० अ० ३) इति। अस्यार्थः। सर्वमिदमध्यात्ममधिदैव-मधिभूतं वाऽशेषं जगद्ब्रह्मैव खलु नात्र संशयः कार्यः। कुत इत्यपेक्षायां हेतुमाह तज्जलानितीति। तस्माज्जायत इति तज्जं, तस्मिन् लीयत इति तल्लं, तेनानिति चेष्टत इति तदनम्। अम्लोपश्छान्दसः। इतिशब्दो हेत्वर्थः। तस्माद्ब्रह्मणो जातत्वात् तस्मिन्नेव लीयमानत्वात् तदाश्रयजीवनत्वाच्च तदेवेदं ब्रह्म यथामृत्सुवर्णाद्युत्पत्तिस्थितिलया घटकुण्डलादयो मृत्सुवर्णाद्या-त्मकास्तथेमे तस्मात् तथेति। यद्यप्येवं सर्वमेव ब्रह्मणः शरीरं तथापि यत् स्वस्मादुत्कृष्टत्वेनाभिमतं तदुपास्यम्। देवा हि मनुष्याणामुत्कृष्टत्वेनाभिमता अन्नादयश्च जीवनहेतुत्वात् तथा-ऽभिमानयोग्या इत्यतस्ते ब्रह्मणोऽग्र्यास्तनव इति ब्रह्मदृष्ट्यो-पास्या इत्याह "या वास्या ० पुरुषस्य" इति। याः काश्चिद्वास्या वासयोग्या आश्रयार्हाः ब्रह्मणोऽग्र्यास्तनवोऽग्र्याः श्रेष्ठा अभि-ध्यायेत्। यद्वा अस्य ब्रह्मणो या वा याः कश्चिदग्र्यास्तनव इति योजना। अस्मिन् पक्षे दैर्घ्यविसन्धी छान्दसौ। ता ब्रह्मबुद्ध्या-ऽभिध्यायेत्, अर्चयेत् पुष्पोपहारादिना पूजयेत् प्रतिमासु वा हृदये वा, निह्नुयाच्च तत्तदुपास्यदेवतात्माभिमानेनाध्यात्मपरि-च्छेदाभिमानं स्वाभाविकं देवताया आत्मभावापादनेन हित्वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ह्युयाच्चातस्ताभिः सहैवोपर्युपरि लोकेषु चरत्यथ

पृथगग्न्यादिदेवतात्वं च निह्नुयात् परित्यजेत्। चशब्दो ध्याना-र्चननिह्नवानां समुच्चयार्थः। तथाच श्रुत्यन्तरं ['तं यथोयथो-पासते तदेव भवति'] इति। 'देवो भूत्वा देवानप्येति' [इति 'च। यत एवं देवतात्मभावनया ब्रह्मतनुभूता देवता उपास्ते, अतस्ताभिर्ब्रह्मतनुरूपदेवताभिः सहैव तदैकात्म्यं प्राप्येति यावत्। उपर्युपरि लोकेषु जनतपःसत्यलोकेषु चरति उपासनातार-तम्याल्लोकफलविकल्पः। तत्र तत्रोपासनाफलानि तत्तद्देवता-त्मना भुङ्क्ते इत्यर्थः। यद्ययं देवतात्ममात्रदृष्टिस्तदा भोगान्ते पुनरिहावर्तते, [''अप्रतीकालम्बनान्नयतीति बादरायणः'' इति न्यायात्। अथ यदि ब्रह्मण्यहङ्ग्रहोपासकस्तदा कृत्स्नक्षये कृत्स्नस्य सर्वदेवतात्मनः सत्यलोकस्थस्य हिरण्यगर्भस्य क्षये अवसाने सम्पूर्णब्रह्मरूपः सन् पुरुषस्य पूर्णस्य परब्रह्मण एकत्वं सायुज्यमेति गच्छति क्रममुक्तिमुपैतीत्यर्थः। अभ्यासः प्रपाठक-समाप्त्यर्थः। अत्रेयं व्यवस्था। कार्यकारणोपाधिद्वयविलापनेन प्रत्यगेकरसतया ब्रह्म ध्यायत इहैव साक्षान्मुक्तिः, प्रारब्धफल-शेषभोगाय देहस्थितावपि स मुक्त एव। यः पुनः कार्य-कारणब्रह्मोपासकः स ब्रह्मण्यहङ्ग्रहाद्ब्रह्मलोकेऽर्चिरादिमार्गेण गत्वा तत्रोपासनफलभोगावसाने तत्रोत्पन्नसम्यक्तत्त्वज्ञानान्मुक्तिमुपैष्यती-त्यस्य क्रममुक्तिः। ये पुनः प्रतीकोपासका अन्नं ब्रह्म प्राणो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्स्नक्षय एकत्वमेति पुरुषस्य पुरुषस्य ॥ ६ ॥

इति मैत्र्युपनिषदि चतुर्थः प्रपाठकः ।

ब्रह्म आदित्यो ब्रह्म मनो ब्रह्मेत्येवंदृष्टयस्तेषां, 'न प्रतीकेन हि सः' इति न्यायेन, ब्रह्मक्रतोरभावात् ते यथोपासनं ब्रह्मलोका-दर्वाक्तनेषु लोकेषु फलमनुभूय पुनरावर्तन्ते, ब्रह्मलोकं गता अपि केचित् पञ्चाग्निदर्शनादिनिष्ठा इति ॥ ६ ॥

इति श्रीरामतीर्थविरचितायां मैत्रीशाखोपनिषद्दीपिकायां
चतुर्थः प्रपाठकः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ यथेयं कौत्सायनी स्तुतिः।
त्वं ब्रह्मा त्वञ्च वै विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः।
त्वमग्निर्वरुणो वायुस्त्वमिन्द्रस्त्वं निशाकरः॥
त्वमन्नस्त्वं यमस्त्वं पृथिवी त्वं विश्वं(१) त्वमथाच्युतः।
स्वार्थे स्वाभाविकेऽर्थे च बहुधा संस्थितिस्त्वयि॥

अथ पञ्चमः प्रपाठकः।

तदेवं ससाधनां ब्रह्मविद्यामुपदिश्येदानीमुक्तवक्ष्यमाणसर्वोपासनाङ्गभूतान्नमस्कारमन्त्रानाह "अथ यथेयं ० स्तुतिः" इति। कुत्सायनेन दृष्टा कौत्सायनी इयं वक्ष्यमाणा स्तुतिः। स्तुतिरूपो मन्त्रगण आरभ्यते। अथशब्द आरम्भार्थः। यथोपलक्ष्या तथारभ्यत इत्यर्थः। "त्वं ब्रह्मा ० निधनाय च" इति। ब्रह्मा हिरण्यगर्भः प्रजापतिर्विराट्। अद्यते उपजीव्यते सर्वैरिति वा अत्ति सर्वं स्वात्मन्युपसंहरतीति वा अन्नं, अन्नवदाचरतीत्यन्नः। तथाच श्रुत्यन्तरं ['अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यते'] इति (तैत्ति० उ०)। विश्वं चराचरम्। अथ च सर्वात्मकत्वेऽपि त्वमच्युतोऽप्रच्युतनिजस्वभावः कूटस्थ एवेत्यर्थः। स्वार्थः पुरुषार्थो धर्मादिचतुष्टयरूपः स्वाभाविकः प्राकृतिकः स्वस्वप्रकृत्यनुसार्यर्थस्तयोरुभयोर्निमित्तं लोकस्य त्वयि ब्रह्मणीश्वरे बहुधा संस्थितिर्नानामार्गेण त्वन्निष्ठता भवतीत्यर्थः। अथवा स्वार्थे स्वाभाविकेऽर्थे च लोकस्य या संस्थितिः प्रवृत्त्यादिनिष्ठा सा त्वय्यायते-

---

(१) स्वमिति पाठान्तरम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वेश्वर नमस्तुभ्यं विश्वात्मा विश्वकर्मकृत् ।
विश्वभुग्विश्वमायुस्त्वं विश्वक्रीडारतिप्रभुः ॥
नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च ।
अचिन्त्यायाप्रमेयाय अनादिनिधनाय च ॥ १ ॥

त्यर्थः । विश्वस्येष्टे इति विश्वेश्वरस्तस्य संबुद्धिः । तर्हि विश्वमन्यदिति शङ्कायामाह विश्वात्मेति । त्वमेव विश्वमित्यर्थः । यतो विश्वकर्मकृत् क्रियते तत्कर्म विश्वाख्यं कर्म कार्यं करोतीति विश्वकर्मकृत् । विश्वोपादानत्वाद्विश्वात्मेत्यर्थः । यद्वा विश्वेश्वरत्वे हेतुर्विश्वात्मेति । विश्वस्यात्मा स्वरूपं तत्रापि हेतुर्विश्वकर्मकृदिति । अतः कारणत्वात् स्वकार्यं विश्वं व्याप्य तन्नियमयन्नवस्थितो विश्वेश्वर इत्यर्थः । भोक्तारो जीवा अन्ये भविष्यन्तीति शङ्कां वारयति विश्वभुगिति । यो विश्वस्य भोक्ता प्रसिद्धः सोऽपि त्वमेवेत्यर्थः । किञ्च त्वमेव विश्वमायुः सर्वस्य सर्वमायुर्जीवनं प्राणरूपेण वा सर्वायुः । तथाच श्रुत्यन्तरं [‘यावद्ध्यस्मिंच्छरीरे प्राणो वसति तावदायुः’ (कौषी०अ० ३)] इति । किं बहुना त्वमेव विश्वक्रीडारत्योः प्रभुः बाह्योपकरणा प्रीतिः क्रीडा, तन्निरपेक्षा आन्तरप्रीतीरतिः । तयोस्त्वमेव स्वतन्त्रः समर्थ इत्यर्थः । शान्तात्मने कूटस्थस्वरूपाय गुह्यतमाय वाचामगोचराय अचिन्त्यायान्तरिन्द्रियाविषयाय अप्रमेयाय बाह्येन्द्रियाविषयाय अनादिनिधनाय नित्यसद्रूपायेत्यर्थः । चकारात् स्वयम्प्रकाशाय चेत्यर्थः । इतिशब्दोमन्त्रसमाप्त्यर्थः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तमो वा इदमग्र आसीदेकं तत् परे स्यात् तत्तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपं तत्सत्त्वमेवे-

---

मन्त्राणामारम्भे त्वं ब्रह्मा त्वं च वै विष्णुरित्यादिना ब्रह्मादिदेवतात्मत्वं प्रत्यग्ब्रह्मण उक्तं तत्र ब्रह्मादीनां तत्त्वान्तरत्वात् कथमित्थं स्तुतिरिति शङ्कानिरासायोत्तरा श्रुतिः प्रवृत्ते । तत्रैक एव यथोक्तश्चिदात्मा स्वमायागुणैस्तदवस्थाभेदैस्त्वानेकोऽनेकविशेषोऽनेकविधक्रियाप्रवर्तको न तत्त्वभेदः क्वाप्यस्तीति दर्शयन्ती श्रुतिर्ब्रह्मादित्रिमूर्तिभावेनास्यात्मन उपासनं विधातुं प्रथमं मूर्तित्रयव्यपदेशनिमित्तमाह "तमो वा ० तनवः" इति । इदं ब्रह्मविष्णुरुद्रादिकमग्रे सृष्ट्युपक्रमात्प्राक् तमो वै तम एव तमोगुणप्रधानमायामात्रमेवासीदेकमेकीभूतमनभिव्यक्तनामरूपमखण्डतमोमात्रमासीदित्यर्थः । एतेनामत्कारणवादोऽसत्कार्यवादश्च व्युदस्तः इदं तम इति सामानाधिकरण्योक्तेरग्र आसीदिति सत्त्वोक्तेश्च । तत् किं साङ्ख्याभिमतं प्रधानं नेत्याह तत्परे स्यादिति । तत् तमः परे कार्यकारणत्वातीते तत्कल्पनाधिष्ठाने चिदात्मनि स्याद्भवतीति यावत्, अचेतनस्य तस्य स्वातन्त्र्यानुपपत्तेरित्यर्थः । एवं जगतः प्रागवस्थां चेतनपराधीनामुक्त्वा तत्प्रवृत्तेरपि तदधीनतामाह तत्परेणेति । तत् कारणं प्रविलीनकार्यावस्थं तमः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रितं रसः सम्प्रास्रवत् सोऽंशोयं यश्चेतामात्रः प्रतिपुरुषः क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वेत्यस्य प्रागुक्ता एतास्तनवः। अथ यो ह

परेण चिदात्मनाऽधिष्ठानभूतेनेरितं प्रेरितं तच्चैतन्याभासव्याप्त्योपचितं बीजमिव सलिलादिव्याप्त्येत्यर्थः। विषमत्वं पूर्वावस्थाप्रच्युतिरूपमुच्छूनमिव बीजं साम्यावस्थात्यागेन तद्विलक्षणत्वं प्रयाति कार्योन्मुखं भवतीत्यर्थः। यद्यपि मायाव्याकृताविद्यादिशब्दवाच्यस्य कारणस्य नित्यैव चैतन्यव्याप्तिर्नित्यमेव तत्राध्यस्तत्वात्, तथापि सुषुप्तस्य स्वप्नादिवृत्त्युद्भववदबुद्धिपूर्विकैव कादाचित्की विद्याकर्मपूर्वप्रज्ञानुसारिणी चिदाभासव्याप्तिर्भवतीति न सृष्ट्यादिसान्तत्वशङ्कावकाश इति गमयितव्यम्। यद्दिदं परेरितस्य तमसो विषमत्वगमनमेतद्रूपं वै प्रसिद्धं रजो रजोगुणाख्यं कारणमित्यर्थः। तत्खलु रजः पूर्ववत् परेणेरितं सत्, विषमत्वं प्रयाति। यदिदं रजसो विषमत्वगमनमेतद्वै सत्त्वस्य सत्त्वगुणप्रधानकारणस्य रूपं प्रकारभेद इत्यर्थः। एवं गुणवैषम्यं सनिमित्तं कारणव्यापारमुक्त्वा तस्य कार्याकारपरिणामप्रकारमाह तत्सत्त्वमेवेति। तत्परेणात्मना पूर्ववदीरितं सत्त्वमेव न तमोरजसी तयोर्वक्ष्यमाणार्थाभिव्यञ्जकत्वासामर्थ्यात् रसः सारश्चिदानन्दप्रकाशः ['रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति' (तैत्ति० उ०)] इति श्रुत्यन्तरात्। स सम्प्रास्रवत् सम्यक् प्राकट्येनास्रवत्। सत्त्वमेव चिदात्मनो विशेषाकाराभि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खलु वावास्य तामसोऽंशोऽसौ स ब्रह्मचारिणो योऽयं रुद्रोऽथ यो ह खलु वावास्य राजसोऽंशोऽसौ स ब्रह्मचारिणो योऽयं ब्रह्माथ यो ह खलु वावास्य सात्त्विकोऽं-

---

व्यक्तियोग्याकारतया प्रसृतं सच्चिदात्माकारमेव विप्रसृतमित्यर्थः । अयमेव हि तत्र तत्र बुद्धिरिति च महानिति चाहमवभास्य इति च द्रष्टेति चाख्यायते, नान्य इत्यभिप्रेत्याह सोंऽश इति । सोऽयमंशोऽंश इवांशश्चिदात्मनो विशेषावस्था आकाशस्येव दारुसुषिराद्यवस्था । नतु निरवयवस्य परमार्थतोऽंशोऽस्ति । कोऽसौ यश्चेतामात्रः चेता चेतना साक्षिचैतन्यं तया मीयतेऽवभास्यत इति चेतामात्रः स्वप्रकाशसाक्षिमात्रेणानुभाव्य इत्यर्थः । यतः प्रतिपुरुषः प्रतिबिम्बो नानोदपात्रेष्विव सूर्यादिर्नानाविधार्थाकारबुद्धिवृत्तिषु विभाव्यमानत्वात् प्रतिपुरुष इत्यर्थः । लौकिकप्रतिबिम्बवदचैतन्यं वारयति क्षेत्रज्ञ इति । क्षेत्रं शरीरं धर्माधर्मबीजप्ररोहभूमित्वात् तदापादतलमस्तकमहमिति जानातीति क्षेत्रज्ञो जीव इत्यर्थः । तदुक्तं भगवता श्रीकृष्णेन,—

"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः" इति ।

तत्सद्भावं साधयति सङ्कल्पेति । सङ्कल्प इदं मया कर्तव्यमित्येवमाकारो मनसो विकारः, अध्यवसायः कर्तव्यविषयस्वरूपसाधनफलानां यथावदवधारणरूपा बुद्धिवृत्तिः, अभिमानोऽहमस्मिन् समर्थ इत्याद्यहङ्कारः । एतेषामचेतने मृत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽशोऽसौ स ब्रह्मचारिणो योऽयं विष्णुः स वा एष

शरीरेऽदर्शनाज्जीवच्छरीरे च दर्शनादेतानि लिङ्गानि शरीरातिरिक्ततया सद्भावप्रमापकाणि यस्य स सङ्कल्पाध्यवसायाभिमानलिङ्गः । एतैर्लिङ्गैर्देहादिविलक्षणोऽस्तीति सम्भाव्यमान इत्यर्थः । प्रजापतिः समष्टिवैराजपिण्डाभिमानी देवः, विश्वो व्यष्टिपिण्डाभिमानिनी देवता, इत्येवमाद्या एताः प्रागुक्ता अस्यैव क्षेत्रज्ञस्य सत्त्वपरिणामप्रतिबिम्बितस्य चिदात्मनस्तनवः, चिदात्मैव तत्तन्मूर्तिभेदेषु तत्तदात्मना विभाव्यमानोऽवतिष्ठते, नास्मात् तत्त्वान्तरभूतं किञ्चिदित्यर्थः । तथाच श्रुत्यन्तरं ['नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतः'] (बृहदा० अ० ५) इति । एतदुक्तं भवति किं कारणं ब्रह्मेति ब्रह्मवादिनां ब्रह्मणः सहकारिभूतजगत्कारणविमर्शे ['ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढां'] इति त्रिगुणात्मिका मायाख्या शक्तिरवधृता श्वेताश्वतराणां मन्त्रोपनिषदि । सा च ब्रह्मणः सर्वकारणत्वनिर्वोढ्री शक्तिस्तेनाधिष्ठीयमाना गुणत्रयविभागेन यदा विकृता भवति तदा तदधिष्ठाताऽपि तत्सत्तास्फूर्तिप्रदत्वेन तदनुगतो विकृत इव भवति । तत्र च यथाविकारव्यपदेशं सोऽपि व्यपदिश्यते, तत्रापि त्रिगुणात्मकेन कारणेनेश्वरान्तर्याम्यादिशब्दैर्व्यपदिश्यमानः सत्त्वादीनामेकैकप्राधान्येन ब्रह्मादिसंज्ञाभाग्भवति । तदा तत्रा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकस्त्रिधा भूतोऽष्टधैकादशधा द्वादशधाऽपरिमितधा

विर्भूतगुणविशेषवत्तया स उपास्यो व्यपदिश्यते गुणकार्यस्थूल-सूक्ष्मशरीरोपाध्यविशेषेण तदभिमानेन वा व्यवह्रियमाणो जीवः क्षेत्रज्ञः संसारी देवो मनुष्यस्तिर्यङ् स्थावर इति च व्यपदेश-भाग्भवति । अत्र सर्वत्र सत्त्वगुणपरिणामे एव चिदात्मनो विशेषाभिव्यक्तिर्नान्यत्र । सत्त्वस्य च रजस्तमःसम्पर्कविशेषाविशे-षाभ्यां चिदात्माविर्भावविशेषतारतम्यात् ज्ञानक्रियाशक्त्यैश्वर्यतार-तम्येन सर्वज्ञमूढामूढत्वादितारतम्यावभास इति । एतमेवाभिप्रायं विशदयति "अथ यो ह खलु ० अन्तर्बहिश्च" इति । अथ एवं प्रकारे व्यवस्थिते सति अस्यात्मनो यो ह खल्वित्थं वाव एव य एवेति सम्बन्धः । तामसस्तमःप्रधानोऽंशस्तमउपाधिको विशेषः असौ सः, हे ब्रह्मचारिणः, कोऽसौ योऽयं रुद्रः प्रसिद्ध इत्यर्थः । एवमुत्तरयोरपि पर्याययोर्व्याख्या । स वा एष एकः स वै पूर्वमुपपादितः एष इदानीमुपाध्यधिष्ठातृत्वेनोक्त एक एव रुद्रब्रह्मविष्ण्वात्मना त्रिधाभूतः कारणोपाधिमधि-ष्ठाय त्रिधाभूत इत्यर्थः । अष्टधा पञ्चविधप्राणादित्यौ सनक्षत्र-श्चन्द्रश्चेति त्रयः पञ्च भूतानि चेत्यष्टधेत्यर्थः । एकादशेन्द्रियभेद एकादशधा, तत्रैव मनोबुद्ध्योर्भेदे सति द्वादशधा । तत्तदि-न्द्रियवृत्तीनामनन्तत्वात् तद्भेदेनापरिमितधा, वाशब्दो विक-ल्पार्थः । अध्यात्मं वाधिभूतं वाधिदैवं वा यद्यत् किञ्चिदस्ति तत्सर्वमवभासयंस्तत्तदात्मना नानाविध उद्भूतोऽभिव्यक्त उद्भूतत्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वोद्भूत उद्भूतत्वाद्भूतं भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूवा(१) इत्यसा आत्मान्तर्बहिश्चान्तर्बहिश्च ॥ २ ॥

इति मैत्र्युपनिषदि पञ्चमः प्रपाठकः ।

देव भूतं भूतसंज्ञ आत्मा भवतीत्यर्थः, ['महद्भूतमनन्तमपारं' (बृहदा० आ० ४)] इति श्रुतेः, ['एको विष्णुर्महद्भूतं'] इति स्मृतेश्च । यतो भूतेषु प्रविष्टो भूतावभासकतया भूतनियन्तृतया चानुगतश्च चरति गच्छति भूतानि व्याप्नोत्यत उद्भूतत्वाद्भूतमिति योजना । अतएव भूतवर्गितया भूतानामधिपतिर्बभूवाधिष्ठाय पालयिताऽभवद्व्यवहारदृष्ट्येत्यर्थः । उपसंहारार्थ उत्तरो भागः । इत्येवमुक्तप्रकारेणासा असौ आत्मा यथाव्याख्यातोऽन्तःसाक्षिप्रमातृकर्त्रादिरूपेण वहिश्चेश्वरकालदेवतादिरूपेण विभाव्यते नान्य इत्यर्थः । अभ्यास आदरार्थः प्रपाठकसमाप्त्यर्थो वा ॥ २ ॥

इति श्रीरामतीर्थविरचितायां मैत्र्युपनिषद्दीपिकायां
पञ्चमः प्रपाठकः ॥ ० ॥

---

(१) बभूवेत्यसा इति पु० पा०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विधा वा एष आत्मानं बिभर्त्ययं यः प्राणो यश्चा-
सा आदित्योऽथ द्वौ वा एता अस्य पन्थाना अन्त-

अथ षष्ठः प्रपाठकः ।

योऽन्तर्बहिः सर्वजनेषु नित्यं चरत्यशान्तेषु सुशान्तरूपः ।
प्राणात्मनान्तर्बहिरंशुमालिरूपेण तस्मै सततं नमोऽस्तु ॥
नमो गुरुभ्यः सर्वेभ्यो येषां चरणसंस्मृतिः ।
सदौपनिषदे शुद्धे तत्त्वेऽर्पयति मे धियम् ॥

एवमियता ग्रन्थसन्दर्भेण चिदात्मैक एव प्रत्यग्ब्रह्मरूपेण विज्ञेयः स एव ब्रह्मादिरूपेणानेकविशेषावस्थो ध्येयश्चेति मुमुक्षुपेक्षितोऽर्थः सर्वो दर्शितो मुक्तिश्च चिदात्मसायुज्यप्राप्तिरभिहिता । इदानीमस्यैव चिदात्मनोऽनेकधोपास्यत्वायानेकमहिमानमाविष्कुर्वती श्रुतिर्मन्दमध्यमाधिकारिविषयास्तदुपासनाः सालम्बना अनेकप्रकारा विधातुं प्रवृत्त उत्तरेण प्रपाठकेन तत्त्वज्ञाननिष्ठापेक्षितानि साधनान्यपि कानिचिद्विधातुम् । अस्य च खिलत्वान्नातीवात्र सङ्गतयोऽपेक्ष्यन्ते तथापि यथामति सङ्गतिमूहमाना अक्षराणि व्याख्यास्यामः । तत्राऽध्यात्माधिभूतदेहब्रह्माण्डोपाधिभ्यां चिदात्मनः क्रियाशक्तिप्रधानलिङ्गानुगतचिदाभासाभेदेन प्राण आदित्यश्चेति द्विधा भेदं प्रकल्प्य तेनात्मनोपासनं विधातुमाह "द्विधा वा एष ० व्यावतते" इति । एष पूर्वप्रकृत आत्मा, वै प्रसिद्धः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बहिश्चाऽहोरात्रेणैतौ व्यावर्तेते। असौ वा आदित्यो बहिरात्मान्तरात्मा प्राणोऽतो बहिरात्मक्या

सर्वश्रुतिषु, द्विधा द्विप्रकारेण आत्मानं स्वं रूपं बिभर्ति धत्ते पालयति वा। प्रकारभेदमेव विशदयति यः प्राणो देहे पञ्चधात्मानं विभज्य स्थितोऽस्तीयमेका विधा, यश्चामा असौ ब्रह्माण्डकरण्डमध्ये जगदवभासकतयावस्थितोऽस्ति आदित्यः सोऽयमपरा विधेत्यर्थः। अध्यात्मं प्राणात्मना अधिदैवमादित्यात्मना च ब्रह्मरूपः चिदात्मा ध्येय इत्युपासनोत्पत्तिविधिं सूचयन्नाह अथेति। अथेदमुच्यते अस्यात्मन एतौ द्वौ पन्थानौ विशेषाभिव्यक्तिमार्गौ। कौ। अन्तर्देहाभ्यन्तरं बहिश्च देहादध्यात्मरूपाद्बाह्यो देशश्चेति द्वौ पन्थानावित्यर्थः। एतौ प्राणादित्यौ अहोरात्रेण अह्ना रात्र्या च व्यावर्तेते विपरिवर्तनं कुर्वाते इत्यर्थः। अन्तः किंरूपो बहिश्च किंरूपो व्यावर्तेते कथञ्च तद्व्यावर्तनमित्येतद्विशदयति "असौ वा आदित्यो ० गतिरित्येवं ह्याह" इति। असौ प्रसिद्धो वै आदित्यः सूर्यो बहिरात्मा प्राणोऽन्तरात्मा यत एवमतो बहिरात्मन इयं बहिरात्मकी तत्प्रयुक्तेति यावत्, तया बहिरात्मक्या गत्या परिवर्तनेनान्तरात्मनः प्राणस्य गतिरनुमीयत इत्येवमेवंप्रकारं हि यत आह आगमज्ञोऽतोऽनयोर्न वास्तवो भेद इति शेषः। अयमाशयः, सूर्यो हि मेरुं प्रदक्षिणी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गत्यान्तरात्मनोऽनुमीयते गतिरित्येवं ह्याहाथ यः कश्चिद्विद्वानपहतपाप्माऽक्षाध्यक्षोऽवदातमनास्तन्निष्ठा

कुर्वन्नहोरात्राभ्यां ब्रह्माण्डान्तः परिवर्तते प्राणोऽपि श्वासरूपेण देहान्तः परिभ्रमति, तत्रैकाहोरात्रसूर्यगत्योः प्राणस्यैकविंशति-सहस्रसङ्ख्याः श्वासा भवन्तीत्यागमशास्त्रसिद्धं प्राणपरिवर्तन-मनुमीयते, यद्वा शतसंवत्सरपरिमितं हि पुरुषायुः [‘शतायुर्वै पुरुषः शतेन्द्रियः’] इति श्रुतिसिद्धेः। तावत्कालं च प्राणः शरीरान्तः सञ्चरति, तत्रैकद्वित्रादिवर्षप्राणसञ्चरणपरिच्छेद आदित्यपरिवर्तनप्रचयाधीन इति तद्गत्या प्राणगतिरनुमीयत इति। इदानीमन्तरात्मगत्या बहिरात्मगत्यनुमानप्रकारमाह अथ य इति। अथशब्दः पर्यायान्तरारम्भार्थः। यः कश्चिद्विद्वान् प्राणादित्यात्मदर्शी अतएवापहतपाप्मा अध्यात्मपरिच्छेदाभि-मानात्मसङ्गरूपपाप्मना रहितोऽत एवाऽक्षाध्यक्ष इन्द्रियाध्यक्षस्तेषु स्वतन्त्रो नेन्द्रियपरवश इत्यर्थः। अतएवावदातमनाः निर्मल-चित्तः, तन्निष्ठस्तस्मिन्नुपास्ये निष्ठा तात्पर्यं यस्य स तन्निष्ठः सन्नावृत्तचक्षुर्बाह्यविषयव्यावृत्तेन्द्रियः स उ इति छेदः स एव तेनेति विपरिणेयम्। य एवंविधो विद्वान् तेनैवान्तरा-त्मिकया गत्या प्राणगत्या बहिरात्मन आदित्यस्य गतिरनुमीयत इत्येवं ह्याहेति व्याख्यातम्। एतदुक्तं भवति, अध्यात्माधिभू-तयोः पिण्डब्रह्माण्डयोः स्वस्वमानेन शतं वर्षाण्यायुःप्रमाण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवृत्तचक्षुः सो अन्तरात्मक्या गत्या बहिरात्मनोऽनुमीयते गतिरित्येवं ह्याह । अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो यः पश्यतीमां हिरण्यव-

---

मित्यस्य समत्वादध्यात्मगतप्राणात्मगत्या शतवर्षान्ते पिण्डपरित्यागलक्षणया बहिरात्मनोऽप्यादित्यस्य ब्रह्माण्डपिण्डपरित्यागरूपा गतिस्तन्मानेन शतवर्षान्ते भवेदित्यनुमीयते इति । अथवा या प्राणात्मनो गतिर्देहधारणलक्षणा प्राणापानव्यापारैः क्रियमाणा तया बाह्यात्मन आदित्यस्य ब्रह्माण्डविधारणरूपोदयास्तमयनिर्वर्त्याहोरात्रव्यापारैः क्रियमाणा गतिरनुमीयते एतच्च प्राकृतजनबुद्ध्यगोचरत्वाद्विद्दृष्टिगम्यत्वमभिप्रेत्य विद्वान्मध्ये निर्दिष्ट इति द्रष्टव्यम् । एतयोरन्यतरस्य गत्याऽन्यतरस्य गत्यनुमानोपदेशस्तयोरेकगतित्वचिन्तनार्थ इति । इदानीमनयोः स्थानभेदं गुणभेदञ्च सिद्धवदनूद्य व्यतिहारं तच्चिन्तनार्थं विधत्ते "अथ य एषोऽन्तरादित्ये ० एवाश्रितोऽन्नमत्ति" इति । गुणान्तरविधानारम्भार्थोऽथशब्दः । य एष प्रसिद्धोऽन्तरादित्ये आदित्याख्यस्य मण्डलस्य मध्ये हिरण्मयो हिरण्मय इव हिरण्मयो ज्योतिर्मयोऽन्तर्यामी पुरुषः पुरुषाकारादित्यदेवतान्तरनुप्रवेशेन लब्धपुरुषाकार इति यावत् । कोऽसौ हिरण्मयः पुरुषो य इमां पृथिवीं पश्यति इमामित्युपलक्षणं त्रैलोक्यमवभासयतीत्यर्थः । अस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यात् स एषोऽन्तरे हृत्पुष्कर एवाश्रितोऽन्नमत्ति॥
॥ १ ॥

अथ य एषोऽन्तरे हृत्पुष्कर एवाश्रितोऽन्नमत्ति स

पुरुषस्य हिरण्मयत्वे निमित्तं स्वयमेवाह हिरण्यवस्थादिति। हिरण्ये हिरण्मये तेजःसङ्घातात्मके मण्डलेऽवस्थादवस्थानात् तदभेदेनावस्थितत्वादित्यर्थः। "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो"रित्यवोपसर्गेऽवर्णलोपः। पश्यत्यमी हिरण्यवस्थादितिपाठः प्रामादिकः। यदि सत्यस्तदा द्वितीयार्थे प्रथमा विपरिणेया, इमाँल्लोकान् पश्यतीत्यर्थः। इदानीमस्याध्यात्ममत्रस्थानमाह स एष इति। यो हिरण्मयाण्डस्थतया हिरण्मयः पुरुष उक्तः स एषोऽन्तरे देहाभ्यन्तरे यद्धृत्पुष्करं हृदयकमलं तस्मिन् हृत्पुष्करे एव आश्रितस्तत्रैव प्राकट्यमुपगतः प्राणात्मा सन्नन्नमदनीयमत्ति भुङ्क्ते विषयान् वा शब्दादीनुपभुङ्क्ते इत्यर्थः॥ १ ॥

एवमादित्यमण्डलान्तरभिव्यक्तं हिरण्मयत्वादिगुणकं पुरुषमनूद्य तस्य हृद्यन्तर्वर्तिप्राणात्मभावं विधायेदानीमुक्तप्राणात्मानमनूद्य तस्यादित्यात्मभावं विदधाति "अथ य एषोऽन्तरे ० अन्नमत्तीति" इति। अन्नमत्तीत्यन्तोऽनुवादभागो व्याख्यातः। स एष एवाऽग्निरत्ता दिवि द्युलोके श्रितः आश्रितः स्थित इत्यर्थः। कोयमग्निरित्यत आह सौरः सूर्यतेजोरूपः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एषोऽग्निर्दिवि श्रितः सौरः कालाख्योऽदृश्यः सर्व-भूतान्यन्नमत्तीति। कः पुष्करः किम्मयो वेति। इदं वाव तत्पुष्करं योऽयमाकाशोऽस्येमाश्चतस्रो दिशश्चतस्र उपदिशो दलसंस्था आसं। अर्वाग्विचरत एतौ

स एव प्राणिनां कलनात् कालाख्यः कालसञ्ज्ञितः, अदृश्यः प्रत्यक्षागोचर एव सन् सर्वभूतान्येवान्नं तान्यत्ति सर्वभूतानि संहरति, इतिशब्दो व्यतिहारोपदेशसमाप्त्यर्थः। यत्र पुष्करे स्थितोऽन्नमत्तीत्यध्यात्ममुक्तं दिवि श्रितोऽन्नमत्तीति चाधिदैवं, तदुभयस्वरूपजिज्ञासया वालखिल्याः पृच्छन्ति "कः पुष्करः ० वेति" इति। स्पष्टार्थः। उत्तरमाह प्रजापतिः "इदं वाव ० आसं" इति। योऽयं प्रसिद्ध आकाश इदं वावेदमेव तत्पुष्करं, यदध्यात्महृत्पुष्करमुक्तं तदिदमेवाधिदैवं प्रसिद्धमाकाशं, नानयोः स्वरूपभेदोऽस्तीत्यर्थः। तथा चाकाशमेव हृदये ब्रह्माण्डान्तरे च पुष्करमिति स्वरूप-प्रश्नस्योत्तरमुक्तम्। किम्मय इति प्रश्नस्योत्तरं वदन् हृदय-पुष्करस्याऽष्टदलमयत्वं प्रसिद्धमिति मत्वाधिदैवपुष्करदलान्या-हास्येति। अस्याकाशपुष्करस्येमाः प्रसिद्धाः प्राच्याद्या आग्नेय्याद्याश्चतस्रश्चतस्रो दिशो दलसंस्था दलत्वेन स्थिता आसं आसन्नित्यर्थः। तथा च हृदयाकाशबाह्याकाशयोर्हृदयकमल-गताष्टदलानामष्टदिशाञ्चाभेदो ध्येय इति तात्पर्यार्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राणादित्या एता उपासीतोमित्येतदक्षरेण व्याहृतिभिः सावित्र्या चेति ॥ २ ॥

द्वे बाव ब्रह्मणो रूपे मूर्तञ्चामूर्तञ्चाथ यन्मूर्तं तदसत्यं यदमूर्तं तत्सत्यं तद्ब्रह्म तज्ज्योतिर्यज्ज्योतिः स

एवमध्यात्माधिदैवयोः प्राणादित्यपुरुषयोर्भेदेन प्रतीयमानस्थानगुणक्रियाणामभेददर्शनं विधाय पुनस्तावनूद्य सगायत्रिव्याहृतिप्रणवालम्बनं तयोरुपासनं विदधाति "अर्वाग्विचरत ० सावित्र्या चेति" इति । एतौ प्राणादित्यौ यथाव्याख्यातौ अर्वागदूरे सन्निहितौ विचरतः परिवर्तेते हृदये बाह्याकाशे चेत्यर्थः । एतौ उपासीत ध्यायेत् । कथं, ओमित्येतदक्षरेण एतेनाक्षरेणेत्येतत्, व्याहृतिभिर्भूर्भुवः स्वरित्येताभिस्तिसृभिः, सावित्र्या सवितृदेवत्यर्चा गायत्र्याख्यया चेति । इतिशब्द ओङ्काराद्यालम्बनविध्युपसंहारार्थः ॥ २ ॥

इदानीमुपासनालम्बनत्वेनोक्तस्योङ्कारस्य तत्त्वं प्रतिपादयिष्यंस्तत्स्तुतये तदुत्पत्तिप्रकारमाह "द्वे वाव ० युञ्जीतेति" इति । ब्रह्मणः परमात्मनो द्वे वाव द्वे एव रूपे रूप्यतेऽधिष्ठानतया ब्रह्माऽऽभ्यामिति रूपे निरूपके इत्यर्थः । के ते इत्यत आह, मूर्तञ्च मूर्तं मूर्च्छितावयवं कार्यं, अमूर्तं तद्विपरीतं च कारणम् । अथानयोर्मध्ये यन्मूर्तं तदसत्यं 'वाचारम्भणं विकारो नामधेयं' इति श्रुतेर्यदमूर्तं तत्सत्यं 'मृत्तिकेत्येव सत्यं इति (छान्दो० । ६ अ०)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आदित्यः स वा एष ओमित्येतदात्माभवत् स त्रेधात्मानं व्यकुरुत ओमिति तिस्रो मात्रा एताभिः सर्वमिदमोतं

श्रुतेः यत्सत्यं परमार्थसत्यं सर्वाधिष्ठानं तद्ब्रह्म परिवृढं 'सदेव सोम्येदमग्र आसीत् तत्सत्यं स आत्मा' इति श्रुतेः। ब्रह्मशब्दार्थमाह, यद्ब्रह्म तत् ज्योतिः प्रकाशस्वभाव यत् तज्ज्योतिर्ब्रह्माख्यं स आदित्यः सूर्यः 'येन सूर्यस्तपति तेजसेद्धः' इति श्रुतेः। स आदित्यो वै एष ब्रह्मप्रकाशात्मक ओमित्येतदात्मा ओङ्कार-स्वरूपोऽभवत् प्रणवात्मनोदित इत्यर्थः। ओङ्कारो ह्यनुज्ञाचरं प्रसिद्धं 'तद्वा एतदनुज्ञाचरं यद्धि किञ्चानुजानात्योमित्येव तदाह' इति (छान्दो०। १ अ०) श्रुतेः। आदित्यस्यानुज्ञां कुर्वन्निव जगतामुदेति 'य एवासौ तपति तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति' इति श्रुतेः। एवं प्रणवीभूतः स आदित्य आत्मानं प्रणवं त्रेधा त्रिप्रकारमकुरुत कृतवान् ओमिति अ उ म् इति तिस्रो मात्रा अवयवाः, एताभिः सर्वमिदमोतं प्रोतञ्चैव। यथा दीर्घतन्तुषु तिर्यक्तन्तवः प्रोतास्तिर्यक्तन्तुषु दीर्घतन्तव ओता वैपरीत्येन वा परस्परं संयोगविशेषेणैकीभूताः सन्तः पटशब्दवाच्या भवन्त्येवं प्रणवात्मके मय्येवाशेषस्योतप्रोततयावस्थानादहमेव प्रण-वात्मोतञ्च प्रोतञ्चास्मि न मत्तोऽन्यत् किञ्चिदित्येवं ह्याह। स आदित्यो यतस्तस्मादेतद्वै एष वै आदित्य ओमित्योङ्कार एवेत्येवं ध्यायत चिन्तयत हे वालखिल्याः। ध्यानशब्दार्थमाह आत्मानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रोतं चैवास्मीत्येवं ह्याहैतद्वा आदित्य ओमित्येवं ध्यायत आत्मानं युञ्जीतेति ॥ ३ ॥

अथान्यत्राप्युक्तमथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ

प्राणप्रधानं प्रत्यञ्चमादित्ये आदित्यञ्चात्मनि युञ्जीत, व्यत्ययो बहुलमिति लकारवचनव्यत्ययेन योजयत, एकात्मतां भावयतेत्यर्थः। इतीत्यनुवाकसमाप्त्यर्थः ॥ ३ ॥

ॐकारेणात्माभिध्यानविधिं महीकुर्वंस्तत्रैव विशेषान्तरं विधित्सन्नाह "अथान्यत्राप्युक्तं ० तस्य तत्" इति। अथैतदन्यत्र छान्दोग्येऽप्युक्तं प्रणवस्योपासनं, यद्यपि तत्राङ्गावबद्धमुपासनमिह तु स्वतन्त्रं तथापि स्तुत्यर्थमुदाहरणं न गुणोपसंहारार्थमिति द्रष्टव्यम्। प्रणवोद्गीथयोरेकत्वकथनारम्भार्थोऽथशब्दः। खलुशब्दः कर्मप्रकरणोक्तोद्गीथस्मारणार्थः। य उद्गीथः सामगानामुद्गीथभक्त्यवयव ओङ्कारः स बह्वृचानां शस्त्राङ्गभूतः प्रणवः, यश्च बह्वृचानां प्रणवः स उद्गातॄणामुद्गीथः। एवं शस्त्रस्तोत्राङ्गतया भिन्नस्थाननिवेशिनोरोङ्कारव्यक्त्योरभेददृष्टिं विधाय तस्योद्गीथात्मकस्य प्रणवस्यादित्यात्मना द्रष्टव्यतामाह, इत्यसौ वा आदित्य उद्गीथ उद्गीथावयव ओङ्कार इत्यर्थः। एष आदित्य एव प्रणवः शस्त्राङ्गभूत ओङ्कार इत्येवं हि आह छान्दोग्यश्रुतिरित्यर्थः। एवं स्तुत्या महीकृतमादित्यं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एष प्रणवा इत्येवं ह्याहोद्गीथं प्रणवाख्यं प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं त्रिपदं त्र्यक्षरं पुनः पञ्चधा ज्ञेयं निहितं गुहायामित्येवं ह्याहोर्द्ध्वमूलं त्रिपाद्ब्रह्म

पुनर्विशिनष्टि गुणान्तरविशिष्टतया ध्यानार्थं, उद्गीथमित्यादिना। छन्दोगानामुद्गीथभक्त्यवयवत्वेनोद्गीथं बह्वृचानां शास्त्रान्तर्गतप्रणवाख्यं प्रणेतारं प्रकर्षेण तत्तत्कर्मणां प्रवर्तयितारमत एव प्रणवाख्यमित्यर्थः, भाः प्रकाशो रूपं स्वरूपं यस्य स भारूपस्तं, विगता नित्य-निवृत्ता निद्राऽविद्या तमोरूपा यस्मात् तं विगतनिद्रं, विजरं जरारहितं सदैकरूपमिति यावत्, विमृत्युं विगतमृत्युमविनाशिनं, त्रीणि पदानि यस्य जाग्रत्स्वप्नसुषुप्ताख्यानि प्राणरूपस्य भूर्भुवः-स्वरिति त्रैलोक्याख्यान्यादित्यरूपस्य स त्रिपदस्तं त्रिपदं, त्रीण्य-क्षराणि यस्याकारोकारमकाराख्यानि प्रणवरूपस्य स त्र्यक्षरस्तं त्र्यक्षरं, पुनः पञ्चधा ज्ञेयं विचिन्त्यं यतो *(चिन्तयतो) गुहायां देहकुहर-रूपायां निहितमाश्रितं देहान्तश्चरन्तं प्राणापानादिरूपेण पञ्चधा ज्ञेयमित्यर्थः। इत्येवं हि आह गुणविधायिनी श्रुतिरिति शेषः। एवं विशेषितमोमित्यनेनैतदुपासीतेति वक्ष्यमाणेनान्वयः। उक्तविशेषण-स्यादित्यात्मनो भारूपत्वं विशेषतो ध्येयमित्यभिप्रेत्य वाच्यवाचकयोः

---

* चितिं यत इति लिखितं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शाखा आकाशवाय्वग्न्युदकभूम्यादय एकोऽश्वत्थनामै-
तद्ब्रह्मैतस्यैतत्तेजो यदसा[१] आदित्य ओमित्येतदक्षरस्य
चैतत् तस्मादोमित्यनेनैतदुपासीताजस्रमित्येकोऽस्य
सम्बोधयितेत्येवं ह्याह ।

परब्रह्मप्रणवयोः सारभूतोऽयं सवितेति तन्महिमानमाविष्करोति ऊर्द्ध्वमूलमिति । ऊर्द्ध्वं विकारातीतं परं ब्रह्म मूलमुपादानम् । तदेव मूलं स्वरूपतो निर्दिशति त्रिपाद्ब्रह्मेति । त्रिपादस्यामृतं दिवीति मन्त्रभागप्रकाशितं विकारातीतं ब्रह्मास्य वाच्यप्रपञ्च-स्याश्वत्थनाम्न ऊर्द्ध्वं मूलमित्यर्थः । अस्य शाखा आकाशादयो विकाराः, भूम्यादय इत्यादिपदेन चराचरग्रहः, शिष्टं प्रसिद्धार्थम् । एवंलक्षणः एको ब्रह्माण्डलक्षण समष्टिपिण्डोऽश्वत्थनामा श्वःपर्यन्तं स्थास्यतीति विश्वासानर्हत्वादश्वत्थमन्त्र इत्यर्थः । यदेतदश्वत्थसञ्ज्ञितं जगदेतद्ब्रह्म ब्रह्मोपादानत्वान्न ततोऽन्यदित्यर्थः, तथाच काठक-श्रुतिः 'ऊर्द्ध्वमूलो अवाङ्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते' इति । एतस्य सर्ववाच्याश्रयतया सर्वात्म-कस्य ब्रह्मण एतत् तेजः प्रकाशः सार इत्यर्थः । किमित्युच्यते यदसा आदित्यो योऽसावादित्यः प्रसिद्ध एतद्ब्रह्मणस्तेज इति योजना । सर्ववाच्याधिष्ठानब्रह्मसारत्वमुक्त्वा सर्ववाचकाधिष्ठानप्रणव-सारताञ्चास्योपदिशति ओमित्येतदक्षरस्य चैतदिति एतत् तेजो यदसा आदित्य इति पूर्वेण योजना । ओङ्कारादित्ययोरुक्तं

---

(१) यदसावादित्य इति पु० पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतदेवाक्षरं पुण्यमेतदेवाक्षरं परम् ।
एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ ४ ॥

अथान्यत्राप्युक्तं स्वनवत्येषास्य तनूर्या ओमिति स्त्रीपुन्नपुंसकेति लिङ्गवत्येषाऽथाग्निर्वायुरादित्या इति

महिमानमनूद्योपास्यत्वं सिद्धमुपसंहरति तस्मादिति । एतत् प्राणादित्यात्मकं तत्त्वमजस्रमुपासीतेति सम्बन्धः । इतिशब्द उपासनविध्यनुवादसमाप्त्यर्थः । प्रणवेनोपासनविधिस्तुतये प्रणव-माहात्म्यवादिवाक्यमुदाहरति एकोऽस्येति । अस्य प्रणवस्य एकः श्लोकरूपो मन्त्रः *सम्बोधयिता माहात्म्यप्रकाशको विद्यते इत्येवं ह्याह कठश्रुतिरित्यर्थः । तमेव श्लोकं किञ्चिदक्षरभेदेन पठति एतदिति । एतदेवाक्षरं प्रणवाख्यं पुण्यं पुण्यप्रदं पुण्यकर्मसु प्रयुज्यमानमित्यर्थः, एतदेवाक्षरं परं परब्रह्मप्रकाशकं मोक्षद-मित्यर्थः । किं बहुना एतदेवाक्षरं ज्ञात्वा ममेष्टदमेतदेव नान्यदिति निश्चित्य तत्परः सन् यो यदिच्छति अभ्युदयं वा मोक्षं वा फलं तस्य तद्भवत्येवेत्यर्थः ॥ ४ ॥

पुनरप्युपास्यस्यात्मनो गुणान्तरविधानायोत्तरोऽनुवाकः "अथान्यत्राप्युक्तं ० अक्षरमिति" इति । अस्य प्राणादित्यात्मन एषा तनूस्तनुः स्वनवती शब्दवती । सा केत्यत आह या ओमितीति ओङ्काररूपा तनुरुदात्तानुदात्तस्वरितरूपत्रैस्वर्येणोच्चार्यमाणा स्वनवतीत्यर्थः । प्रणवावयवेष्वकारादिषु एकैकं त्रिकं त्रिकमवयवशो

---

* सम्बन्धयितेति टीकापाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भास्वत्येषाथ ब्रह्मा रुद्रो विष्णुरित्यधिपतिवत्येषाथ गार्हपत्यो दक्षिणाग्निराहवनीया इति मुखवत्येषाथ ऋग्यजुः सामेति विज्ञानवत्येषा भूर्भुवः स्वरिति लोकवत्येषाथ भूतं भव्यं भविष्यदिति कालवत्येषाथ प्राणोऽग्निः सूर्या इति प्रतापवत्येषाथान्नमापश्चन्द्रमा इत्याप्यायनवत्येषाऽथ बुद्धिर्मनोऽहङ्कारा इति चेतनवत्येषाथ प्राणोऽपानो व्याना[१] इति प्राणवत्येषेत्यत ओमित्युक्तेनैताः प्रस्तुता अर्चिता अर्पिता भवन्तीत्येवं ह्याहैतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोमित्येतदक्षरमिति ॥ ५ ॥

विभज्य प्रणवावयविनः स्वनवत्याद्यात्मतामापाद्य तादृक्प्रणवतनुत्वेन प्राणादित्यात्मनस्तत्तद्गुणवैशिष्ट्यं ध्येयमिति प्रकरणार्थः। येषां ये स्वभावसिद्धा धर्मास्तैस्तद्वत्येषेति सुबोधोऽक्षरार्थः, इति यतः अतः ओमित्युक्तेनाक्षरेण एताः प्रस्तुताः स्वनवत्याद्यास्तनवोऽर्चिताः पूजिताः स्तुताः अर्पिताः प्राणादित्यात्मनि विशेषणत्वेन समर्पिताः समारोपिता भवन्तीत्येवं हि आह एतमर्थं प्रश्नश्रुतिरित्यर्थः। तामेव पठति एतद्वा इति। पिप्पलाद आचार्यः सत्यकामं शिष्यं प्रत्याह हे सत्यकाम ओमित्येतदक्षरमिति यदस्ति एतद्वै एतदेव परञ्च ब्रह्म अपरञ्च ब्रह्मेति विद्धीति। परापरब्रह्मज्ञानोपासनयोरालम्बनमेतदेवाक्षरमित्यर्थः ॥ ५ ॥

---

(१) व्यान इति पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथाव्याहृतं वा इदमासीत् स सत्यं प्रजापतिस्तपस्तप्त्वाऽनुव्याहरद्भूर्भुवः स्वरित्येषैवास्य प्रजापतेः स्थविष्ठा तनूर्या लोकवतीति स्वरित्यस्याः शिरो नाभिर्भुवो भूः पादा आदित्यश्चक्षुः। चक्षुरायत्ता हि पुरुषस्य महती मात्रा चक्षुषा ह्ययं मात्राश्चरति सत्यं वै

एतौ प्राणादित्या एता उपासीतोमित्येतदक्षरेण व्याहृतिभिः सावित्र्या चेति यत् सूत्रमुपन्यस्तं तत्र प्रणवापेक्षितो विशेषः सर्व उक्तः, इदानीं व्याहृत्यपेक्षितो विशेषस्तदुत्पत्त्यादिप्रशंसनेनोपपादनीय इत्युत्तरोऽनुवाक आरभ्यते "अथाव्याहृतं ० चक्षुः" इति। अथेति व्याहृतिव्याख्यानारम्भार्थः। इदं त्रैलोक्यं पूर्वमव्याहृतमशब्दनिर्दिष्टं वै आसीत्, सत्यं स प्रजापतिरिति सम्बन्धः सच्च त्यच्चेति सत्यं पञ्चभूतपरिणामात्मकमव्याहृतमासीत्। तदा स प्रजापतिस्त्रैलोक्यशरीरो ब्रह्मा तपस्तप्त्वा प्रागाहितसंस्कारोद्बोधकमालोचनं कृत्वा भूर्भुवः स्वरित्येवमनुक्रमेणोच्चारितवान् पादनाभिशिरःप्रदेशानालभ्य भूर्भुवःस्वरिति क्रमेणोच्चारितवानित्यर्थः। एवं स्पष्टोच्चारणे हेतुमाह एषैव लोकत्रयात्मिकास्य प्रजापतेः स्थविष्ठा स्थूलतमा तनूः शरीरं या लोकवतीति पूर्वानुवाकेऽवोचमित्यध्याहारः। तत्र का व्याहृतिः किमङ्गवाचिकेत्येतद्विभजते स्वरित्यादिना।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्षुरक्षिण्यवस्थितो हि पुरुषः सर्वार्थेषु चरत्येतस्मात् भूर्भुवः स्वरित्युपासीतानेन हि प्रजापतिर्विश्वात्मा विश्वचक्षुरिवोपासितो भवतीत्येवं ह्याहैषा वै प्रजापते-

---

अस्यास्तन्वाः। एवं व्याहृत्युत्पत्तिं तदर्थञ्चोपदिश्य प्रकृतस्यादित्यात्मन उपास्यस्य तत्सम्बन्धं वक्तुं व्याहृतिशरीरप्रजापत्यवयवतां तस्योपदिशति आदित्यश्चक्षुरिति। सर्वाङ्गेषु चक्षुषः प्राधान्यमुपपादयन्नादित्यं महीकरोति "चक्षुरायत्ता ० उपासीत" इति। पुरुषस्य व्यवहर्तुः महती अपरिमिता मात्रा मीयते ज्ञायत इति मात्रा विषयः मितिरेव वा मात्रा विषयसिद्धिः, हि निश्चितं चक्षुरायत्ता चक्षुरधीना। उक्तमर्थं लोकप्रसिद्ध्योपपादयति हि यस्मादयं पुरुषश्चक्षुषा मात्राः विषयांश्चरति दूरस्थानपि निम्नोन्नतसमविषमदेशानपि प्रतिपद्यते, अतश्चक्षुरायत्ता पुरुषस्य महती मात्रेत्यर्थः। प्रजापतेर्मुख्याङ्गत्वेनादित्यं महीकृत्येदानीं साक्षादेव प्रजापत्यात्मतां सम्पादयति सत्यमिति। वै प्रसिद्धं चक्षुः सत्यं चक्षुर्दृष्टस्य सत्यत्वप्रसिद्धेः प्रजापतिरपि सत्यं सत्पदात्मकत्रैलोक्यशरीरत्वात्, अतश्चक्षुरादित्यः सत्यमित्युक्ते सत्यात्मा प्रजापतिरादित्य इत्युक्तं भवतीति भावः। चक्षुषः सत्यत्वमुपपादयति अक्षिणीति। सत्यविसंवादितया हि प्रसिद्धमेतदित्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वभृत्तनूरेतस्यामिदं सर्वमन्तर्हितमस्मिंश्च सर्वस्मिन्नेषान्तर्हितेति तस्मादेषोपासीत ॥ ६ ॥

तत्सवितुर्वरेण्यमित्यसौ वा आदित्यः सविता स वा एवं प्रवरणीय* आत्मकामेनेत्याहुर्ब्रह्मवादिनोऽथ

उपसंहरत्येतस्मादिति। उक्ताद्धेतोरित्यर्थः। अनेन हि व्याहृत्यात्मतयादित्याऽऽत्मोपासनेन विश्वचक्षुः सूर्य इव विश्वात्मा प्रजापतिरूपासितो भवतीत्येवं ह्याह कश्चिच्छ्रुत्यन्तरमिति शेषः। किमाहेति तदाह एषेति। एषा वै पूर्वोक्ता सूर्यरूपा प्रजापतेर्ब्रह्मणो विश्वं बिभर्तीति विश्वभृत् तनूः शरीरं। कथमस्या विश्वभृत्त्वमिति तदाह एतस्यामिति। एतस्यां तनौ इदं सर्वं दृश्यमन्तर्हितं गूढं आदित्यप्रकाशाच्छादितमेव सर्वमित्यर्थः। तथास्मिंश्च सर्वस्मिन् दृश्ये विषये एषा तनूरन्तर्हिता तत्तदर्थप्रकाशकत्वेन तत्तदात्मतामापन्ना सती प्राकृतैर्जनैः परिपूर्णा न दृश्यत इत्यर्थः। यद्वा प्राणरूपेण सर्वस्मिन्नेषान्तर्हितेत्यर्थः। व्याहृतिगुणविधिमुपसंहरति तस्मादिति। एषा व्याहृत्यात्मिका तनूरुक्ता तस्मादेतां तथैवोपासीतेति योजना ॥ ६ ॥

इदानीं पूर्वं प्रतिज्ञातां सावित्रीशरीरताञ्चास्योपपादयितुमुत्तरानुवाक आरभ्यते "तत्सवितुः ० ब्रह्मवादिनः" इति।

---

* प्रचरणीय इति पाठान्तरं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भर्गो देवस्य धीमहीति सविता वै देवस्ततो योऽस्य भर्गाख्यस्तं चिन्तयामीत्याहुर्ब्रह्मवादिनोऽथ धियो यो नः प्रचोदयादिति बुद्धयो वै धियस्ता योऽस्माकं

आदौ मन्त्रप्रतीकान्यादाय व्याचष्टे तत्सवितुर्वरेण्यमिति प्रथमः पादस्तस्यार्थोऽसौ वा इत्यादिनोच्यते। तत्र सवितुस्तत्स्वरूपं वरेण्यमित्यन्वये सवितुरिति षष्ठी पुरुषस्य चैतन्यमितिवदविवक्षितस्वार्थेति मत्वा सवितृपदार्थमाहासौ वा इति। असौ वै प्रसिद्धो जगदवभासकत्वेन विभाव्यमानः सविता सवितुरिति मन्त्रपदेनोक्त इत्यर्थः। वरेण्यशब्दार्थमाह स वा इति। स वै स एव सविता, एवं यथोक्तात्मस्वरूपेण प्रवरणीयः प्रकर्षेण तदेकनिष्ठतया प्रार्थनीयस्तदात्मभावना कार्येति यावत्, केन आत्मकामेन, काम्यत इति काम आत्मैव कामः प्राप्यो यस्य स आत्मकामस्तेन आत्मनः स्वाभाविकस्वरूपाविर्भावकामेनेति यावत्। इत्याहुर्ब्रह्मवादिनो ब्रह्मवदनशीला वेदार्थविद इत्यर्थः। द्वितीयपादप्रतीकारम्भार्थोऽथशब्दः। भर्गो देवस्य धीमहीति प्रतीकग्रहणम्। तत्र देवपदस्यार्थमाह सविता वै देवः। सवितैव देवशब्दार्थः, स एव द्योतनाद्देव उच्यते अत्रापि षष्ठ्यर्थो न विवक्षितः। ततस्तस्मात् द्योतनस्वभावत्वाद्योऽस्य सवितुर्भर्गाख्यो व्याख्यास्यमानभर्गशब्दवाच्य आत्मा तं चिन्तयामीति धीमहीत्यस्यार्थमाहुर्ब्रह्मवादिन इति। पूर्ववत् चिन्तयामीत्येकवचनमर्थतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रचोदयादित्याहुर्ब्रह्मवादिनः। अथ भर्गा इति यो ह वा अमुष्मिन्नादित्ये निहितस्तारकोऽक्षिणि वैष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गा भर्जयतीति वैष भर्गा इति रुद्रो ब्रह्मवादिनोऽथ भ इति भासयतीमान्

पर्यायनिर्देशनपरं न तु धीमहीत्युक्तबहुवचनस्यैकवचनान्तत्वेनोह-प्रदर्शनार्थं, 'वयं स्याम पतयो रयीणां' इतिवत् कर्त्रैक्येऽपि मन्त्रेषु बहुवचनप्रयोगस्य साधुत्वात् चक्षुरादिकरणोपाधिभेदेनैकस्मिन्नपि बहुत्वसम्भवादेति द्रष्टव्यम्। अथ तृतीयपादग्रहो धियो यो नः प्रचोदयादिति। धीशब्दार्थः प्रसिद्ध एवेत्याह बुद्धयो वै धिय इति। अन्तःकरणवृत्तय इत्यर्थः। ताः बुद्धीरस्माक-मस्मदीयाः यः प्रचोदयात् प्रकृष्टं प्रेरयत्वित्याशिषि लिङ् इत्याहुरित्युक्तार्थम्। तथा चेत्थं मन्त्रयोजना, यो देवः सविता तस्य सवितुर्देवस्य तद्वरेण्यं भर्गाख्यं वयं धीमहि स नो धियो धीः प्रचोदयादिति। यदुक्तं मन्त्रव्याख्यानेऽसौ वा आदित्यः सविता, सविता वै देवः, यस्य भर्गाख्य इति च तत्रादित्य-सवितृभर्गशब्दा न स्पष्टार्था इति तान् व्याख्यातुमारभमाणो ऽतिगहनार्थत्वाद्भर्गशब्दार्थं तावदाह "अथ भर्गा ० भर्गः" इति। अथ पदविशेषार्थ उच्यते भर्ग इति, कोऽर्थोऽयमेव यो ह य एव वै य आदित्ये तिष्ठन् यश्चक्षुषि तिष्ठन्निति च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोकान् र इति रञ्जयतीमानि भूतानि ग इति गच्छन्त्यस्मिन्नागच्छन्त्यस्मादिमाः प्रजास्तस्माद्भरगत्वाद्भर्गः। शश्वत् सूयमानात् सूर्यः सवनात् सविताऽऽ-

अत्यन्तरप्रसिद्धोऽमुष्मिन्नादित्ये मण्डलात्मनि निहितः सन्निहितस्तथाक्षिणि चक्षुर्मण्डले वा यस्तारकः कृष्णतारकोपलक्षितोऽन्तर्यामी देव एष भर्गाख्य इति। भर्गत्वमस्य कथमित्यपेक्षायां तन्नाम निर्वक्ति भाभिरित्यादिना। भाभिः किरणैरधिष्ठानधर्मैरस्य गतिर्गमनं विषयव्याप्तिरस्येति व्युत्पत्तेर्भर्ग इत्यर्क निर्वचनमित्यर्थः। निर्वचनान्तरमाह भर्जयतीति। वा अथवा भर्जयति जगत् संहरतीति रुद्रो भर्ग इति ब्रह्मवादिन आहुरिति योजना। इदानीं भकाररेफगकाराणां प्रत्येकनिर्वचनं ब्रुवन्नस्य भर्गाख्यां सहीकरोति अथ भ इत्यादिना। भासयति तेजोमण्डलान्तर्गतचित्प्रकाशेनेमान् सर्वानेव लोकानिति भ इत्युच्यत इत्यर्थः। इमानि भूतानि स्थावरजङ्गमात्मकानि प्राणानुगतचिदानन्दात्मना रञ्जयति प्रीणयति सुखासक्तं करोतीति र उच्यत इत्यर्थः। अस्मिन् सर्वकारणात्मनि सुषुप्तिप्रलययोः सर्वाः इमाः प्रजा गच्छन्ति लयं प्राप्नुवन्ति तथा प्रबोधसृष्ट्योरस्मादेवागच्छन्त्याविर्भवन्तीति ग इत्युच्यत इत्यर्थः। तस्माद्भासनाद्रञ्जनाद्गमनाच्च भरगत्वाद्भर्ग इति सर्वात्मोच्यत इत्यर्थः। इदानीमादित्यादिनामनिर्वचनं कुर्वंस्तत्पर्यायशब्दानपि कांश्चिन्निर्वक्ति "शश्वत् ० इत्याह"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दानादादित्यः पवनात् पावनोऽथापो प्यायनादित्येवं ह्याह। खल्वात्मनो त्मा नेतामृताख्यश्चेता मन्ता गन्तोत्स्रष्टानन्दयिता कर्ता वक्ता रसयिता घ्राता द्रष्टा श्रोता स्पृशति च विभुर्विग्रहे सन्निविष्टा इत्येवं ह्याह।

इति। शश्वत् पुनः पुनः सूयमानात् सवनकरणात् सूर्यः सूर्यो हि प्रातरादिसवनकर्ता प्रसिद्ध इत्यर्थः। सवनादन्नादिनिष्पादनेन प्राणिनां प्रसवनात् सविता। आदानाद्भौमरसानां प्राणायुषां वा आदित्यः। पवनात् पवित्रीकरणात् पावनो वाय्वात्माप्येष इत्यर्थः। अथ अपि आपो जलमप्ययमित्यर्थः। कुतः प्यायना-ज्जगदाप्यायनादित्यर्थः। इत्येवं हि नामनिर्वचनान्यभिप्रेत्याहाचार्य इत्यर्थः। एवं मन्त्रपादद्वयोक्तमाधिदैवकं तत्त्वं निरुच्य तृतीय-पादोक्तमाध्यात्मिकं तत्त्वं निर्वक्ति "खल्वात्मनो ० ह्याह" इति। अमृताख्यः प्राणरूपः प्राणो वा अमृतमिति श्रुत्यन्तरात् अमृताख्यः खलु प्राणरूप आत्मनः कार्यकारणसङ्घातस्य नेता प्राणोपाधिक आत्मा मर्त्यसङ्घातनेतृत्वेन ततो विलक्षणत्वादमृताख्य इत्यर्थः। चित्तवृत्त्युपाधिकश्चेता, मनोवृत्त्युपाधिना मन्ता, पादोपाधिप्रधानो गन्ता, पायूपाधिनोत्स्रष्टा, उपस्थोपाधिना-ऽऽनन्दयिता, हस्तोपाधिकः कर्ता, वागिन्द्रियोपाधिको वक्ता, रसोपाधिको रसयिता प्राणोपाधिर्घ्राता चक्षुरुपाधिको द्रष्टा श्रोत्रोपाधिः श्रोता त्वगिन्द्रियोपाधिः स्पृशति स्प्रष्टा भवतीत्यर्थः,

5042
State ... Lucknow
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ यत्र द्वैतीभूतं विज्ञानं तत्र हि शृणोति पश्यति जिघ्रति रसयति चैव स्पर्शयति सर्वमात्मा जानीतेति

चकाराद्बुद्ध्याध्यवसिताहङ्कारेणाभिमन्ता चोच्यते । कोऽयमेवं व्यपदिश्यत इत्यत आह विभुर्व्यापको विग्रहे देहे सन्निविष्टः सम्यगभिमानितया निविष्टः स्रष्टेवेश्वरो देहमनुप्रविष्टः प्राणान्तः-करणेन्द्रियोपाधिभिर्नानाव्यपदेशभाग्भवति स एकः सर्वबुद्धि-प्रेरकः आत्मोपास्य इत्यभिप्रायः इत्येवं ह्याहेति पूर्ववत् । नन्वेकस्यात्मनोऽनेकोपाधिकृतः संज्ञाभेदः इत्ययुक्तं प्रतीय-मानप्रातिस्विककार्यभेदेनात्मभेदस्य प्रामाणिकत्वादिति प्रासङ्गिकं चोद्यं परिहर्तुमात्मानात्मतत्त्वं निरूपयति "अथ यत्र ० तदवाच्य" इति । अथैवं सति आत्मभेदशङ्का न कार्येति शेषः । यत्र द्वैतीभूतं भेदमापन्नं विज्ञानं चित्प्रकाशस्तत्र हि तस्यामवस्थायां जाग्रदादौ शृणोति पश्यतीत्यादिव्यपदेश-भागात्मा भवति न स्वभावत इत्यर्थः । कथमेतदवगम्यत इति तत्राह सर्वमात्मा जानीतेतीति सर्वं सर्वेन्द्रियद्वारं व्यवहार-जातमात्मा एक एव जानीते स्वात्मैकनिष्ठत्वेन प्रत्यभिजानाति, इतिहेतोर्न परमार्थो भेद इत्यर्थः । तथाच श्रुत्यन्तरं 'आत्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति' इत्युपाध्युप-रागपरित्यागेन सर्वोपाध्युपलक्षितमेकमात्मानं निरुपपदेनात्म-शब्देन निर्दिशति । लोके च यश्चक्षुषा रूपमद्राक्षं सोऽहमिदानीं रसनेन रसमनुभवामीति प्रत्यभिज्ञानुभवः प्रसिद्धोऽतो नात्म-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्राद्वैतीभूतं विज्ञानं कार्यकारणकर्मनिर्मुक्तं निर्वचनमनौपम्यं निरूपाख्यं किं तदवाच्यं ॥ ७ ॥

एष हि खल्वात्मेशानः शम्भुर्भवो रुद्रः प्रजापति-

भेदशङ्केति भावः। उपाध्यन्वये भेददर्शनं व्यपदेशभेदश्चोपपाद्य तद्व्यतिरेके तद्व्यतिरेकमुपपादयति यत्राद्वैतीभूतमिति। यत्र यस्यामवस्थायां सुषुप्त्यादौ सर्वोपाध्युपरमादद्वैतीभूतं विज्ञानं तत्रेत्यध्याहारः तदा कार्यकारणकर्मभिर्विषयकरणक्रियाभिरवच्छेदकैर्निर्मुक्तमसंस्पृष्टं अतएव निर्वचनं विशेषसञ्ज्ञावचनशून्यं अनुपममेवानौपम्यमुपमारहितं स्वतो निर्विशेषमित्यर्थः। अतएव निरूपाख्यमप्रमेयमिदं तदित्युल्लेखायोग्यमित्यर्थः। किमेव निषेधमुखेनोच्यते, इदं तदिति कस्मान्नोच्यत इति शङ्कते, किं तदिति। अशक्यं तथा वक्तुमित्युत्तरमाह अवाच्यमिति। सर्ववाग्व्यापारोपरमे यदवशिष्यते सर्वोपरमसाक्षित्वेन तदद्वैतं विज्ञानं स्वाभाविकमात्मरूपमिति भावः। तथा च बृहदारण्यके 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिना द्वैतदर्शनस्याभासतामुक्त्वा 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिनाऽद्वैतमात्मतत्त्वमुपपादयति श्रुतिः। तस्मादनामरूपक्रियस्यात्मनो नामरूपक्रिया अविद्याकल्पितप्रपञ्चोपाधिनिबन्धना एवेति परमार्थ इति ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वसृक् हिरण्यगर्भः सत्यं प्राणो हंसः शास्ता विष्णु-र्नारायणोऽर्कः सविता धाता विधाता सम्राडिन्द्र इन्दु-रिति । य एष तपत्यग्निरिवाग्निना पिहितः सहस्रा-

---

यद्यप्येवं शारीरस्यात्मनो न भेदः पारमार्थिकस्तथाप्यधि-दैवादादित्यात्मन ईश्वराद्यं भिन्न इति शङ्कां वारयन् अस्यैव ब्रह्मादयोऽपि विभूतय इत्येतमेव सद्दीकरोति "एष हि खल्वा-त्मेशानः ० इन्दुरिति" इति । य ईशानादिभिः शब्दैर्व्यप-दिश्यते श्रुतिस्मृतिपुराणेषु स एष हि खलु यः पूर्वानुवाकान्ते निर्दिष्टं एष एव नान्य इत्यर्थः । तत्र रुद्रान्तस्तमःप्रधानमायो-पाधिकः, हंसान्तो रजःप्रधानमायोपाधिकः । शास्ता विष्णु-र्नारायण इति शुद्धसत्त्वप्रधानमायोपाधिकः । जगत्संहार-सृष्टिस्थितिहेतुतयाभिव्यक्तविशेषास्तत्तत्सञ्ज्ञाभाजो ये जायन्ते ते सर्वेऽप्ययमात्मेत्यभिप्रायः । अयमेवार्कोऽर्च्यः पूज्यः सर्वतत्फला-श्रयत्वात्, तथाच श्रुतिः 'एष वा अश्वमेधो य एष तपति तस्य संवत्सर आत्मायमग्निरर्कः' (बृहदा० अ० १) इति । सवितृ-शब्दो व्याख्यातः । अयमेवात्मा पृथिव्यादिरूपेण धाता सर्वस्य धारयिता, विधाता पित्रादिरूपेण पुत्रादीनां निर्माता, सम्राट् सार्वभौमो राजा, इन्द्रः स्वराट् स्वर्गाधिपतिः, इन्दुश्चन्द्रमा प्रसिद्धः, एते सर्वेऽप्येष एवात्मेति । किञ्च न केवलमेतावत् "य एष० हिरण्मयेनाण्डेन" इति । यस्तपति जगदभितपति सविता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षेण हिरण्मयेनाण्डेन। एष वा जिज्ञासितव्योऽन्वेष्टव्यः सर्वभूतेभ्योऽभयं दत्त्वारण्यं गत्वाथ बहिःकृत्वे-

---

सोऽप्येष एवेति योजना। कथं तर्हि स आत्मरूपेण न विभाव्यत इत्यत आहाग्निरिवेति। यथा महता ज्वालाजटिलेनाग्निनाऽग्निः दीपो मन्दः पिहित आच्छन्नो भवति एवं सहस्राक्षेणानेकच्छिद्रवता हिरण्मयेन तेजोमयेनाण्डेन मण्डलात्मकेन ब्रह्माण्डेन वा पिहित आच्छादितः, अतो नात्मरूपेण दृश्यत इत्यर्थः। तथाच मन्त्रवर्णः, 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं' इति। यस्मादयमात्मैकोऽप्येकरूपोऽप्युपाधिभिरनेकोऽनेकरूप इव च विभाव्यमान उपाध्यावृतनिजस्वरूपस्तस्मात् मुमुक्षुभिरावरणनिराकरणेन तद्दर्शने यत्न आस्थेय इत्युपदिशति "एष वा ० उपलभेतैनमिति" इति। एष एवाध्यात्माधिदैवरूपेण विभाव्यमान आत्मा किंस्वरूप इति जिज्ञासितव्यो ज्ञातुमेष्टव्यः, तत्तत्त्वज्ञानं सम्पादयितुं गुरूपसत्तिः कार्य्येत्यर्थः। विज्ञानसम्पादनप्रकारमाहाऽन्वेष्टव्यो गुरूपदिष्टवाक्यमर्यादामाश्रित्यान्वेषणेन मननेनावधारणीय इत्यर्थः। तत्र 'वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः' इति श्रुतिमाश्रित्य सन्न्यासमात्मज्ञानाङ्गमुपदिशति सर्वभूतेभ्य इति। सर्वभूताभयदानं सन्न्यासः स च कर्मपरित्यागलक्षणः तं कृत्वेत्यर्थः, सन्न्यस्य गुरुभ्यः सब्रह्मचारिभ्यस्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्द्रियार्थान् *स्वाच्छरीरादुपलभेतैनमिति। विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तं।

श्रवणमनने सम्पाद्यानन्तरमरण्यं विजनं देशं मनःप्रसादकरं गत्वाथ तदा इन्द्रियार्थान् बाह्यान् दूरतः कृत्वान्तःशरीर एवात्मानमन्विष्य निदिध्यासनं कुर्वन् स्वाच्छरीरात् स्थूलसूक्ष्मलक्षणादेनमात्मानमुपलभेत साक्षात्कारवान् भवेदित्यर्थः। इतिशब्दः प्रासङ्गिकोपदेशसमाप्त्यर्थः। इदानीं प्रकृते प्राणादित्ययोरेकत्वे प्रश्नोपनिषद्गतं मन्त्रमुदाहरति "विश्वरूपं ० सूर्यः" इति। पूर्वार्धे द्वितीयान्तानि पदानि प्रथमान्तत्वेन विपरिणेयानि, उदयतीति क्रियायोगार्थं। विश्वानि नीलपीतादीनि रूपाणि यस्य स विश्वरूपः 'असौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः' इति श्रुतेः। हरति सर्वेषां प्राणिनामायूंषि भौमान् वा रसानिति हरिणः। जातं जातं वेत्ति सर्वप्रवृत्तिसाक्षितयेति वा जाते जाते विद्यते सर्वदेहगतोष्मरूपेण सर्वचक्षुरधिष्ठातृत्वेनेति वा जातवेदाः। परमयनं परायणं सर्वभासामाश्रय इति यावत्। ज्योतिरेकं ज्योतिरात्मना एक इत्यर्थः, यद्वा ज्योतिः प्रकाशस्वभावः एकोऽद्वितीयः सूर्य एकाकी चरतीति श्रुतेः। तपति सर्वं सन्तापयति शोषयतीति तपन्। सहस्ररश्मिरपरि-

* स्वाच्छरीरादिति टीकापाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ॥ ८ ॥

तस्माद्वा एष उभयात्मैवंविदात्मन्येवाभिध्यायत्यात्मन्येव यजतीति ध्यानं प्रयोगस्थं मनो विद्वद्भिष्टुतं मनःपूतिमुच्छिष्टोपहतमित्यनेन तत्पावयेत्। मन्त्रं

मितकिरणः शतधा अनेकधा प्रति प्राणिनां प्रतिमां प्रतीत्यभिमुखतया वर्तमान एष सन्दृश्यमानमण्डलस्थः सूर्यः सविता प्रजानां प्राणोऽन्तरात्मा उदयत्युद्गच्छत्युदयाचलादिति मन्त्रपदानामर्थः। तथाच मन्त्रवर्णः 'सूर्य आत्मा जगतस्तस्थुषश्च' इति ॥ ८ ॥

तदेवं प्राणादित्यात्मनोऽन्तर्बहिश्च विचरतः प्रजापतेः कार्यब्रह्मणोऽनेकगुणविशिष्टस्याहं ग्रहेण प्रत्यगात्मतयोपासनं प्रणवव्याहृतिसावित्र्यनुबन्धमुपदिश्य तन्निष्ठस्योपासकस्योपस्थितान्नभोजने कर्तव्यविशेषमुपदिशति "तस्माद्वा ० तत्पादयेत्" इति। एष पूर्वोक्तः प्रत्यगात्मा यस्मादुभयात्मा प्राणादित्यरूपः तस्माद्वै तस्मादेवंवित् पूर्वोक्तप्रकारेण प्राणादित्यात्मविदात्मन्येवात्मनि स्वस्वरूपाभेदेनैवाभिध्यायत्याभिमुख्येन प्रत्यक्तया प्राणादित्यौ ध्यायतीत्यर्थः। ततो यद्यजति पूजयति तन्महिमानमाविष्करोति तदप्यात्मन्येवेत्यर्थः। इति एवंप्रकारेण ध्यानं विद्वद्भिष्टुतं स्तुतं प्रशस्तमित्यन्वयः। किं तद्ध्यानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पठति । उच्छिष्टोच्छिष्टोपहतं यच्च पापेन दत्तं मृतसूतकाद्वा वसोः पवित्रमग्निः सवितुश्च रश्मयः पुनन्त्वन्नं मम दुष्कृतञ्च यदन्यत् । अद्भिः पुर-

प्रयोगस्थं उपासनाप्रयोगे स्थितं व्यावृतं मनः तैलधाराघण्टानादादिवदविच्छेदेन दीर्घकालादरनैरन्तर्यमुपास्ये तत्त्वे निविष्टं मनोरूपं ध्यानमित्यर्थः । एवं ध्यायतः पुंसो यो मनःपूतिर्मनसो दुर्गन्धो दुर्वासनेत्येतत् तन्मनःपूतिमुच्छिष्टोपहतमित्यनेन वक्ष्यमाणेन मन्त्रेण तत् तस्मिन् काले पावयेत् पवित्रयेत् एतन्मन्त्राभिमन्त्रितान्नप्राशनेन प्राणाग्निहोत्रविधिना च शोधयेदित्यर्थः । "मन्त्रं पठति ० यदन्यत्" इति । अन्योच्छिष्टं स्वोच्छिष्टं चोच्छिष्टोच्छिष्टमुच्यते तेनोपहतं, यद्वा उच्छिष्टं च उच्छिष्टोपहतञ्चेत्युच्छिष्टोच्छिष्टोपहतमन्नं भोज्यं । पापेन पापात्मना पतितेन दत्तं यच्चान्नं, मृतसूतकाद्वा उपहतं मृतसूतकस्पृष्टं तत्स्वामिकं वा यदन्नमित्यर्थः । वसोर्वसुनाम्नो देवस्य पवित्रं पावयितृ, अग्निर्वैश्वानरः सवितुश्च रश्मयो मम मद्भोज्यं तदन्नं पुनन्तु पवित्रयन्तु यदन्यच्च मम दुष्कृतं पापाचरणं तच्च पुनन्त्वित्यर्थः । अनेन मन्त्रेण स्वभोज्यमन्नमभिमंत्र्य पश्चात् "अद्भिः ० दधाति" इति । पुरस्तात् प्राणाहुत्यारम्भात् पूर्वं याः स्मृतिप्राप्ता आपोऽशनाङ्गभूता आपस्ताभिः परिदधाति प्राणादित्यरूपस्य स्वात्मनः परिधानं वस्त्राच्छादनमिदं क्रियत इति तास्विन्तये-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तात्परिदधाति। प्राणाय स्वाहापानाय स्वाहा व्यानायस्वाहा समानाय स्वाहोदानाय स्वाहेति पञ्चभिरभिजुहोति। अथावशिष्टं यतवागश्नात्यतो-ऽद्भिर्भूयएवोपरिष्टात्परिदधात्याचान्तो भूत्वात्मेज्यानः प्राणोऽग्निर्विश्वोऽसीति च द्वाभ्यामात्मानमभिध्यायेत्।

दित्यर्थः। अनन्तरकर्तव्यं प्राणाग्निहोत्रं मन्त्रविनियोगेन विधत्ते "प्राणाय ० अभिजुहोति" इति। प्राणाय स्वाहेत्यादिभिः पञ्चभिर्मन्त्रैर्यथापाठक्रमं भोज्यान्नरूपं सिद्धं द्रव्यमादायाभि-मुख्येनास्याग्नौ जुहोति जुहुयादित्यर्थः। "अथावशिष्टं ० अभिध्यायेत्" इति। अथ पञ्चप्राणाहुत्यनन्तरमवशिष्टं तृप्ति-पर्यन्तमन्नं यतवाक् मौनी सन्नश्नाति यदवशिष्टमश्नाति तन्मौनी सन्निति मौनमत्र विधीयते नाशनं, तस्य निमित्ता-न्तरत एव प्राप्तत्वादित्यर्थः। अतोऽवशिष्टसर्वान्नभोजनानन्त-रमद्भिरुत्तरापोऽशनाङ्गभूताभिर्भूय एव पुनरपि पूर्ववदुपरि-ष्टादुपरिभागे परिदधाति तास्वप्सूपरि परिधानदृष्टिं कुर्या-दित्यर्थः। तथा च श्रुत्यन्तरं 'तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चो-परिष्टाच्चाद्भिः परिदधति' (छान्दो० अ० ५) इति पश्चादुत्था-याऽऽचान्तो भूत्वा करमुखपादशुद्धिं विधाय विधिवदाचम्य शुद्धो भूत्वाऽऽत्मेज्यान आत्मानभोजान आत्मयजनं कुर्वन्नुपासक इति यावत् प्राणोऽग्निरित्यादिवक्ष्यमाणाभ्यां मन्त्राभ्यामात्मा-नमभिध्यायेत्। मन्त्रद्वयं पठति "प्राणोऽग्निः परमात्मा वै

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राणोऽग्निः परमात्मा वै पञ्चवायुः समाश्रितः। स प्रीतः प्रीणातु विश्वं विश्वभुक् । विश्वोऽसि वैश्वानरोऽसि विश्वं त्वया धार्यते जायमानं । विशन्तु त्वामाहुतयश्च सर्वाः

---

० अमृतोऽसीति” इति । पञ्चवायुः प्राणापानादिपञ्चवायुरूपः प्राणः प्रणेता शरीरेन्द्रियव्यापारयिता यः स परमात्मा वै परमात्मैवा अग्निरन्नस्यात्ता जाठरो देहं समाश्रित इति पूर्वार्द्धयोजना । यद्वा परमात्मैव देहं समाश्रितः सन् पञ्चवायुः प्राणोऽग्निश्च नान्य इति योजना । अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमिति भगवत्स्मरणात् । स परमात्माऽत्ता प्रीतस्तृप्तः सन् विश्वं सर्वमेव भोक्तृवर्गं प्रीणातु प्रीणयतु यतः स विश्वभुक् विश्वं भुनक्ति पालयति इति विश्वभूगिति प्रथममन्त्रार्थः । हे प्राणाग्न्यात्मन् त्वं विश्वोऽसि सर्वोऽसि वैश्वानरो विश्वनरनयनादीश्वरस्त्वमसीत्यर्थः । कुतो विश्वात्मत्वं विश्वनियन्तृत्वं चेत्यत आह, विश्वं जायमानं त्वया धार्यते त्वमेव स्वात्मनो विश्वमुत्पाद्य पालयसि इत्यर्थः । सर्वा आहुतयः आ समन्ताद्धूयन्त इत्याहुतयो हवींषि सर्वाणि त्वां विशन्तु त्वय्याहिता भवन्तु । किञ्च तत्र सर्वाः प्रजाः यत्र त्वं विश्वामृतोऽपि विश्वममृतयसि जीवयसीति विश्वामृतस्त्वं यत्र तत्रैव सर्वाः प्रजाः त्वज्जीवना इत्यर्थः । इतिशब्दो मन्त्रसमाप्तिद्योतनार्थः । इदानीमेवंविधं विद्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रजास्तत्र यत्र विश्वामृतोऽस्तीति। एवं न विधिना खल्वनेनात्तान्नत्वं पुनरुपैति ॥ ६ ॥

अथापरं वेदितव्यमुत्तरो विकारोऽस्यात्मयज्ञस्य यथान्नमन्नादश्चेत्यस्योपव्याख्यानं। पुरुषश्चेता प्रधानान्तःस्थः स एव भोक्ता प्राकृतमन्नं भुङ्क्त इति।

द्भोजनं फलवचनेन प्रशंसति "एवं न विधिना ० पुनरुपैति" इति। एवमुक्तप्रकारेणानेन विधिनाऽत्ता विद्वान् पुनरन्नत्वं न खलूपैतीत्यन्वयः। स्वयं सर्वस्यात्ता भवति नान्येनाद्यत इत्यर्थः ॥ ६ ॥

पुनरस्यैव विदुषश्चिन्तनीयान्तरं विशेषमाख्यातुमारभते "अथापरं ० व्याख्यानं" इति। अथेत्यर्थान्तरोपक्रमार्थः। अपरं पूर्वोक्तात् कर्ममन्त्ररूपादन्यद्वेदितव्यं चिन्तयितव्यमस्तीत्यर्थः। किं तदित्युच्यते अस्यात्मयज्ञस्यात्मयजनरूपस्य भोजनस्य सम्बन्धी उत्तरो विकारो विकरणं श्रेष्ठं विभजनं। कोऽसौ यथान्नमन्नादश्च अदनीयमत्ता चेति विभजनं। कथमित्यत आह, तस्योपव्याख्यानमिति। तस्योत्तरविकारस्य स्पष्टव्याख्यानं क्रियत इति शेषः। वक्ष्यमाणविभागेनान्नमन्नादं चात्मानं चिन्तयेदिति तात्पर्यार्थः। तत्र किमन्नं किमन्नादमित्येतत् तावत्स्वरूपतो निर्दिशति "पुरुषश्चेता ० भुङ्क्त इति" इति। प्रधानं प्रकृतिर्जगद्बीजमव्याकृतादिशब्दवाच्यं तस्यान्तर्मध्ये तत्सत्ताप्रदत्वेन स्थितो यश्चेता चेतनः पुरुषः स एव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्यायं भूतात्मा ह्यन्नमस्य कर्ता प्रधानः । तस्मात् त्रिगुणं भोज्यं भोक्ता पुरुषोऽन्तःस्थः । अत्र दृष्टं नाम प्रत्ययं । यस्माद्बीजसम्भवा हि पशवस्तस्माद्बीजं भोज्यमनेनैव प्रधानस्य भोज्यत्वं व्याख्यातं । तस्मा-

---

भोक्ता प्राकृतं प्रकृतिकार्यमन्नं भुङ्क्ते इत्यर्थात् प्रकृतितद्विकारावन्नमित्यनान्नादस्वरूपमुक्तमित्यर्थः । अर्थादुक्तमन्नस्वरूपं विभजते "तस्यायं भूतात्मा ० कर्ता प्रधानः" इति । तस्य पूर्वोक्तस्य भोक्तुरयं भूतात्मा साभासः कार्यकरणसङ्घातरूपोऽन्नं भोज्यं हि प्रसिद्धं, अस्य भूतात्मनः कर्ता प्रधानः पूर्वोक्तः, सोऽपि भोज्य इत्यर्थः । उक्तार्थसारमुपसंहारव्याजेनाह "तस्मात् त्रिगुणं ० पुरुषोऽन्तःस्थः" इति । त्रिगुणं प्रधानतत्कार्यरूपं भोज्यं भोक्ता पुरुषः प्रधानान्तःस्थः सर्वत्रेत्यर्थः । उक्तव्यवस्थायां प्रमाणमाह "अत्र दृष्टं ० प्रत्ययं" इति । दृष्टं दर्शनं प्रत्यक्षं नाम प्रसिद्धं प्रत्ययं प्रमाणमत्र विद्यत इति शेषः । उक्तमर्थमुदाहरणेन बुद्धिमारोहयति "यस्माद्बीजसम्भवा ० भोज्यत्वं व्याख्यातं" इति । पशवो हि गवाश्वमहिषपुरुषादयः कुटुम्बिकस्य भोज्यत्वेन प्रसिद्धा यस्माद्बीजसम्भवाः स्वबीजभूतान्नरसपरिणामादिसम्भवास्तस्माद्बीजं भोज्योपादानत्वाद्भोज्यं प्रसिद्धमित्यर्थः । बीजस्य भोज्यत्वप्रदर्शनफलमाह, अनेनेति । कार्येषु भोज्यत्वस्य सिद्धत्वात् कारणस्यापि तत्सिद्धं कार्यकारणयोरभेदादित्यर्थः । प्रमाणेनोपपादितमर्थमुप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ह्योक्ता पुरुषो भोज्या प्रकृतिस्तत्स्थो भुङ्क्त इति। प्राकृतमन्नं त्रिगुणभेदपरिणामत्वान्महदाद्यं विशेषान्तं लिङ्गं। अनेनैव चतुर्दशविधस्य मार्गस्य

संहरति "तस्माद्भोक्ता ० प्रकृतिस्तत्स्थो भुङ्क्त इति" इति। व्याख्यातार्थोऽयं ग्रन्थः। एवं प्रकृतेर्भोज्यत्वं प्रसाध्य तत्कार्यस्य भोज्यत्वं प्रपञ्चयति "प्राकृतमन्नं ० विशेषान्तं लिङ्गं" इति। यत् प्राकृतं प्रकृतिप्रभवं कार्यरूपमन्नं तत् त्रिगुणभेदपरिणामत्वात् सत्त्वादिगुणविशेषपरिणामत्वान्महदाद्यं महान् प्रकृतेराद्यो विकारो ज्ञानक्रियाशक्तिसम्मूर्च्छितः स आद्यो यस्य तन्महदाद्यं। विशेषाः विकारशब्दवाच्याः पृथिव्यादिमहाभूतलक्षणा अस्मदादिप्रत्यक्षयोग्या अन्तो यस्य तद्विशेषान्तं। तत् कीदृशं, लिङ्गं लिङ्ग्यते ज्ञायते चेतनसद्भावोऽनेनेति व्युत्पत्तेः अचेतनं भोज्यमित्यर्थः। विषयाणां विशेषाविशेषरूपो विभागः साङ्ख्यैरुक्तः 'तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः। एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च' (सां०का०) इति। विशेषाविशेषरूपाणां विषयाणां भोज्यत्वं सामान्येनोक्तं प्रत्येकमिन्द्रियार्थेषु योजयति "अनेनैव चतुर्दश ० व्याख्या कृता भवति" इति। बाह्येन्द्रियप्रवृत्तिमार्गो दशविधोऽन्तःकरणवृत्तेश्चातुर्विध्यात्तस्याश्चतुर्विधो मार्ग इति चतुर्दशविधो मार्गस्तस्याऽपि भोज्यत्वेन व्याख्या कृता भवतीत्यर्थः। प्रतिपादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याख्या कृता भवति । सुखदुःखमोहसंज्ञं ह्यन्नभूतमिदं जगत् नहि बीजस्य स्वादुपरिग्रहोऽस्तीति यावन्न प्रसूतिः । तस्याप्येवं तिसृष्ववस्थास्वन्नत्वं भवति कौमारं यौवनं जरा परिणामत्वात् तदन्नत्वं । एवं प्रधानस्य व्यक्ततां गतस्योपलब्धिर्भवति तत्र बुद्ध्यादीनि

तार्थं श्लोकेन संगृह्णाति "सुखदुःखमोहसञ्ज्ञं ० यावन्न प्रसूतिः" इति । सुखदुःखमोहकरत्वात् त्रिगुणात्मकमिदं जगत्सुखादिसञ्ज्ञितमन्नभूतं हि प्रसिद्धमित्यर्थः । बीजस्य यत्स्वादु स्वादनं तस्य परिग्रहस्तावन्न भवति यावत्कार्याकारेण न प्रसूतिः प्रसवः । तस्मात्कार्यं त्रिगुणात्मकं भोज्यं दृष्ट्वा कारणं प्रधानमपि त्रिगुणात्मकं भोज्यमनुमेयमित्यभिप्रायः । यदुक्तं पूर्वं प्रकृतिकार्यस्य भूतात्मनोऽन्नत्वं तस्याप्यवस्थावत्त्वात्परिणामित्वमस्तीति त्रिगुणात्मकत्वमन्नत्वञ्च सिद्धमित्याह "तस्याप्येवं ० जरा परिणामत्वात्तदन्नत्वं" इति । अवस्थात्रयमेव विभजते कौमारमित्यादिना । अवस्थात्रयस्य कार्यत्वं साधयति, परिणामत्वादिति । तदन्नत्वं तस्य भूतात्मनोऽन्नत्वं सिद्धमित्यर्थः । कार्यद्वारोक्तं प्रधानभोज्यत्वं प्रपञ्चयति "एवं प्रधानस्य ० प्रसिद्धं तस्य" इति । एवं वक्ष्यमाणेन प्रकारेण प्रधानस्य व्यक्ततां गतस्य कार्यतामापन्नस्योपलब्धिर्भवति, कथं तदाह तत्र व्यक्तेषु प्रधानकार्येषु यत्स्वादु स्वादन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वादूनि भवन्त्यध्यवसायसङ्कल्पाभिमाना इत्यथेन्द्रियार्थान् पञ्च स्वादूनि भवन्त्येवं सर्वाणीन्द्रियकर्माणि प्राणकर्माण्येवं व्यक्तमन्नमव्यक्तमन्नमस्य निर्गुणो

मास्वादनं ग्रहणमिति यावत् तस्मिन् स्वादूनि तन्निमित्तं बुद्ध्यादीनि करणानि भवन्ति प्रवर्तन्ते, बुद्ध्यादिभिः प्रधानकार्यं गृह्यत इत्यर्थः । बुद्ध्यादिस्वरूपं मध्ये व्यपदिशति, अध्यवसाय इति । निश्चयात्मिका बुद्धिरध्यवसायः, सङ्कल्पनव्यापारवदन्तःकरणं मनः सङ्कल्पः, अहङ्कारात्मिकान्तःकरणवृत्तिरभिमान इत्येते बुद्ध्यादिशब्दार्था इत्यर्थः । अथ बुद्ध्याद्युद्भवे जाग्रद्दशायामिति यावत् इन्द्रियार्थान् शब्दस्पर्शरूपरसगन्धाख्यान् विषयान् प्रति पञ्च ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पूर्ववत् स्वादूनि भवन्ति उक्तान् विषयान् स्वदयितुं करणानि भवन्तीत्यर्थः । उक्तमर्थं कर्मेन्द्रियेषु मुख्यप्राणे वाऽतिदिशति, एवमिति । सर्वाणि वाक्पाणिपादपायूपस्थाख्यानामिन्द्रियाणां कर्माणि प्राणस्य मुख्यस्य कर्माणि प्राणनापाननादीनि वचनादानगमनविसर्गानन्दान् शरीरचालनादीन् प्रति स्वादूनि भवन्तीति योजना । प्रपञ्चितमर्थमुपसंहरति, एवमिति । एवमुक्तप्रकारेण व्यक्तमन्नमिद्धं, व्यक्तरूपान्नकारणत्वादव्यक्तस्य व्यक्तवदेवाव्यक्तमप्यन्नमनुमेयमित्यर्थः । अस्य व्यक्ताव्यक्तरूपस्यान्नस्य निर्गुणो भोक्ता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भोक्ता भोक्तृत्वाच्चैतन्यं प्रसिद्धं तस्य । यथाऽग्निर्वै देवानामन्नादः सोमोऽन्नमग्निनैवान्नमित्येवंवित्* सोम-

निर्विकार आत्मा भोक्तेत्यर्थः । अन्तःकरणगतचिदाभासाविवेकाद्भोक्तेव प्रतीयमानोऽपि न स्वभावतो भोक्ता कूटस्थ एव सदेति भावः । तस्यात्मनो भोक्तृत्वाद्चेतनस्य सर्वस्य कार्यकारणात्मकस्य व्यक्ताव्यक्तवाच्यस्य सन्निधिसत्तामात्रेण स्वचैतन्याभासेन व्याप्तत्वाच्चैतन्यं चेतनत्वं प्रसिद्धं प्रकर्षेण सिद्धं ज्ञातं भवतीत्यर्थः । इदानीमन्नात्त्रोरुक्तयोः प्रकृतिपुरुषयोः सोमत्वमग्नित्वं च ध्यायेदिति गुणान्तरमुपदिशति "यथाऽग्निर्वै ० आत्मयाजी चेति" इति । देवानां मध्येऽग्निरन्नादोऽन्नस्यात्ता वै प्रसिद्धो तथा तथा सोमोऽन्नमदनीयं प्रसिद्ध इति योजना । तथा च श्रुत्यन्तरं 'अथ यत्किञ्चेदमार्द्रं तद्रेतसोऽसृजत तद् सोम एतावद्वा इदं सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः' (वृहदा० अ० ३) इति । तथा चैवंवित् यदा यद्येनाद्यते सोऽग्निर्यदद्यते स सोम †एवेत्यचान्नरूपमग्नीषोमात्मकं जगदित्येवंविदग्निनैवाग्न्यात्मनैव सोमरूपमन्नमत्ति, अतोऽन्नदोषैरग्निवन्न लिप्यत इत्यभिप्रायः । अन्नमित्येवमितिपाठः प्रामादिकः । यद्ययं पाठः सत्यस्तदेत्थं योजना । अग्निरन्नादः सोमोऽन्नमिति यथा प्रसिद्धं श्रुत्यन्तरे तथैवाऽग्निनैव सोम-

* अन्नमत्त्येवंविदिति टीकायां सम्मतः पाठः ।

† एवेत्यत्तन्नरूपमिति समीचीनः पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संज्ञोऽयं भूतात्माऽग्निसंज्ञोऽप्यव्यक्तमुखा इति वचना-त्पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्त इति यो हैवं वेद सन्यासी योगी चात्मयाजी चेत्यथ यद्वन्न कश्चिच्छून्या-

रूपमन्नमद्यते न मयेत्येवंविदन्नदोषेर्न लिप्यत इति। आधि-भौतिकान्नान्नादयोरुक्तं विशेषमाध्यात्मिकयोरपि तयोर्दर्शयति, सोमेति। अयं भूतात्मा प्राकृतः केवलः सोमसंज्ञोऽन्नमि-त्यर्थः, अव्यक्तं प्रधानं मुखं भोक्तृत्वादिप्रवृत्तिद्वारं यस्य स चिदात्माऽव्यक्तमुखस्तेन व्याप्तत्वाद्भूतात्माप्यव्यक्तमुखः सन्नग्नि-संज्ञोऽपि भवति। तथा चायमर्थः, चिदाभासव्याप्ततया चिदात्मा-भेदेनाव्यक्तमुखतया बाह्यविषयभोक्तृत्वनाग्निसञ्ज्ञोऽप्ययं भूतात्मा चिदात्मापेक्षया सोमसंज्ञोऽन्नमेवेति प्रकृत्यनुगतश्चिदात्माऽत्ताग्निः प्राकृतो भूतसङ्घातोऽन्नमिति चिन्तयेदिति। एवमुक्त विभागे प्रमाणमाह, वचनात्पुरुष इति। भुङ्क्त इति वचनादित्य-न्वयः। एवमन्नान्नादविदं प्रशंसन्नस्मिन् दर्शने पुंसः प्रवृत्ति-मुपनयति, यो हैवमिति। यो ह कश्चिदेवमुक्तप्रकारेणान्ना-न्नादविभागं वेद, स इत्यध्याहार्यं, स सन्यासी अकर्तात्मदर्शी, न केवलं कर्मत्यागी सन्यासी किन्त्वयमेवेति विद्या स्तूयते, योगी चाष्टाङ्गयोगनिरतोऽप्ययमेव, न केवलं गुहासु निविष्टः, आत्मयाजी आत्मसंस्कारार्थं यो यजते स आत्मयाजी तथा च शातपथी श्रुतिः 'स ह वा आत्मयाजी यो वेदेदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपधीयते' इति। आत्मयाजी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गारे कामिन्यः प्रविष्टाः स्पृशन्तीन्द्रियार्थांस्तद्वद्यो न स्पृशति प्रविष्टान् सन्न्यासी योगी चात्मयाजी चेति ॥ ॥ १० ॥

परं वा एतदात्मनो रूपं यदन्नमन्नमयो ह्ययं प्राणो- ऽथ न यद्यस्मात्यमन्ताऽश्रोताऽस्पृष्टाऽद्रष्टाऽवक्ताऽघ्राता-

---

चायमेव न यज्ञमात्रनिरत इत्यर्थः । के वा सन्न्यासी योगी चात्मयाजी चेति प्रसिद्धा यदात्मनायं विद्वान् स्तूयत इत्य- पेक्षायां तत्स्वरूपमाह, अथ यद्वदिति । अथेदं निदर्शनमुच्यते । शून्यागारे जनशून्यान्तर्भवने प्रविष्टाः कामिन्यः कामिनीः कामातुराः स्त्रीः कश्चिदतिधीरो न स्पृशति यद्वत् किन्तु ताः परिहरत्येव तद्वद्यो विद्वानिन्द्रियार्थान् प्रविष्टान् दैवादागत्योप- स्थितान्न स्पृशति अनुरागेण न स्वीकरोति स एव सन्न्यासी योगी चात्मयाजी चेति व्याख्यातं । इति शब्दः प्रदर्शनार्थः । विषयनिस्पृहाः सन्न्यास्यादिशब्दवाच्या इत्यर्थः ॥ १० ॥

तदेवं दशभिरनुवाकैरध्यात्ममधिदैवञ्च प्राणादित्योपाधि- द्वाराऽऽत्मोपासनं सेतिकर्तव्यताक्रममुक्तिफलमुपदिश्य तत्परि- समाप्येदानीं पूर्वप्रकृतस्यैव प्रत्यग्ब्रह्मणश्चिदात्मनोऽभ्युदयफलक- मनेकविधमुपासनभेदं वक्तुं प्रकरणान्तरं प्रवर्तते । तत्रान्ना- धीनत्वात् सर्वप्राणिस्थितेर्ब्रह्मदृष्ट्यान्नोपासनं विधातुं तन्महिमान- माह "परं वा ० यन्त्यन्ततः" इति । परमुत्कृष्टं वै प्रसिद्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रसयिता भवति प्राणांश्चोत्सृजतीत्येवं ह्याहाथ यदि खल्वश्नाति प्राणसमृद्धो भूत्वा मन्ता भवति श्रोता भवति स्प्रष्टा भवति वक्ता भवति रसयिता भवति घ्राता भवति द्रष्टा भवतीत्येवं ह्याह अन्नाद्वै

मेतद्वक्ष्यमाणमात्मनः परमात्मनो रूपं मूर्तिविशेषः। किं तद्यदन्नं सर्वप्राणिजीवनं प्रसिद्धमोदनादिरूपं। कथमस्य परत्वं, हि यस्मादयं प्राणो मुख्यप्राणप्रधानोऽयं सङ्घातोऽन्नमयोऽन्नजीवन इति यावत्। एतदेवान्वयव्यतिरेकाभ्यामुपपादयति। अथैतत्प्रपञ्च्यते, यद्ययं नाश्नाति नान्नमुपजीवति तदा अमन्ता मननासमर्थो भवतीत्यन्वयः। एवमश्रोता भवतीत्यादि योज्यं। न केवलं मननाद्यशक्तिमात्रमेवानश्नतः किन्तु जीवनमपि दुर्लभमित्याह, प्राणांश्चोत्सृजति परित्यजति म्रियत इत्येवं ह्याह श्रुतिः। तथा च छान्दोग्ये (अ० ७) 'अन्नं वाव बलाद्भूयस्तस्माद्यद्यपि दशरात्रीर्नाश्नीयाद्यद्यु ह जीवेदथवाऽद्रष्टाऽश्रोता' इत्याद्यन्नाभावे शक्तिजीवनयोरभाव इति व्यतिरेकमुक्त्वा तत्रैवान्वयमाह, अथेति। यदि अश्नाति तदा खलु प्राणसमृद्धः प्राणेन बलेन समृद्ध उपचितो भूत्वा मन्ता भवतीत्यादि स्पष्टं। अत्रैव श्रुत्यन्तरमुदाहरति, एवं ह्याहेति। अन्नाद्रेतोबीजरूपपरिणताद्वै प्रजाः स्थावरजङ्गमात्मिकाः प्रजायन्ते उत्पद्यन्ते याः काश्चिदविशेषिताः पृथिवीश्रिताः पृथिवीमाश्रिता अत

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रजाः प्रजायन्ते याः काश्चित् पृथिवीश्रिताः अतोऽन्नेनैव जीवन्त्यथैतदपि यन्त्यन्ततः ॥ ११ ॥

अथान्यत्राप्युक्तं सर्वाणि ह वा इमानि भूतान्यहरहः प्रपतन्त्यन्नमभिजिघृक्षमाणानि सूर्यो रश्मिभिरा-

---

उत्पत्त्यनन्तरमप्यन्नेनैव स्वस्वजात्युचितेनादनीयेनैव जीवन्ति प्राणान् धारयन्ति । अथ जीवितक्षये अन्ततोऽन्ते शरीरावसानेऽप्येतदन्नमेवापि यन्ति अन्नात्मिकायां पृथिव्यां लीयन्त इत्यर्थः ॥ ११ ॥

पुनरप्यन्नस्तुतिं करोति तस्य वक्ष्यमाणात्मदृष्ट्यर्हत्वाय "अथान्यत्राप्युक्तं • ब्रह्मणा" इति । ह वै इति प्रसिद्धार्थौ निपातौ । सर्वाणीमानि भूतानि पशुपक्ष्यादिपिपीलिकान्तानि अन्नमभिजिघृक्षमाणानि अहरहर्नित्यं प्रपतन्तीतस्ततः परिभ्रमन्तीति प्रसिद्धमेतदित्यर्थः । किञ्च सूर्योऽपि रश्मिभिः किरणैरन्नं भौमं रसरूपमाददाति स्वीकरोति, तेनान्नादानेनासौ सूर्यस्तपति समिद्धो भवतीत्यर्थः । तथा च श्रुत्यन्तरं 'सूर्यो मरीचिमादत्ते सर्वस्माद्भुवनादधि' इति । मरीचिं मरीचिग्रस्तमुदकमित्यर्थः । इमे प्राणा मुख्यप्राणसहिता वागादयः प्राणाः अन्नेनाभिषिक्ताः संक्लिन्नाः सन्तर्पिताः सन्तः पचन्ति वर्णव्यत्ययेन पतन्ति स्वस्वव्यापारं कुर्वन्तीत्यर्थः । यद्वा पचन्ति भोक्तुर्विषयानुपनयन्तीत्यर्थः । तथाऽग्निर्वा अन्नेन समिदाज्यादि-

5092

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ददात्यन्नं तेनासौ तपत्यन्नेनाभिषिक्ताः पचन्तीमे प्राणा अग्निर्वा अन्नेनोज्ज्वलत्यन्नकामेनेदं प्रकल्पितं ब्रह्मणा। अतोऽन्नमात्मेत्युपासीतेत्येवं ह्याह। अन्नाद्भूतानि जायन्ते जातान्यन्नेन वर्धन्ते अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते॥ १२॥

अथान्यत्राप्युक्तं विश्वभृद्वै नामैषा तनूर्भगवतो

नाऽभिज्वलति दीप्यते। एवं देवतानामप्युपजीव्यमिदमन्नमन्नकामेन ब्रह्मणा प्रजापतिना प्रकल्पितमुत्पादितमित्यर्थः। यदर्थमेवमन्नं स्तुतं तदिदानीमुपासनं विदधाति "अतोऽन्नं ० ह्याह" इति। यत एवम्महिमेदमन्नमतोऽन्नमात्मेत्युपासीत ध्यायेदित्यर्थः। अत्र ब्रह्मदृष्टिरुत्कर्षादिति न्यायेनान्ने आत्मदृष्टिर्विधीयते, न चाहंग्रहोऽस्ति 'न प्रतीकेन हि सः' (ब्रह्मसू० अ० ४। पा० १। सू० ४।) इति सूत्रे प्रतीकेष्वहंग्रहस्यापोदितत्वादिति द्रष्टव्यं। एवं ह्याहेत्युदाहरति शाखान्तरीयं मन्त्रमन्नस्यात्मसाम्यद्योतनेन तत्प्रतीकत्वं द्रढयितुं "अन्नाद्भूतानि० तदुच्यते" इति भूतोत्पत्त्यादिनिमित्तत्वमात्मसाम्यमत्रोक्तं। अत्रत्यार्थः स्पष्टः॥ १२॥

इदानीमन्ने पूर्वोक्ते विश्वभृत्त्वं गुणं प्रक्षिप्य विष्णुशरीरदृष्ट्योपासनान्तरमुपदिशति "अथान्यत्राप्युक्तं ० भिषक् स्मृतं" इति। विश्वभृत्त्वमन्नस्य साधयति, प्राणो वा इत्यादिना,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य रसो मनः प्राणस्य विज्ञानं मनस आनन्दं विज्ञानस्येत्यन्नवान् प्राणवान् मनस्वान् विज्ञानवानानन्दवांश्च भवति यो हैवं वेद यावन्तीह वै भूतान्यन्नमदन्ति तावत्स्वन्तःस्थोऽन्नमत्ति यो हैवं वेद। अन्नमेव विजरन्नमन्नं संवननं

रसः सारः कार्यमित्यर्थः । प्राणे स्थिरे सति मनस उपचयान्मनः प्राणस्य च रसः । मनसो विवेकसामर्थ्ये सति विज्ञानोत्पत्तेर्विज्ञानं मनसो रसः, विषयाध्यवसाये सत्यानन्दोदयाद्विज्ञानस्यानन्दो रस इति यो हैवं वेदेति सम्बन्धः । *सो भवान् प्राणवानित्यादिफलवचनं। दृष्टं फलमुक्त्वाऽदृष्टं च फलमाह, यावन्तीहेति । यावन्तीह लोके भूतान्यन्नमदन्ति भक्षयन्ति तावत्सु सर्वेषु तेषु भूतात्मा सन्नन्तःस्थो भूतान्तःस्थोऽन्नमत्त्युपासकः । †तावत्स्वन्तदस्य इति पाठे तेषु भूतेष्ववस्थितस्तेष्वभिमानशून्यः सन्नन्नमत्तीत्यर्थः । कः, यो हैवं विश्वम्भरगुणं विष्णुतनुमन्नं वेदोपास्ते इत्यर्थः। उक्तमुपास्यमन्नं विष्णुतनुत्वदृढ्यर्हत्वाय स्तुत्यर्थं श्लोकमुदाहरति, अन्नमेवेति । अन्नमेव विजरत् विजरत्त्वं नयतीति विजरन्नं विजरमेव वा विजरन्नं। तथा च श्रुत्यन्तरं अन्नं ब्रह्मणोऽजरं वदन्तीति । तथा अन्नं संवननं

* सोऽन्नवान् इति समीचीनः पाठः ।

† तावत्स्वन्तरस्य इति भवितुमर्हति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मृतं। अन्नं पशूनां प्राणोऽन्नं ज्येष्ठमन्नं भिषक् स्मृतं ॥ १३ ॥

अथान्यत्राप्युक्तमन्नं वा अस्य सर्वस्य योनिः काल-

सम्भजनीयं स्मृतं ज्ञातं। अन्नं बहु कुर्वीत तद्व्रतमिति श्रुत्यन्तरात्। अन्नं पशूनां प्राणिनां प्राणः, अन्नात् प्राणा भवन्तीति श्रुतेः। अन्नं ज्येष्ठं प्रथमजं रसाद्यपेक्षया पूर्वसिद्धत्वात्। अन्नं हि भूतानां ज्येष्ठमिति श्रुत्यन्तरात्। अन्नं भिषक् भेषजं क्षुद्व्याधिनिवर्तकं स्मृतं, तस्मात् सर्वौषधमुच्यत इत्यन्नं प्रकृत्य श्रवणादिति श्लोकार्थः ॥ १३ ॥

पुनरस्यैवात्मनः कालात्मकादित्ये दृष्टिं विधातुमुत्तरमनुवाकत्रयं प्रवर्तते, तत्रान्नस्य कालाधीनत्वात् कालस्य चादित्याधीनत्वादन्नोपासनानन्तरं कालादित्योपासनविधानमिति संगतिं विवक्षन् कालात्मानं स्तौति "अथान्यत्राप्युक्तमन्नं ० इत्येवं ह्याह" इति। अथेत्युपासनान्तरोपक्रमार्थः। अन्यत्रापि कालविषये इदमुक्तं, अन्यत्राप्युक्तमिति वा। अन्नं वै प्रसिद्धमस्य प्राणिजातस्य सर्वस्याशेषस्य योनिः कारणं, कालश्चान्नस्य योनिरित्यनुवर्तते, कालेन ह्यन्नं प्रसूयते, सूर्यः सविता कालस्य योनिः, तस्य हि कालनिर्मातृत्वं प्रसिद्धं। तत्र कालस्वरूपतत्प्रमाणयोरभावात्कथं कालोऽन्नस्य योनिरित्यत आह तस्यैतदित्यादिना। तस्य कालस्यैतद्रूपं रूप्यत इति रूपं स्वरूपं, किं तत् यन्निमेषादेर्निमेषकलाकाष्ठाद्यवयवप्रचयात् संभृतं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्चान्नस्य सूर्यो योनिः कालस्य तस्यैतद्रूपं यन्नि-मेषादिकालात् सम्भृतं द्वादशात्मकं वत्सरमेतस्याग्ने-यमर्द्धमर्द्धं वारुणं मघाद्यं श्रविष्ठार्द्धमाग्नेयं क्रमेणो-

---

घटितं द्वादशमासात्मकत्वात् द्वादशात्मकं वत्सरं संवत्सररूप-मस्ति, एतत् तस्य रूपमिति सम्बन्धः। तथा चोक्तं श्रीभागवते 'योऽयं कालस्तस्य तेऽव्यक्तबन्धोश्चेष्टामाहुश्चेष्टते येन विश्वं। निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये' इति। निमेषादिसंवत्सरान्तव्यवहाराश्रयः काल इति कालस्वरूपमुक्तं भवति। इदानीमुक्तलक्षणः संवत्सराख्यः कालस्तदवयवैरेव प्रमेय इति विवक्षंस्तावत्कालावयवान् स्थूलतमादिक्रमेण व्युत्पाद-यति, एतस्येत्यादिना। एतस्य संवत्सरात्मनः कालस्य द्वादश मासाः संवत्सर इति श्रुतेर्द्वादशमासात्मकस्यार्द्धमुत्तरायण-षण्मासरूपमाग्नेयमग्निदेवत्यमौषधप्रधानत्वादस्य षण्मासस्य। अर्द्धं वारुणं वरुणदेवत्यं दक्षिणायनषण्मासरूपं जलप्रधानत्वादस्य षण्मासस्येत्यर्थः। तथा च तापोदकयोः कार्ययोः पर्यायेण नियतप्रवृत्त्यन्यथानुपपत्त्या यस्तद्धेतुभूतोऽर्थः कल्प्यते स काल उभयायनानुगतः संवत्सरात्मा सिद्ध इत्यर्थः। इदानीमयनाव-यवभूतान् मासान् व्युत्पादयिष्यंस्तदुपोद्घाततया नाक्षत्रमयनद्वयं प्रकल्प्य तद्द्वारा कालसद्भावकल्पनामाह, मघाद्यमिति। मघा-नक्षत्रमारभ्य श्रविष्ठाख्यनक्षत्रस्यार्द्धमर्द्धावसानं यावत् सविता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्क्रमेण सार्पाद्यं श्रविष्ठार्द्धान्तं सौम्यं तत्रैकैकमात्मनो नवांशकं सचारकविधं सौक्ष्म्यत्वादेतत्प्रमाणमनेनैव प्रमीयते हि कालो न विना प्रमाणेन प्रमेयस्योप-

---

क्रमेण नीचैः क्रमणेन स्वचारगत्या भुङ्क्ते तावदाग्नेयमग्निदेवत्यं, तत्र हि कालेऽग्निर्देव इव शीतार्त्तैर्मनुष्यैरुपास्यते। तथा सार्पाद्यं सर्पदेवत्यमश्लेषानक्षत्रं सार्पं, तत्प्रभृतिश्रविष्ठोत्तरार्द्धान्तं यावत् सविता उत्क्रमेणोर्द्ध्वमार्गक्रमणेन स्वचारगत्या भुङ्क्ते तावत् सौम्यं सोमदेवत्यं तस्मिन् हि काले चन्द्रस्तापार्त्तैर्मनुष्यैर्देव इवोपास्यत इति। अत्र श्रविष्ठार्द्धाद्यं सार्पान्तमिति यद्यपि वक्तुमुचितं तथापि यथा विभक्तयोः समययोः स्वभाववैलक्षण्यस्पष्टीकरणार्थं सार्पाद्यमित्युक्तं श्रविष्ठायां सवितरि वर्तमाने शीतानुवृत्तेस्तदाद्यग्रहणे हि न स्पष्टः स्वभावभेदो निर्दिष्टः स्यादितरत्र तु स्पष्टस्तत्र तापप्राचुर्ये विवादाभावात्, तथा च स्वभावभेदप्रकटीकरणायाऽऽर्थ एव क्रमो विवक्षितो न नक्षत्रपाठक्रम इति भावः। अत्रापि शीतोष्णयोर्नियतप्रवृत्तिहेतुकालकल्पना पूर्ववत् द्रष्टव्या। इदानीमुक्तैः सप्तविंशतिनक्षत्रैर्द्वादशराश्यवच्छेदेन मासक्लृप्तिमाह, तत्रेति। तत्र तेषु नक्षत्रेषु नव अंशा यस्मिंस्तन्नवांशकं, यदेकैकं नवांशकं तदात्मनः संवत्सरात्मन एकैकोऽवयव इति योज्यं। अंशः पादः नवांशा नव पादाः सपाद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लब्धिः प्रमेयोऽपि प्रमाणतां पृथक्त्वादुपैत्यात्मसम्बोधनार्थमित्येवं ह्याह। यावत्यो वै कालस्य कलास्तावतीषु चरत्यसौ यः कालं ब्रह्मेत्युपासीत कालस्तस्यातिदूरमपसरतीत्येवं ह्याह।

दनक्षत्रद्वयावच्छिन्न एको राशिः सूर्यगत्यनुसारेणैको मासः संवत्सरात्मनः कालस्यैकोऽवयव इत्युक्तं भवति। तथा च तत्तन्मासस्वभावभेदनियमेनापि कालकल्पनमुन्नेयं। एतत्सर्वं सचारकविधं, चारस्सङ्क्रमणं नक्षत्रादिषु परिभ्रमणं, तत्र विधा प्रकारः, तया विधया सहितं सचारकविधं। एतच्च ज्योतिःशास्त्रात् कलादिकालावयवगणनया सूर्यचारमालोच्य सर्वमवधेयमिति तात्पर्यार्थः। उक्तैरेवावयवैः कालोऽनुमेय इत्यत्र हेतुमाह सौक्ष्म्यत्वादिति सूक्ष्मत्वादित्यर्थः। इन्द्रियागोचरत्वात् कालस्यैतत् पूर्वोक्तमयनादिरूपं प्रमाणं कालास्तित्वे, तत्रानुभवं संवादयति, अनेनैव हि पूर्वोक्तप्रकारेण कालः प्रमीयते सम्यगवधार्यते न प्रत्यक्षादिनेत्यर्थः। किमेवं प्रमाणोपन्यासेनास्ति चेत् कालः स्वयमेव दृश्यतेति मन्दाशङ्कायामाह नेति, अनादिमायावच्छिन्नचिद्विलासरूपस्य कालस्य जडत्वात् प्रमेयान्तरवन्मानाधीनसिद्धिकत्वमित्यर्थः। यदि कालस्य प्रमेयत्वं तर्हि निमेषादीनामपि कालावयवानां कालत्वाविशेषादभेदे सति कथं कालेन कालप्रमेत्यत आह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालात् स्रवन्ति भूतानि कालाद्वृद्धिं प्रयान्ति च ।
काले चास्तं नियच्छन्ति कालो मूर्तिरमूर्तिमान् ॥ १४ ॥

द्वे वाव ब्रह्मणो रूपे कालश्चाकालश्चाथ यः प्रागादित्यात् सोऽकालोऽकलोऽथ य आदित्याद्यः स कालः

प्रमेयोऽपीति। पृथक्त्वादवयवावयविभावेन भेदात् प्रमेयोऽपि प्रमाणत्वमुपैति प्राप्नोति, किमर्थं, आत्मनः स्वस्य सम्यग्बोधनार्थमवधारणार्थं दीपप्रकाशेन दीपानुमानवदित्यर्थः। एवं ह्याह, एवंविधः कालः सूर्याधीन इत्यत्रोदाहरणमाहेत्यर्थः। "यावत्यो वै ० अमूर्तिमान्" इति। यावत्यो वै प्रसिद्धाः कालस्य कला अंशास्तावतीष्वसौ सविता चरति तत्प्रवर्तकत्वेन विचरति ताः सम्पादयतीत्यर्थः। अतो यः कालं कलयितारं कालरूपमादित्यं ब्रह्मेत्युपासीत तस्योपासकस्यातिदूरं कालोऽपसरति सकृन्मृत्वा पुनर्मरणाय न जायते कालव्याप्यो न भवतीत्यर्थः। तत्र कालस्य ब्रह्मदृष्ट्यर्हत्वाय पुनरुदाहरणमेवं ह्याह कालात् स्रवन्तीत्यादि, पादत्रयं स्पष्टार्थं। कालो मूर्तिमूर्तिमानादित्यरूपेण, अमूर्तिमांश्च निमेषादिसंवत्सरान्तेन रूपेणेति चतुर्थपादार्थः॥ १४ ॥

कालनिर्वर्तकत्वादादित्यः कालात्मको ब्रह्मदृष्ट्योपास्य इत्युक्तं, तत्र किं ब्रह्म निमेषादिकालेषु किमात्मकस्तादित्यो ब्रह्मदृष्ट्योपास्य इति वीचायामाह "द्वे वाव ० स वेदवित्"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सकलः सकलस्यै वा एतद्रूपं यत् संवत्सरः संवत्सरात् खल्वेवेमाः प्रजाः प्रजायन्ते संवत्सरेणेह वै जाता विवर्धन्ते संवत्सरे प्रत्यस्तं यन्ति तस्मात् संवत्सरो वै प्रजापतिः कालोऽन्नं ब्रह्मनीडमात्मा चेत्येवं ह्याह।

कालः पचति भूतानि सर्वाण्येव महात्मनि।
यस्मिंस्तु पच्यते कालो यस्तं वेद स वेदवित्॥ १५॥

इति। प्रायः स्पष्टार्थोऽयमनुवाकः। प्रागादित्यादिति आदित्योत्पत्तेः प्राग् यद्ब्रह्मणो रूपं सोऽकालः, स न कस्यापि कलयिता यतोऽकलः कलारहित इत्यर्थः। अथ य आदित्याद्य आदित्य आद्यः प्रवर्तको यस्य स तथा, स कालः सकलः कलाभिः सहित इत्यर्थः। सकलस्य वै इति. संवत्सरः सकलस्य कालस्य स्वरूपं। तस्योपास्यत्वाय ब्रह्मसाम्यमाह संवत्सरादिति। यस्मादेवं संवत्सरः सर्वकारणं तस्मात् संवत्सरो वै प्रसिद्धः प्रजापतिर्हिरण्यगर्भः सूर्यात्मा स कालः, सोऽन्नमन्नहेतुत्वात्, ब्रह्मणो नीडमालम्बनं ब्रह्मदृष्टियोग्यं प्रतीकमित्यर्थः। आत्मा च प्राणिनां 'सूर्य आत्मा' इति मन्त्रवर्णात्। एवं ह्याह महांश्चासावात्मेति महात्मा अकालात्मक ईश्वरः, तस्मिन्महात्मनि सर्वाण्येव भूतानि कालः पचति जरयति पुरमात्मन्यधिष्ठाने तदायत्तः कालो भूतानि पचन् परिवर्तत इत्यर्थः। तथा च श्रुत्यन्तरं 'एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विग्रहवानेष कालः सिन्धुराजः प्रजानां। एष तत्स्थः सविताख्यो यस्मादेवेमे चन्द्रर्क्षग्रहसंवत्सरादयः सूयन्तेऽथैभ्यः सर्वमिदमत्र वा यत्किञ्चित् शुभाशुभं *दृश्यन्तेह लोके तदेतेभ्यस्तस्मादादित्यात्मा ब्रह्माथ

(बृहदा० अ० ५। ब्रा० ८) इति। यस्मिंस्तु कालात्मा सविता पच्यते लीयते तं यो वेद स वेदरहस्यविदित्यर्थः ॥ १५ ॥

पुनरपि सकलं कालं स्तौति "विग्रहवानेष ० भाति मण्डले" इति। विग्रहवान् मूर्तिमानेष कालः पूर्वोक्तः प्रजानां सिन्धुराजः समुद्रः समुद्रवत् दुस्तर इति यावत्, एष सविताख्यो यस्मात् तत्स्थस्तस्मिन् काले निमित्ततया स्थितः। कोऽसौ सविताख्यः, यस्मादेव सवितुरिमे चन्द्रादयः सूयन्ते अभिषूयन्ते आप्यायन्ते स्वतेजःप्रवेशनेनेत्यर्थः। अथ प्रसिद्धमेभ्यश्चन्द्रादिभ्यः सर्वमिदं किं, यत्किञ्चित् शुभाशुभमिह लोके दृश्यते सुखदुःखादीत्यर्थः। तदेतेभ्यः आदित्यादिग्रहेभ्यो निमित्तभूतेभ्य इत्यर्थः। यस्मादेवमादित्यनिमित्ता जगत्स्थितिस्तस्मादादित्यात्मा ब्रह्म। यत एवम्प्रभाव आदित्योऽथ तस्मात् कालसञ्ज्ञमादित्यमुपासीतेत्येतद्विधिवाक्यं, कालसञ्ज्ञमादित्यं ब्रह्मेत्युपासीतेत्यर्थः। एके शाखिनः कालसञ्ज्ञालक्षणं गुणमणादृत्यादित्यो ब्रह्मेत्यादित्योपासनं ब्रह्मदृष्ट्या विदधति,

* उभयपुस्तक एष मूलपाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालसञ्ज्ञमादित्यमुपासीतादित्यो ब्रह्मेत्येकेऽथ एवं ह्याह ।

होता भोक्ता हविर्मन्त्रो यज्ञो विष्णुः प्रजापतिः ।
सर्वः कश्चित् प्रभुःसाक्षी योऽमुष्मिन् भाति मण्डले ॥ १६ ॥

ब्रह्म ह वा इदमग्र आसीदेकोऽनन्तः प्रागनन्तो दक्षिणतोऽनन्तः प्रतीच्यनन्त उदीच्यनन्त ऊर्द्ध्वञ्चा-

---

आदित्यो ब्रह्मेत्यादेश इत्यन्वेत्यर्थः । सर्वथाप्यादित्यो ब्रह्मेत्येवं ह्याह मन्त्रः । होता हविषः प्रक्षेप्ता यजमान ऋत्विग् वा, भोक्ता हविषः स्वीकर्ता देवताविशेषः, हविस्सुवादिद्रव्यं, मन्त्रस्तत्प्रक्षेपसाधनत्वेन विहितः, एतैः सर्वैः साध्यो यो यज्ञः स को विष्णुः, यज्ञो वै विष्णुरिति श्रुतेः । प्रजापतिः प्रजानां पालयिता ईश्वरः कर्मफलदाता, एवंविधो यो जगद्धेतुकलापः स सर्व एष एवेत्यध्याहारः, कः योऽमुष्मिन् दूरस्थे मण्डले भाति प्रकाशते, किंलक्षणः कश्चिदेकः यः कश्चिदिति वा सम्बन्धः, प्रभुः स्वतन्त्र ईश्वरः, साक्षी साक्षात् सर्वद्रष्टेत्यर्थः ॥ १६ ॥

इदानीमादित्यप्रतीकोपासनप्रसङ्गेनादित्यान्तर्यामिणो ब्रह्मण उपासनाविशेषं विधित्सन्नाह "ब्रह्म ह वा ० य एवं वेद" इति । ब्रह्म ह परमात्मा वै एव इदं कालसूर्याग्न्यादिकं जगदग्रे सृष्टेः पूर्वमासीत् ब्रह्मणोऽविभक्तमेव सर्वं वटबीज इव महान् वट आसीदित्यर्थः । अत एव स परमात्मैकः सजातीय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽवाङ् च सर्वतोऽनन्तो न ह्यस्य प्राच्यादिदिशः कल्पन्तेऽथ तिर्यग्वाङ् चोर्द्ध्वं वानूह्य एष परमात्माऽपरिमितोऽजोऽतर्क्योऽचिन्त्य एष आकाशात्मैवैष कृत्स्न-

---

विजातीयवस्त्वन्तरशून्यः तर्हि किं वटबीजवत्सूक्ष्मो नेत्याहानन्तोऽपरिच्छिन्नो देशतः कालतो वस्तुतश्चासङ्कुचित इत्यर्थः। उक्तमानन्त्यमुपपादयति प्रागनन्त इत्यादिना, प्राच्यादिषु दशस्वपि दिक्षु परिच्छेदरहितत्वात् सर्वतोऽनन्त इत्यर्थः। तर्हि यासु दिक्ष्वस्यापरिच्छेदस्ता दिशोऽन्याः सन्तीति तत् एव वस्तुपरिच्छेदोऽस्य स्यादिति कुतो निरङ्कुशमानन्त्यमित्यत आह, न ह्यस्येति। अस्याश्रयतया प्राच्यादिदिशो न हि कल्पन्ते न वस्तुतः सन्तीत्यर्थः। अथ तथा तिर्यङ् वाऽवाङ् चोर्द्ध्वं वा दिग्भेदोऽस्य न कल्पत इत्यर्थः। देशो वा देशसम्बन्धि वा वस्तु किमप्यस्य परिच्छेदकं नास्तीत्यभिप्रायः। यतोऽनूह्य एष परमात्मा न केनाप्यूह्यते धार्यत इत्यनूह्यो न क्वचिदाश्रित इत्यर्थः। तथा च श्रुत्यन्तरं 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' (छां० उ०) इति। 'अन्यो ह्यन्यस्मिन् प्रतिष्ठितः' इति च। अनूह्यत्वे हेत्वर्थं विशेषणं, अपरिमित इति। यद्वस्तूह्यते तत्परिमितं दृष्टं, अयं परमात्मा न परिमितः, पूर्णं पुरुषेण सर्वमिति सर्वातिशायित्वश्रवणात्, अतोऽनूह्य इत्यर्थः। अज इत्यपरिमितत्वे हेतुः, यज्जन्मवत् तत्परिमितं तद्धि क्वचित्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षय एको जागर्तीत्येतस्मादाकाशादेष खल्विदं चेता-
मात्रं बोधयत्यनेनैव चेदं ध्यायतेऽस्मिंश्च प्रत्यस्तं या-

कदाचित् किञ्चिदित्युल्लिख्यते, अयं तु 'न जायते म्रियते वा' इति श्रुतेरजोऽतो न परिमित इत्यर्थः। परमात्मापि जन्मवान् कारणत्वात् मृदादिवदित्यत आह, अतर्क्य इति। न तर्कगम्य इत्यर्थः। न सामान्यतो दृष्टानुमानादिरूपेण तर्केणायमीदृग् धर्मक इति व्यवस्थापयितुं शक्यते 'नावेदविन्मनुते तं बृहन्तं' 'नैषा तर्केण मतिरापनेया' इत्यादिश्रुतिभिस्तर्कागोचरत्वप्रति-पादनात्, श्रुत्यैकगम्येऽर्थे श्रुतिविरुद्धस्यानुमानस्यानुदयाच्चेति भावः। अतर्क्यत्वे हेतुरचिन्त्य इति। यत् तर्क्यते तन्मनसो गोचरे वर्तते स्वयञ्च मनोगोचरो नायं। तथा 'न तस्य कार्यं करणञ्च विद्यते न चास्य कश्चिज्जनिता न चाधिपः' (श्वे०। उ०) 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतेरित्यर्थः। तत्रासङ्गत्वं हेतुमाह एष आकाशात्मेति आकाशवदसङ्गः आत्मा स्वरूपं यस्य स तथा। न हि मनसाऽसम्बद्धं मनोवेद्यं भवेदतिप्रसङ्गात्, 'असङ्गो ह्ययं पुरुषः' (बृहदा०) इति श्रुतेर्नास्य मनःसर्ग इत्यर्थः। तत एवंविधस्यानन्त्ये न कोऽपि विघ्न इति सिद्धं। इतोऽप्ययमनन्त एष्टव्य इत्यभिप्रेत्याह एवैष इति। एष एवेत्यन्वयः, कृत्स्नचये सर्व-जगत्प्रलये एक एवैष परमात्मा जागर्ति अप्रच्युतस्वभावो वर्तते, अन्यत् किमपि तदा नाभूदित्यर्थः। तथा च श्रुत्यन्तरं 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत्' (ऐतरेयोप०) इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यस्यैतद्भास्वरं रूपं यदमुष्मिन्नादित्ये तपत्यग्नौ चाधूमके यज्ज्योतिश्चित्रतरमुदरस्थोऽथ वा यः पचत्यन्नमित्येवं ह्याह।

एतदेव सर्वविकारकारणत्वेन सर्वाधिष्ठानतया स्पष्टीकरोति इत्येतस्मादिति। इतिशब्द उक्तविशेषणसमाप्त्यर्थत्वेन पूर्वेण वाऽन्वेति। एतस्मादित्येव प्रतीकमिदं। एष एव कृत्स्नचय एको जागर्तीति यतोऽत एतस्मादित्याद्ये प्रतीके योजना। एतस्मादाकाशात् प्रसिद्धाद्भूताकाशादारभ्य यदिदं जगच्चेतामात्रचैत्यमात्रमिति यावत्, चैतन्याभासव्याप्तत्वेनोपलभ्यमानत्वाच्चैत्यमपि चेतामात्रमुच्यत इति द्रष्टव्यं। आकाशादिसर्वं जगदेष खलु परमात्मा बोधयति बोधव्याप्तं करोति पालयतीत्यर्थः। किञ्चानेनैव परमात्मनेदं ध्यायते ध्यानमात्रेणोत्पाद्यते 'सोऽकामयत बहु स्यां प्रजायेय' इति 'इदं सर्वमसृजत' इति च श्रुतेः। अस्मिंश्चास्मिन्नेव प्रत्यस्तं प्रलयं याति एकात्मतां गच्छतीत्यर्थः। तस्मादेक एवैष कृत्स्नचये जागर्तीत्युपपन्नमस्य सर्वदैवानन्तत्वमिति भावः। एवमुपास्यस्य परमात्मनः स्वाभाविकं स्वरूपमुपवर्ण्य तस्योपासनाधिष्ठानं निर्दिशन्नाहास्येति। अस्य परमात्मन एतद्यथोक्तं भास्वरं स्वप्रकाशं जगदवभासकं रूपं स्वरूपं यद्रूपममुष्मिन्नादित्ये प्रसिद्धे तपति आदित्ये स्थितं स जगत् तापयति प्रकाशयति च, एतदस्य रूपमिति। किञ्चाधूमकेऽग्नौ यज्ज्योतिस्तदप्यस्यैव रूपमिति सम्बन्धः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यश्चैषोऽग्नौ यश्चायं हृदये यश्चासा आदित्ये स एष एका इत्येकस्य हैकत्वमेति य एवं वेद ॥ १७ ॥

तथा तत्प्रयोगकल्पः प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडङ्गा इत्युच्यते योगः । अनेन

कीदृशं ज्योतिः चित्रतरमतिविचित्रं तत्तदिन्धनभेदवशात् ह्रस्वस्थूलवक्रत्वाद्याकारेणावभासमानमित्यर्थः । अथ वा योऽन्योऽप्युदरस्थो जाठरसञ्ज्ञोऽग्निरन्नं भुक्तं पचति सोऽप्यस्यैव रूपमिति सम्बन्धः । इत्येतदेव प्रशंसन्नेवं ह्याहाऽत्रापेक्षितं विशेषमिति शेषः । यश्चैषोऽग्नौ ज्योतीरूपो यश्चायं हृदये साक्षिरूपो यश्चासावादित्ये तपनप्रकाशनस्वभावः एष परमात्मैव स एको न्याय इति एवम्प्रकारेणात्मन्यादित्यादौ च परमात्मैव ज्योतिरिति य एवं वेद उपास्ते स एकस्य परमात्मनः हि स्फुटमेकत्वमेति प्राप्नोति परमात्मसायुज्यं गच्छति तस्मात् सर्वत्र प्रकाशस्वरूपं परमात्मैवाहमित्युपासीत इति वाक्यार्थः ॥ ॥ १७ ॥

पूर्वानुवाके ध्येयं रूपं ध्यानविधिञ्च दर्शयित्वेदानीं ध्येये चित्तस्थिरीकरणलक्षणस्य ध्यानस्य सिद्धये चित्तवशीकारोपायं योगं साङ्गमुपदिशति "तथा तत्प्रयोगकल्पः ० इत्युच्यते योगः" इति । यथा प्रागुक्तोपासनासाधनचित्तैकाग्र्यसिद्धिस्तथा तत्प्रयोगकल्पस्तस्य चित्तैकाग्र्यसाधनस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदा पश्यन् पश्यति रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं। तदा विद्वान् पुण्यपापे विहाय परेऽव्यये सर्वमेकीकरोत्येवं ह्याह ।

प्रयोगकल्पोऽनुष्ठानविधिरयमुच्यत इति वाक्यशेषः। तमेवाह, प्राणायामः पूरककुम्भकरेचकभेदेन प्राणवायोरायमनं वशीकरणं प्राणायामः। इन्द्रियाणां विषयेभ्यः प्रत्याहरणं प्रतिनिवर्तनं प्रत्याहारः। पराक्स्रोतःपरावर्तनेनेन्द्रियाणां प्रत्यक्स्रोतः-प्रवर्तनं प्रत्याहार इत्यर्थः। ध्येये वस्तुन्यन्तःकरणस्य प्रयत्नेन तदाकारतया निवेशनं ध्यानं। तस्मिन्नेव तस्य तैलधारादिवदविच्छेदेन स्थिरीकरणं धारणं धारणा। मनो ध्येये वस्तुनि तदाकारतया सम्यक् सम्पन्नं न वेति परीक्षणं तर्कः, ध्यानधारणासामर्थ्यादुपस्थितक्षुद्रसिद्धीनां योगान्त-रायत्वोहनं वा तर्कः, सविकल्पकसमाधिर्वा तर्कः। चित्तस्य ज्ञेयवस्त्वाकारतामापन्नस्य निर्वातदेशस्थप्रदीपशिखावद-चलतयावस्थानं समाधिः। इत्येवं षड्विधैरङ्गैरुपेतो योगः षडङ्ग उच्यत इत्यर्थः। उक्तस्यास्य योगस्य सर्वार्थध्यानोप-कारकतां विवक्षन्नाह "अनेन यदा ० कदाचन" इति। अनेन योगेन सम्यगभ्यस्तेन पश्यन् स्वध्येयं वस्तु समालोचयन् सन् यदा यस्मिन् समये रुक्मवर्णं पुरुषं पश्यति साक्षादनु-भवति तदा तस्मिन्नेव समये विद्वान् परिपूर्णं तत्त्वं जानानः पुण्यपापे अनारब्धफले विहाय त्यक्त्वा प्रारब्धस्यापि कर्मण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा पर्वतमादीप्तं नाश्रयन्ति मृगद्विजाः।
तद्वद्ब्रह्मविदो दोषा नाश्रयन्ति कदाचन ॥ १८ ॥

अथान्यत्राप्युक्तं यदा वै बहिर्विद्वान् मनो नियम्ये-न्द्रियार्थांश्च प्राणे निवेशयित्वा निःसङ्कल्पस्ततस्ति-

---

उभयविधस्य भोगेन विनाशे सति सर्वं प्राणेन्द्रियदेहादिरूप-मुपाधिं परे परमात्मन्यव्यये कूटस्थे प्रत्यगात्मनि ब्रह्मण्येकीक-रोति, तप्तायःपीतोदकविन्दुवत् प्रकाशमाने आत्मन्युपसंहरति इत्यर्थः। रुक्मवर्णमित्यादिपुरुषविशेषणजातस्यायमर्थः, रुक्मवर्ण-मिति स्वतःसिद्धप्रकाशात्मताद्योतनादविषयत्वं पुरुषस्य विवच्यते, कर्तारमिति पुरुषविशेषणं भूतपूर्वगत्योच्यते, ईशं योनिमिति च ब्रह्मविशेषणे निमित्तोपादानपरे ते अपि भूतपूर्वगत्यानूद्येते। पुरुषब्रह्मशब्दौ त्वन्तत्पदलच्यविषयौ, तथा च कर्तारं पुरुष-मीशं योनिं ब्रह्म रुक्मवर्णं यदा पश्यति इति योजनीयो ग्रन्थ इति। एवं ह्याहेत्यादिर्विद्यामाहात्म्यख्यापनपरो ग्रन्थः स्पष्टार्थः ॥ १८ ॥

इदानीं पूर्वोक्तयोगे परिनिष्ठितस्य श्रेष्ठं पदं स्वे हृदि धारणायाः प्रवर्तते वक्तुमनन्तरेण खण्डेन वेदोऽतिरहस्यवादी "अथान्यत्राप्युक्तं० निराश्रयं" इति। यदा वै यस्मिन्नेव काले विद्वान् योगी प्राणः प्राणोपाधिं प्रविष्टो मनो नियम्यैकत्र स्थिरं कृत्वा इन्द्रियार्थांश्च शब्दादीन् विषयान् बहिर्निवेशयित्वा दूरतस्त्यक्त्वा ततस्तदनन्तरं निःसङ्कल्पो निर्विकारमनास्तिष्ठेदिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्ठेदप्राणादिह यस्मात् सम्भूतः प्राणसञ्ज्ञको जीव-स्तस्मात् प्राणो वै तुर्याख्ये धारयेत् प्राणमित्येवं ह्याह।

अचित्तं चित्तमध्यस्थमचिन्त्यं गुह्यमुत्तमं।
तत्र चित्तं निधायेत तत्र लिङ्गं निराश्रयं ॥ १९ ॥

पदान्वयानुरूपा व्याख्या। कथं विद्वान् प्राणः कथं वा तिष्ठेदित्याकाङ्क्षायामाह, अप्राणादिति। अप्राणात् प्राणादि-विशेषरहिताच्चिदात्मन एवेह देहे यस्मात् प्राणसञ्ज्ञको जीवः सम्भूतः प्राणधारणोपाधिना प्राणसञ्ज्ञां प्राप्य जीवो जात इति यावत् तस्मात् प्राणो वै स्वभावतोऽप्राणोऽपि प्राण इति प्रसिद्धः, स तुर्याख्येऽवस्थात्रयातीतेऽप्राणे प्राणमात्मानं धारयेत् प्राणात्मभावनां हित्वाऽप्राणचिदात्मभावनां कुर्या-दित्यर्थः। एवं ह्याहाच कश्चिन्मन्त्रः। अचित्तं चित्तरहितं चित्तमध्यस्थमन्तर्मनस्यभिव्यक्तं चित्तस्थितमपि तेनाचिन्त्यं चिन्त-नानर्हं, अत एवोत्तमं गुह्यमतिगुह्यं, सर्वेन्द्रियाविषय इत्यर्थः। तत्राचिन्त्ये गुह्ये तत्त्वे चित्तं निधायेत तदाकारीकर-णेन तन्मयं चित्तं कुर्यात्, तच्च प्राणाख्यं लिङ्गं लिङ्गोपाधिकं जीवरूपं निराश्रयमभिमन्तुराश्रयस्याभावात् तदा न पृथ-गवभासत इत्यर्थः। यद्वा आश्रयशब्दो विषयपरः, तथा च तच्च चित्ताख्यं लिङ्गं निराश्रयं निर्विषयं सम्पद्यते तदेति शेषः ॥ १९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथान्यत्राप्युक्तमतः परास्य धारणा तालुरसनाग्रनिपीडनाद्वाङ्मनःप्राणनिरोधनाद् ब्रह्म तर्केण पश्यति यदात्मनात्मानमणोरणीयांसं द्योतमानं मनःक्षयात् पश्यति तदात्मनात्मानं दृष्ट्वा निरात्मा भवति निरात्मकत्वादसङ्ख्योऽयोनिश्चिन्त्यो मोक्षलक्षणमित्येतत्परं रहस्यमित्येवं ह्याह।

एवं ज्ञानमार्गेणात्मनोऽवस्थात्रयातीतस्वरूपे धारणाप्रकारमभिधाय योगमार्गेणापि धारणाविशेषं कैवल्यं सम्मतमुपदिशति "अथान्यत्राप्युक्तं ० सुखमव्ययमश्नुता इति" इति। अतोऽनन्तरमस्य तुर्यात्मनि स्थितस्यात्मनः परा उत्कृष्टा धारणा परा अन्येति वा कथ्यत इति वाक्यशेषः, यदाऽयं योगाभ्यासवशीकृतचित्तः सन्नुन्मनीभावं जिगमिषति तदाऽयमुपायः कार्यः। कथं, तालुकण्ठदेशे जिह्वोद्गमनस्थानं, तस्मिंस्तालुनि रसनाग्रस्य निपीडनमन्तःप्रवेशनं, तस्मात् तालुरसनाग्रनिपीडनात् लम्बिकायोगकरणादिति यावत्, तत्र च वाङ्मनःप्राणानां निरोधनात् सङ्कल्पोच्चारणस्पन्दनानां परिवर्जनात् ब्रह्म पारमेश्वरं तत्त्वं तर्केण धारणानन्तरभाविना निश्चितरूपेण ज्ञानेन पश्यति। यदैवंप्रकारेण मनःक्षयात् मनसो मनस्त्वनाशात् अणोः सूक्ष्मादप्यणीयांसमतिसूक्ष्ममिन्द्रियागोचरं द्योतमानं स्वयमेव प्रकाशमानमात्मानं प्रत्यञ्चमात्मना पर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभं।
प्रसन्नात्मात्मनि स्थित्वा सुखमव्ययमश्नुता इति ॥ २० ॥

अथान्यत्राप्युक्तमूर्द्धगा नाडी सुषुम्नाख्या प्राणसञ्चारिणी ताल्वन्तर्विच्छिन्ना तथा प्राणोङ्कारमनो-

---

मात्मना, 'इत्थंभावे तृतीया', परमात्मरूपेण पश्यति साक्षादनुभवति। तदाऽऽत्मनात्मानं दृष्ट्वा निरात्मा भवति निर्मनस्को भवति जीवभावान्निवर्त्तते, एषावस्था योगिभिरुन्मनीत्युच्यते। निरात्मकत्वादुक्तरूपेणोन्मनीभावात् परिच्छेदकविरहादसङ्ख्योऽपरिच्छिन्नोऽयोनिराश्रयरहित आत्मा चिन्त्यः, चिन्तनं नामात्र तदात्मनावस्थानमात्रं, एवंविध आत्मा तदा स्फुरति इत्युक्तं भवति। न पुनरत्र विधिरसम्भवात् तस्येहेति भावः। इत्येतन्मोक्षलक्षणं मोक्षस्वरूपं परं रहस्यमतिशयेन गोप्यमित्यस्मिन्नर्थ एवं ह्याह मन्त्रमुदाहरति, चित्तस्य हीति। प्रसादो निर्वासनतापत्तिः, आत्मनि स्थितिस्तस्मिन्नेकीभावः, स्पष्टमन्यत् ॥ २० ॥

इदानीमुपासकस्योपासनापरमफलप्राप्त्यर्थं देहादुत्क्रमणमार्गमुपदिशति "अथान्यत्राप्युक्तं ० पश्चाद्युञ्जीत मूर्द्धनि" इति। या सुषुम्नाख्या नाडी हृदयान्मूर्द्ध्नि ब्रह्मरन्ध्रपर्यन्तमूर्द्धगा प्राणसञ्चारिणी प्राणस्य ब्रह्मलोकपर्यन्तं सूर्यरश्मिद्वारा सञ्चारयित्री प्रसिद्धा। तथा च श्रुत्यन्तरं 'शतञ्चैका च हृदयस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युक्तयोर्द्ध्वमुत्क्रमेत् ताल्वध्यग्रं परिवर्त्य चेन्द्रियाण्यसंयोज्य महिमा महिमानं निरीक्षेत ततो निरात्मकत्वमेति निरात्मकत्वान्न सुखदुःखभाग्भवति केवलत्वं लभता इत्येवं ह्याह ।

नाड्यस्तासां मूर्द्धानमभिनिःसृतैका । तयोर्द्ध्वमायन्नमृतत्वमेति' (कठोप०) इति । सा पुनरूर्द्ध्वं गच्छन्ती ताल्वन्तरमध्ये विच्छिन्ना कुण्ठिता भवति । तथा च तत्र यत्नतस्तया प्राणोङ्कारमनोयुक्तया अभ्यासवशीकृतेन प्राणेन ध्येयब्रह्माकाराकारितेन मनसा ॐकारध्वनिना च युक्तया ऋज्वीकृतयोर्द्ध्वं तालूपरि स्तनाकारेण लम्बमानमांसान्तःप्रवेशनेनोत्क्रमेदुपरि गच्छेदित्यर्थः । तथा च श्रुत्यन्तरं 'अन्तरेण तालुके य एष स्तन इवावलम्बते सेन्द्रयोनिर्यत्रासौ केशान्तो विवर्तते व्यपोह्य शीर्षकपाले' (तैत्तिरीयोप०) इति । तत्रोर्द्ध्वं नाडीनयनप्रकारमाह ताल्वध्यग्रं परिवर्त्येति । तल्वधि उपरि रसनाया अग्रं परिवर्त्य सञ्चार्य, यद्वा तालुनोऽग्रादुपरि ताल्वन्तः रसनाग्रं निवेश्योपरि स्तनाकारमभिभूयेति यावत् । इन्द्रियाणि संयोज्य प्राणमनोभ्यामेकीकृत्योत्क्रमेदिति पूर्वेणान्वयः । एवमुत्क्रमणे यो महिमा परिच्छेदनिवृत्त्या पूर्णतारूपस्तं महिमानं निरीक्षेतानुभवेत्, ततस्तस्मान्निरीक्षणात् निरात्मकत्वं निरिन्द्रियमनस्कत्वं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परः पूर्वं प्रतिष्ठाप्य निगृहीतानिलं ततः।
तीर्त्वा पारमपारेण पश्चाद्युञ्जीत मूर्द्धनि॥२१॥

निर्लिङ्गत्वमेति प्राप्नोति, निरात्मकत्वात् न सुखदुःखभाग्भवति वति केवलत्वं कैवल्यं मोक्षं लभत इत्येवमर्थं ह्याह मन्त्र इत्यर्थः। इन्द्रियाण्यसंयोऽप्येति पाठे इन्द्रियायतनानां शरीरावयवानां मनःप्राणाभ्यामसम्बन्धनमुपदिश्यत इति व्याख्या। एतदुक्तं भवति, प्रागुक्तप्रकारेण योगधारणया युक्तो ब्रह्मोपासीनो यदा योगसामर्थ्यात् तत्त्वतः सञ्चारितसुषुम्नानाडीकस्तत्रैव कथञ्चित् परमात्मतत्त्वमवगच्छति सदोन्मनीभावेन परममुक्तेरयत्नलभ्यत्वं जानंस्तत्रैव यावज्जीवं ब्रह्ममयोऽवतिष्ठेत। ततः प्रारब्धक्षये देहविगमे परमं महिमानं परममुक्तिलक्षणं गच्छति। यदा पुनः प्रागुक्तं स्थानं योगमहिम्ना प्राप्नोति ब्राह्मलौकिकैश्वर्यविहाराभिलाषस्तदोर्द्धमुक्तप्रकारेणोत्क्रम्य महिमानं ब्राह्मलौकिकं निरीक्षेत, ततः क्रमेण केवलत्वं कालेन लभत इति। परः पूर्वमिति पूर्वमभ्यासदशायां निगृहीतानिलं वशीकृतप्राणं परः परस्तात् तालुदेशे प्रतिष्ठाप्य स्थिरीकृत्य ततः पश्चात्पारं परिच्छिन्नं जीवभावं तीर्त्वा उल्लङ्घ्य पश्चादपारेणापरिच्छिन्नेन ब्रह्मणा तद्रूपेणात्मानं मूर्द्धनि ब्रह्मरन्ध्रे युञ्जीत योजयेत् मूर्द्धद्वारा ब्रह्मभावं नयेदित्यर्थः॥ ॥२१॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथान्यत्राप्युक्तं द्वे वाव ब्रह्मणी अभिध्येये शब्दश्चाशब्दश्चाथ शब्देनैवाशब्दमाविष्क्रियतेऽथ *तत्र ओमितिशब्दोऽनेनोर्द्ध्वमुत्क्रान्तोऽशब्दे निधनमेत्यथाहैषा गतिरेतदमृतमेतत् सायुज्यत्वं निर्वृतत्वं तथा

इदानीं प्रकारान्तरेण ब्रह्मप्राप्त्युपायमुपदेष्टुमुपक्रमते "अथान्यत्राप्युक्तं द्वे ० अधिगच्छति" इति। द्वे वाव एव ब्रह्मणी अभिध्येये, के ते शब्दश्चैकं ब्रह्म अशब्दश्च द्वितीयं, किन्ते द्वे अपि स्वतन्त्रे न किन्तूपायोपेयरूपे इत्याह, अथानयोर्ब्रह्मणोर्यः शब्दस्तेन शब्देन ब्रह्मणाऽशब्दं ब्रह्माविष्क्रियते प्रकटीक्रियतेऽनभिव्यक्तितिरोधानमात्रेणेत्यर्थः। किं शब्दब्रह्म कथं वा तेनाशब्दं ब्रह्माविष्क्रियत इति तदाह, अथैवं सति तत्र तयोर्द्वयोर्मध्ये ओमितिशब्दः ओङ्कारः शब्दाख्यं ब्रह्म, अनेन सर्वार्थवाचकसर्वशब्दव्यापकतया पूर्णत्वेनोद्भूत्याभ्यस्तेन साधनेनानेन शब्दब्रह्मणोर्द्ध्वं प्रपञ्चादुपरि उत्क्रान्त उद्गतो वाच्यवाचकरूपं सर्वं वेद्यजातमतिक्रान्तः सन्नशब्दे परे ब्रह्मनि निधनं नद्य इव समुद्रे लयमेति प्राप्नोति। यैवमशब्दे वाचामगोचरे ब्रह्मण्येकतापत्तिरथ तदा एषा हि गतिः परमं फलं, एतदेवामृतममृतत्वं मोक्षः, एतत् सायोज्यं सायुज्यं सयुग्भावस्तादात्म्यमिति यावत्, निर्वृतत्वं परमानन्दाविर्भावः कृतकृत्यत्वमित्यर्थः। इतिशब्दः शब्दाशब्दब्रह्मोपदेशसमाप्त्यर्थः।

---

* यत्रा इति पाठान्तरं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चेत्यथ यथोर्णनाभिस्तन्तुनोर्द्ध्वमुत्क्रान्तोऽवकाशं लभतीत्येवं वाव खल्वसा अभिध्याता ओमित्यनेनोर्द्ध्वमुत्क्रान्तः स्वातन्त्र्यं लभतेऽन्यथा परे शब्दवादिनः श्रवणाङ्गुष्ठयोगेनान्तर्हृदयाकाशशब्दमाकर्णयन्ति सप्त-

---

उक्तेऽर्थे दृष्टान्तमाहयेति। अथास्मिन्नर्थे दृष्टान्तो यथोर्णनाभिर्लूताकीटस्तन्तुना स्वमुखाल्लालानिर्मितेनाविच्छिन्नेन सूत्रेणोर्द्ध्वमुपरिदेशं प्रत्युत्क्रान्तोऽवकाशं निरङ्कुशविहारस्थानं लभति लभते इति प्रसिद्धं जन्त्वन्तरसाधारणदेशशावल्यं परित्यज्यासाधारणं निर्भयमवकाशं प्राप्नोतीत्यर्थः। एवं वाव एवमेव खलु यथायं दृष्टान्तस्तथा असावभिध्याता ओमित्यनेन शब्दब्रह्मणा साधनेनोर्द्ध्वमुत्क्रान्तोऽहंममतास्पदशावल्यादिमुक्तः स्वातन्त्र्यं कैवल्याख्यं लभत इत्यर्थः। एवं प्रणवाख्यशब्दब्रह्माभ्यासोऽशब्दपरब्रह्माविर्भावसाधनमिति स्वमतमुक्का मतान्तरमाहान्यथेति, परे शब्दवादिनः शब्दब्रह्मवादिनः शब्दमाकर्णयन्तीत्यन्वयः। कथमिति तदाह श्रवणेति। कर्णयतोरङ्गुष्ठं योजयित्वा कर्णयोरङ्गुष्ठाभ्यां पिधानेनान्तर्हृदये य आकाशोऽवकाशस्तत्रत्यं शब्दमाकर्णयन्ति तं शब्दं शब्दब्रह्मेति मन्यन्त इत्यर्थः। तस्य श्रूयमाणस्यान्तर्हृदयाकाशस्थघोषस्येयं वक्ष्यमाणा सप्तविधोपमोपमानं भवति। तामेवाह यथेति, नद्यो नदीनां घोषः, किङ्किणी घण्टाघोषः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विधेयं तस्योपमा यथा नद्यः किङ्किणी कांस्यचक्रक-भेकविःक्वन्धिका वृष्टिर्निवाते वदतीति तं पृथग्-लक्षणमतीत्य परेऽशब्देऽव्यक्ते ब्रह्मण्यस्तं गतास्तत्र तेऽपृथग्धर्मिणोऽपृथग्विवेक्या यथा सम्पन्ना मधुत्वं नानारसा इत्येवं ह्याह।

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ २२ ॥

कांस्यं तत्पात्रघोषः, चक्रकं रथचक्रध्वनिः, भेकविःक्वन्धिका मण्डूकरवः, वृष्टिर्वर्षणशब्दः, निवाते गुहायां कूपे वा वदति वदनसुपरिस्थितेन श्रूयमाणं सोऽप्येकः प्रकारः। एतैर्ध्वनिभिः सदृशो योऽन्तराकाशशब्दस्तं शब्दब्रह्मापरे वदन्तीत्यर्थः। इतिशब्द उपमेत्यनेन पूर्वेण सम्बध्यते। तमेवमन्तर्हृदये श्रूय-माणं पृथग्लक्षणमनेकोपमानैरनेकधा विभाव्यमानं शब्द-मतीत्य परेऽशब्देऽव्यक्ते वाचामगोचरे ब्रह्मणि शुद्धेऽस्तं गता अदर्शनं प्राप्तास्ते शब्दब्रह्मवादिन इत्यर्थः। तत्र परे ब्रह्मणि तेऽपृथग्धर्मिणो ब्रह्मैकस्वभावा अत एवापृथग्विवेक्याः पृथग्विवेक्तुमशक्याः पूर्ववद्भेदोल्लेखायोग्या इत्यर्थः। तत्रायं दृष्टान्तो यथा नानारसाः पृथक्स्वभावकुसुमरसा यथा मधुत्वं मध्वात्मत्वं सम्पन्नाः सन्तो न पृथग्विवेक्यास्तद्वदित्यर्थः। एवं ह्यत्रोदाहरणमाह श्रुतिः द्वे ब्रह्मणी इति, श्लोकः स्पष्टार्थः॥ ॥ २२ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथान्यत्राप्युक्तं यः शब्दस्तदोमित्येतदक्षरं यदस्याग्रं तच्छान्तमशब्दमभयमशोकमानन्दं तृप्तं स्थिरमचलममृतमच्युतं ध्रुवं विष्णुसञ्ज्ञितं सर्वापरत्वाय तद्देता उपासीतेत्येवं ह्याह ।

योऽसौ परापरो देवा ओङ्कारो नामनामतः ।
निःशब्दः शून्यभूतस्तु मूर्ध्नि स्थाने ततोऽभ्यसेत् ॥ २३ ॥

उक्तमेव शब्दाशब्दब्रह्मरूपं विभज्याशब्दब्रह्मस्वरूपं विशदयति "अथान्यत्राप्युक्तं यः ० ततोऽभ्यसेत्" इति । यदोमित्येतदक्षरं तच्छब्दः शब्दाख्यं ब्रह्मेति योजना । यदस्य प्रणवाख्याक्षरस्याग्रं नादावसानस्थानं तच्छान्तं निर्विशेषमशब्दमशब्दाख्यं परं ब्रह्म, अभयमित्यादीनि तस्य स्वरूपलक्षणार्थानि विशेषणानि स्पष्टार्थानि । सर्वापरत्वाय सर्वस्मादपरत्वाय मोक्षाय तद्देता एते उक्तलक्षणे ब्रह्मणी उपासीतेत्येवमस्मिन्नर्थे ह्याह । योऽसौ प्रसिद्धः परस्यापरस्य परापरब्रह्मदृष्ट्यर्हत्वाद्देवः परं ब्रह्म । कः, ओङ्कारो नामनामतः, योऽयं प्रसिद्धः स शब्दब्रह्मेत्यर्थः । यस्तु निःशब्दः परं ब्रह्माशब्दाख्यं शून्यभूतो निराकारत्वान्निर्विशेषः, तत एवंविधमात्मानं ब्रह्म मूर्ध्नि स्थाने सर्वोत्कृष्टे हृदयस्थाने, अथवा भ्रुवोर्घ्राणस्य च यः सन्धिः सोऽविमुक्ताख्यः श्रुत्यन्तरे प्रसिद्धस्तस्मिन्मूर्ध्नि स्थानेऽभ्यसेत् ध्यायीतेत्यर्थः ॥ २३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथान्यत्राप्युक्तं धनुः शरीरमोमित्येतच्छरः शि-खास्य मनस्तमोलक्षणं भित्त्वा तमोऽतमाविष्टमाग-च्छत्यथाविष्टं भित्त्वाऽलातचक्रमिव स्फुरन्तमादित्य-वर्णमूर्जस्वन्तं ब्रह्म तमसः पर्यमपश्यद्यदमुष्मिन्नादित्ये

पूर्वोक्तप्रकारेण यथानिर्दिष्टं ब्रह्मोपासितवतो गतिं साधन-विशेषोपदेशपूर्वकमाह, यद्वा 'द्वे वाव ब्रह्मणी अभिध्येये' इत्य-स्मिन्ननुवाके स्वमतेन शब्दब्रह्म प्रणवाख्यमुक्तं तन्निष्ठायां प्रकार-विशेषमुपदिशन्नुपासनाफलप्रकारमाह "अथान्यत्राप्युक्तं धनुः ० क एव सः" इति। धनुः कोदण्डः प्रसिद्धं शरीरं, ओमि-त्येतदक्षरं शरः, अस्य शरस्य शिखा अग्रं शल्यस्थानीयं मनः, तमो भ्रान्तिज्ञानं लक्षणं सद्भावज्ञापकं यस्य तत् तमोलक्षणं, तमो मूलाज्ञानं भित्त्वा शरप्रयोगेण लक्ष्यतमोभेदनं कृत्वाऽत-माविष्टं सन्धिः क्रान्दसः, अतमसाविष्टं तमसावेशनरहितं सद्भा-तादिविक्तमात्मानमागच्छति, मनोरूपं शराग्रं तस्मिन्निवेशय-तीत्यर्थः। एतदुक्तं भवति 'सम आसन आसीनः सममूर्द्धं धृतं शरीरं धनुरिव किञ्चिद्वक्षसि चिबुकारोपणेनायम्य तस्मिन् प्रणवं घोषवन्तं शरमिवाविष्कृत्य तस्य नादलयस्थाने मनः शर-शल्यमिव बद्ध्वा तेन प्रणवशराग्रेण मनसा आवरणं सविक्षेप-मज्ञानं विदार्य तदाश्रयविषयतयोपलक्षितमात्मानं प्रवेशयेत् तन्मनः' इति। अथानन्तरमाविष्टं पूर्वमज्ञानाविष्टमात्मानमह-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽथ सोमेऽग्नौ विद्युति विभात्यथ खल्वेनं दृष्ट्वाऽमृतत्वं गच्छतीत्येवं ह्याह।

ध्यानमन्तः परे तत्त्वे लक्ष्येषु च निधीयते।
अतोऽविशेषविज्ञानं विशेषमुपगच्छति॥

ङ्कारास्पदं भित्त्वा द्रष्टृरूपं दृश्यसापेक्षं विदार्य ब्रह्मापश्यदिति सम्बन्धः। तस्य ब्रह्मण आत्माभेदलक्ष्यापनाय पुंलिङ्गैर्विशेषणैस्तद्विशिनष्टि, अलातेत्यादिना। अखण्डाकारस्फुरणेऽलातचक्रदृष्टान्तः। आदित्यवर्णमिति सर्वदृश्याभिभावकप्रकाशात्मत्वमादित्यरूपसादृश्यमुच्यते। ऊर्जस्वन्तमूर्जो रसस्तद्वन्तं, आनन्दरसमिति यावत्, तथा च श्रुतिः 'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति' (तैत्तिरीयो०) इति। तमसः पर्यमिति परत्रेतं पर्यं पारं तमसः परस्तादतमस्करमित्यर्थः। एवं भूतमात्मानं ब्रह्मापश्यत् पश्यतीत्यर्थः। 'यदादित्यगतं तेजो जगद्भासयतेऽखिलं। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं' (गी०) इति स्मृतेर्मूलभूतेन वाक्येन प्रकाशमात्रमस्य स्वाभाविकं स्वरूपं सर्वत्रोपलक्षणीयमित्यभिप्रेत्याह, यदमुष्मिन्निति। अथैवं ब्रह्मात्मदर्शनसमये खल्वेनमात्मानं दृष्ट्वा ब्रह्माभेदेन साक्षात्कृत्याऽमृतत्वं गच्छति मुक्तो भवतीत्येवं ह्याह इति पूर्ववत्। अन्तःप्रतीचि सर्वान्तरे परे तत्त्वे परे ब्रह्मणि ध्यानं धीयते लक्ष्येषु च प्रथमं शरीरप्रणवमनस्तल्लयस्थानेषु च ध्यानं धीयते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानसे च विलीने तु यत् सुखं चात्मसाक्षिकं।
तद्ब्रह्म चामृतं शुक्रं सा गतिर्लोक एव सः ॥ २४ ॥

अथान्यत्राप्युक्तं निद्रेवान्तर्हितेन्द्रियः शुद्धितमया धिया स्वप्न इव यः पश्यतीन्द्रियबिलेऽविवशः प्रणवाख्यं

क्रियते कुर्यादित्यर्थः। अतो ध्यानाद् विशेषविज्ञानमस्फुटोऽनुभवो विशेषं स्फुटत्वमुपगच्छति। स्फुटतरसाचात्कारोदये सति यदात्मनावस्थानं सा मुक्तिरित्येतदाह, मानस इति। मानसे मनःपरिणामरूपेऽहङ्कारग्रन्थौ विलीने प्रलयङ्गते, चकारात् तद्वासनायां च विलीनायां, तु शब्दः सुषुप्तेर्विशेषणार्थः। यत् सुखं, चकाराद्धेतुमत्त्वशङ्का व्यावर्त्यते, नित्यं यत् सुखमात्मसाचिकं स्वयमेव स्फुरत्, न वेद्यमिति यावत्, तदेव ब्रह्म चकारादात्मा च, कीदृशममृतमविनश्वरं, शुक्रं दीप्तिमत् ज्ञानस्वभावं, यदेवंविधं ब्रह्मात्मतत्त्वं सा गतिः पुरुषार्थः, स एव लोकः फलं सर्वसाधनानामित्यर्थः ॥ २४ ॥

इदानीमुक्तां विद्यामनूद्य तदन्तं प्रशंसन् विद्यामेव महीकरोति "अथान्यत्राप्युक्तं ० इत्यभिधीयते" इति। निद्रेव निद्रित इव सुषुप्त इव चान्तर्हितेन्द्रियः प्रविलीनेन्द्रियवृत्तिर्न निद्रावानित्यर्थः। तथा स्वप्न इव स्वप्नदृगिव इन्द्रियबिले इन्द्रियाणां निवासस्थाने देहे अविवशः स्थूलदेहाभिमानशून्य इति यावत् न लयं स्वप्नदृगेवेत्यर्थः। अनेनैव देहाभिमान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रणेतारं भारूपं विगतनिद्रं विजरं विमृत्युं विशोकञ्च सोऽपि प्रणवाख्यः प्रणेता भारूपो विगतनिद्रो विजरो विमृत्युर्विशोको भवतीत्येवं ह्याह।

राहित्येन जाग्रदप्ययं नेत्युक्तप्रायं द्रष्टव्यं, तथा चैवमवस्थात्रयातीतो लयविक्षेपरहितया शुद्धितमयाऽतिशयेन शुद्धिमत्या धिया प्रसन्नबुद्ध्या यः प्रणवाख्यं प्रणवैकात्मतामापन्नं प्रणेतारं पश्यति सोऽपि तदात्मा भवतीति योजना, 'तं यथोपासते तदेव भवति' इति श्रुतेः। प्रणेताऽन्तर्यामीश्वरः तं यथा प्रणेतारमन्तर्यामित्वेनोपलक्षितमित्यर्थः। भारूपं ज्ञानप्रकाशस्वरूपमित्यनेन स्वरूपलक्षणमुक्तं, विगतनिद्रमित्यविद्यातत्कार्यरूपावरणविक्षेपाज्ञानरहितनया कूटस्थत्वमुच्यते। विजरं विमृत्युमिति स्थूलसङ्घातधर्मवत्त्वनिरासेन ततो विविक्तत्वमुच्यते। विशोकमिति अन्तःकरणधर्मराहित्यं, चकारात् प्राणधर्मक्षुत्पिपासाराहित्यं गृह्यते, एतेन सूक्ष्मसङ्घातादपि विविक्ततोक्ता। तथा च कार्यकारणप्रपञ्चातीतं यथोक्तविशेषणं लयविक्षेपरहिततयाऽवस्थात्रयातीतया बुद्ध्या योऽनुभवति सोऽपि प्रणवाख्य इत्याद्युक्तात्मको भवतीत्येवं ह्याह। किं, एवं यथोक्तप्रकारेण प्राणप्रणेतारमात्मानं, अथ तथा ओङ्कारमोङ्कारात्मनैकीकृतं तत्त्वं प्रति यस्मादनेकधाऽनेकप्रकारं स्थूलसूक्ष्मकारणात्मकं सर्वं जगद्युनक्ति योजयति प्रविलापयति कश्चित्, युञ्जते वाऽपि स्वयमेव वा विलीयमानं युञ्जते योजयन्ति वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं प्राणमथोङ्कारं यस्मात् सर्वमनेकधा ।
युनक्ति युञ्जते वापि तस्माद्योग इति स्मृतः ॥
एकत्वं प्राणमनसोरिन्द्रियाणां तथैव च ।
सर्वभावपरित्यागो योग इत्यभिधीयते ॥ २५ ॥

अथान्यत्राप्युक्तं यथा वाप्सु चारिणः शाकुनिकः सूत्रयन्त्रेणोद्धृत्योदरेऽग्नौ जुहोत्येवं वाव खल्विमान्

केचित्, तस्मादियं निष्ठा योग इति स्मृतः कथितो योगज्ञैरित्यर्थः । सिद्धनिष्ठां फलरूपं योगमुपलक्ष्य तत्साधकनिष्ठां साधनरूपं योगं लक्षयत्येकत्वमिति, प्राणादीनामेकत्वं, एकविषयप्रवणतया प्रत्यक्प्रवाहकरणं । सर्वभावपरित्यागः सर्वेषु क्रियाकारकफलेषु भावपरित्यागः सत्त्वबुद्धित्यागः, अथवा सर्वविषयको यो भावो भावनासंस्कारस्तस्य परित्यागः, अविषयात्मतत्त्वज्ञानाभ्यासेन वाह्यविषयवासनाभिभव इत्यर्थः ॥ ॥ २५ ॥

पुनः प्रकारान्तरेण प्रणवनिष्ठायां भावनाविशेषं योगान्तरमाह "अथान्यत्राप्युक्तं ० यथाक्रमेण" इति । यथा वा लोके कश्चिच्छाकुनिकः शकुनोपजीवी किरातकैवर्तादिरप्सु चारिणो मत्स्यादीन् सूत्रयन्त्रेण जालसूत्रेणोद्धृत्योदरे उदरस्थेऽग्नौ जुहोति जाठराग्निसात्करोति एवं वाव एवमेव खलु इमान् प्राणान् जलचरस्थानीयान् देहान्तर्विच-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राणानोमित्यनेनोद्धृत्यानामयेऽग्नौ जुहोत्यतस्तप्तोर्वीव सोऽथ यथा तप्तोर्वि सर्पिस्तृणकाष्ठसंस्पर्शेनोज्ज्वलतीत्येवं वाव खल्वसावप्राणाख्यः प्राणसंस्पर्शेनोज्ज्वलत्यथ यदुज्ज्वलत्येतद्ब्रह्मणो रूपञ्चैतद्विष्णोः परमं पदञ्चैत-

---

रतः सर्वानेव मुख्यामुख्यरूपानोमित्यनेनाक्षरेण जालसूत्रस्थानीयेन सर्वार्थसङ्ग्रहसमर्थेनोद्धृत्य पृथक्कृत्यानामये निर्दोषे ब्रह्मात्माग्नौ जुहोति तदात्मसात्करोति इत्यर्थः। उद्धृत्य होमे दृष्टान्तमुक्त्वा कृतस्याऽग्निग्रस्ततयाग्निमयत्वे दृष्टान्तमाह, अतस्तप्तोर्वीव स इति। अतो होमानन्तरं स आत्मरूपोऽनामयोऽग्निस्तप्तोर्वीव उर्वीशब्देनोर्वीजं भाण्डमुच्यते यथा घर्मे महावीराख्यं भाण्डं तप्तं तादृशः स इत्यर्थः। दृष्टान्तं विवृणोति, अथ यथेति। तप्ता उर्वी आधारो यस्य तत् तप्तोर्वि तच्च तत् सर्पिश्चेति विग्रहः। तद्यथा तृणादिसंस्पर्शेनोज्ज्वलत्यूर्द्धज्वालं जायते एवमित्यादिदार्ष्टान्तिकोक्तिः, एवं वावैवमेव खल्वसावप्राणाख्यः प्राणादिसङ्घातादिविक्ततया प्राणाख्यामलभमान आत्माग्निः प्राणसंस्पर्शेनोज्ज्वलति प्रकटीभवतीत्यर्थः। एतदुक्तं भवति यथा सन्तप्ते भाण्डे विद्यमानोऽप्यग्निर्न स्वरूपेण संदृश्यते घृतेनोद्दीपितः संस्तदुक्ततृणादिसम्बन्धे यथावद्दृश्यते एवमसावात्मा देहसंस्थो न यथावदवभासते प्राणादिप्रपञ्चप्रविलापने सति विलीयमानप्रपञ्चानुगतचिदाभास-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्रुद्रस्य रुद्रत्वमेतत्तदपरिमितधा चात्मानं विभज्य पूरयतीमान् लोकानित्येवं ह्याह ।

वह्नेश्च यद्वत् खलु विष्फुलिङ्गाः
सूर्यान्मयूखाश्च तथैव तस्य ।
प्राणादयो वै पुनरेव तस्मा-
दभ्युच्चरन्तीह यथाक्रमेण ॥ २६ ॥

द्वारा यथावदवभासत इति । अथवा पूर्वोक्तस्यात्मनो यदग्निरूपकत्वमुक्तं तद्दृष्टान्तेन प्रपञ्चयति, तप्तोर्वीव स इत्यादिना । तप्तोर्विशब्देन तत्स्थं घृतं लक्ष्यते, तद्यथा स्वोर्व्यां सह तप्यमानं स्वसंसर्गि सर्वं तृणादिकं सन्तपदभिज्वलति एवमयमप्राणाख्य आत्मा चिदाभासव्याप्तं देहद्वयं सन्तपंस्तत्संसृष्टं सर्वमेव जगदभिज्वलयति प्रकाशयतीत्यग्नित्वेन रूपकमुक्तमिति । अस्यैव सर्वोत्पत्तिस्थितिलयकारणत्वेन सर्वात्मत्वमाविष्करोति, अथ यदुज्ज्वलतीति । एतद्ब्रह्मणो हिरण्यगर्भस्य स्रष्टुः रूपं स्वरूपं, विष्णोः पालकस्य परमं पदं स्वरूपं, एतदेव च रुद्रस्य संहर्तुः रुद्रत्वं स्वरूप, एतदेव तदात्मरूपं ब्रह्माऽपरिमितधा आत्मानं विभज्य देवतिर्यङ्मनुष्यादिभेदेनाविद्ययात्मानमनेकधा विभज्येमान् लोकान् पूरयतीत्येवं ह्याह, वह्नेश्च यद्वदिति । पूर्वार्द्धं स्पष्टार्थं । प्राणादयो वै प्रसिद्धाः पुनरेवेति सुषुप्तिप्रलययोः प्रलीनाः पुनः पुनस्तस्मादभ्युच्चरन्तीह प्रबोधसृष्ट्योर्यथाक्रमेण पूर्वसृष्टिक्रमेणेत्यर्थः । तथा च श्रुत्यन्तरे 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथान्यत्राप्युक्तं ब्रह्मणो वावैतत्तेजः परस्यामृतस्याशरीरस्य *यच्छरीरस्यौष्ण्यमस्यैतत् घृतमथाविः-

---

व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति' (वृहदा० अ० ४) इति ॥ २६ ॥

इदानीं प्रकारान्तरेण हृद्यन्तर्ज्योतिषमात्मानमुपलम्भयन् सफलामात्मनिष्ठामुपदिशति "अथान्यत्राप्युक्तं ० तेजस्त्वेवाग्निसूर्ययोः" इति । ब्रह्मणो वाव परमात्मन एवैतद्वक्ष्यमाणं तेजः, किंलक्षणस्य परस्य सर्वदृश्यस्वभावातीतस्यात एवामृतस्य जन्मादिमरणान्तविक्रियारहितस्येति यावत् । स्वतः परममृतमपि ब्रह्मतेजः शरीरसम्बन्धात् विपरीतं स्यादित्यतो विशिनष्टि, अशरीरस्येति । शरीरसम्बन्धरहितस्य, न हि निरवयवस्यासङ्गस्य जतुकाष्ठवत् शरीरसंश्लेषोऽस्तीति भावः । एवंविधस्य ब्रह्मणो वावैतत्तेज इति सम्बन्धः । किं तदित्याह । यच्छरीरस्यौष्ण्यं शरीरसम्बन्ध्याग्नेयं यदौष्ण्यमुपलभ्यते स्पर्शनेन प्रत्यक्षेण तद्ब्रह्मणस्तेज इत्यर्थः । तथा च छान्दोग्ये 'यदतः परो दिवो ज्योतिर्दीप्यते' इत्युपक्रम्य 'इदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिस्तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजानाति' इति । अस्य तेजस एतत् प्रसिद्धं शरीरं घृतं, अनेन हि तद्ब्रह्मतेजोऽन्यत्राप्रकाशमानमग्निरिव घृतेन दीप्यते । एवं

---

* यन्नशरीरस्येति लिखितं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्नभसि निहितं वैतदेकाग्रेणैवमन्तर्हृदयाकाशं वि-
नुदन्ति यत्तस्य ज्योतिरिव सम्पद्यतीत्यतस्तद्भावम-
चिरेणैति भूमावयस्पिण्डं निहितं यथाऽचिरेणैति

सामान्येन देहगतौष्ण्यात्मना ब्रह्मतेजः सम्भावनापदं नीत-मिदानीं तस्य साक्षात्कारपदवीमुपदिशति, अथाविः सन्निति। अथैवं सम्भावितं तत्तेजः आविः प्रकटं सन्नभसि हृदयाकाशे निहितं स्थितं वै निश्चितं सर्वश्रुतिष्वेतदित्यर्थः। तथा च मुण्डके 'आविः सन्निहितं गुहाचरं नाम महत्पदं' इति। तत्तेज एवमुक्तप्रकारमुद्दिश्यान्तर्हृदये हृदयपुण्डरीके यदाकाशं तदेकाग्रेण चित्तसमाधानेन विनुदन्ति विशेषेण नुदन्ति हृदय-पुण्डरीकविकासनेन तत्स्थमाकाशमाविष्कुर्वन्तीत्यर्थः। एवं क्रियमाणे तस्याकाशस्य सम्बन्धि यज्ज्योतिरिव प्रकाश इव नित्यसिद्धमप्यावरणतिरोधानमात्रापेक्षयोद्भूतप्रकाश इव सम्पद्यति सम्पद्यते अभिव्यक्तं जायत इत्यर्थः। इति यतः स्वतः सिद्धं तेजोऽभिव्यज्यतेऽतस्तद्भावं तस्य तेजसो भावं स्वभाव-मचिरेणाल्पकालेन सद्य एव एति प्राप्नोत्युपासकः। तस्य प्रत्यग्रूपत्वेन नित्यप्राप्तत्वात्, तदावरणतिरोधानमात्रमपेक्ष्य प्राप्तिरुपचर्यत इति भावः। तत्रोपाध्याकारप्रतिबन्धनिवृत्त्या-ऽचिरेण स्वस्वरूपापत्तौ दृष्टान्तमाह, भूमाविति। भूमौ निहितमन्तर्भूमौ निक्षिप्तमयस्पिण्डं पिण्डीभूतमयो यथा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूमित्वं मृद्वत्संस्थमयस्पिण्डं यथाग्न्ययस्कारादयो नाभिभवन्ति प्रणश्यति चित्तं तथाश्रयेण सहैवमित्येवं ह्याह ।

ऽचिरेण भूमित्वं मृद्भावमुपैति गच्छति मृदेव भवतीत्यर्थः, तथा सम्यक् स्वरूपापन्नस्य पुनरनुत्थानमेवेति, अत्रापि दृष्टान्तमाह, मृद्वत्संस्थमिति । मृद्वत् साक्षात् मृत्तिकेव संस्था स्थितिर्यस्य तन्मृद्वत्संस्थं, अत्र वतिप्रयोग उक्तिभङ्गीमात्रो मृदात्मना स्थितमित्यर्थः। यथा मृदात्मतां गतमयस्पिण्डमग्न्ययस्कारादयो नाभिभवन्ति अग्निना प्रागयस्पिण्ड इव तस्मिन्नभिव्यक्तप्रकाशेन न दह्यते न वाऽयस्कारैर्लोहकारैर्विकारीक्रियत इत्यर्थः। दार्ष्टान्तिकमाह, प्रणश्यति इति। यथेमौ दृष्टान्तौ तथा चित्तं चित्तस्यश्चिदाभासो जीवाख्य आश्रयेणोपाधिना चित्तेन सह प्रणश्यति निराभासज्योतीरूपमापद्यते इत्यर्थः। यद्वा चित्तं साभासमन्तःकरणं आश्रयेण वासनात्मकलिङ्गेन सह प्रणश्यति प्रकर्षेण नश्यति उच्छिन्नसंस्कारं भवति पुनर्नोत्पत्त्यर्हं भवतीत्यर्थः। एवमेवैतन्नान्यथेत्येवमर्थमाह श्लोक इत्यर्थः। ह्याकाशमयं आकाशवदसङ्गं यद्वा हृदये यदाकाशं तत्स्वरूपं ह्याकाशमयं, कोशो भाण्डाकारस्तद्वत् सर्ववस्त्वाश्रयत्वात् कोशमिव कोशं, लिङ्गव्यत्ययः छान्दसः। तथा च हार्दाकाशं प्रकृत्य श्रुत्यन्तरं 'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हृद्याकाशमयं कोशमानन्दं परमालयं ।
स्वं योगश्च ततोऽस्माकं तेजश्चैवाग्निसूर्ययोः ॥ २७ ॥
अथान्यत्राप्युक्तं भूतेन्द्रियार्थानतिक्रम्य ततः प्रव्रज्याज्यं धृतिदण्डं धनुर्गृहीत्वाऽनभिमानमयेन चैवे-

---

वुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितं' (छां० अ० ८) इति। आनन्दयतीत्यानन्दं 'एष ह्येवानन्दयाति' इति श्रुतेः। परमालयं आसमन्ताल्लीयतेऽस्मिन् सर्वमित्यालयं परमं च तदालयं च परमालयं मुक्तिरूपमित्यर्थः। एवम्भूतं यद्ब्रह्मरूपं तेजस्तदस्माकं स्वं स्वरूपं योगश्च, युज्यत इति योगः, फलं पुरुषार्थः सोऽप्येतदेवेति योजना। यत एवमतोऽस्य सर्वात्मकत्वादग्निसूर्ययोश्च तेज एतदेवेत्यर्थः। तथा च भगवद्वचनं।

अविभक्तञ्च भूतेषु विभक्तमिव च स्थितं।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तत् ज्योतिस्तमसः परमुच्यते। इति ॥ २७ ॥

इदानीमुक्तस्य ब्रह्मतेजस उपलम्भे योगविशेषमुपदिशति "अथान्यत्राप्युक्तं ० न कदाचन" इति। भूतपदेन तत्सङ्घातो देहो गृह्यते, इन्द्रियाणि प्रसिद्धानि, अर्थाः शब्दादयो विषयाः। देहेन्द्रियविषयानतिक्रम्य तेष्वहंममाभिमानं त्यक्त्वा ततोऽनन्तरं प्रव्रज्या सन्यास एव ज्या यस्य तत्प्रव्रज्याज्यं, धृतिर्धैर्यं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षुणा तं ब्रह्मद्वारपारं निहत्याद्यं सम्मोहमौली तृष्णेर्ष्याकुण्डली तन्द्रीराघवेत्र्यभिमानाध्यक्षः क्रोधज्यं प्रलोभदण्डं धनुर्गृहीत्वेच्छामयेन चैवेषुणेमानि खलु

दण्डः काण्डं यस्य तद्धृतिदण्डं, एवंविधं धनुर्गृहीत्वा धैर्यमास्थाय तस्मिन्नसङ्गतालक्षणां ज्यामारोप्येत्यर्थः । तस्मिन् धनुषि संहितेनानभिमानमयेन चकाराद्विवेकश्रितेन चेषुणैव विद्याचारकुलादिनिमित्ताभिमानपरित्यागात्मकेन दृग्दृश्यविवेकोपकृतेन च यथोक्तानभिमानमयेन यथोक्तविवेकतीक्ष्णेनेषुणेति यावत् । तमाद्यमिति सम्बन्धः । तं प्रसिद्धमाद्यं सर्वानर्थकारणमहङ्काराख्यं ब्रह्मद्वारपारं हार्दस्य ब्रह्मणः प्राप्तिद्वारस्य पारं पालं, रलयोरभेदात्, द्वारनिरोधकरमित्यर्थः । एवम्भूतं निहत्य हत्वा ब्रह्मशालां विशेदित्युत्तरत्र सम्बन्धः । सङ्क्षेपेणोक्तं विवृण्वती श्रुतिरहङ्कारस्य हन्तव्यत्वे हेतुं सूचयति, सम्मोहेत्यादिना । सम्मोहो मिथ्याज्ञानं मौलिरुष्णीषमस्यास्तीति सम्मोहमौली । तृष्णा विषयचापल्यं, ईर्ष्या परोत्कर्षासहनञ्च कुण्डले यस्य विद्येते स तृष्णेर्ष्याकुण्डली । तन्द्री सत्कर्मस्वालस्यं, दरा निद्रा, अघं पापं चेत्येतानि वेत्रं यष्टिविशेषो यस्य स तन्द्रीराघवेत्री । अभिमानः स्वोत्कर्षाभिनिवेशस्तस्याध्यक्षोऽधिष्ठाय प्रवर्तयिता प्रागुक्तोऽहङ्कारः साभासः सः । क्रोधज्याकं प्रलोभदण्डं धनुर्गृहीत्वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूतानि हन्ति तं हत्वोङ्कारप्लवेनान्तर्हृदयाकाशस्य पारं तीर्त्वाविर्भूतेऽन्तराकाशे शनकैरवटैवावटकृद्धातुकामः संविशत्येवं ब्रह्मशालां विशेत् ततश्चतुर्जालं ब्रह्मकोशं प्रणुदेद्गुर्वागमेनेत्यतः शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः

दृच्छामयेन स्वच्छन्दापरपर्यायवाच्यरूपेण चकाराद्विवेकनिशितेन चैवैषुणेमानि प्रसिद्धानि खलु भूतानि स्थावरजङ्गमात्मकानि हन्ति पीडयति, तमेनं सर्वपीडाकरत्वाद्धन्तव्यं हत्वा उन्मूल्योङ्कारप्लवेन तरणसाधनेनान्तर्हृदयाकाशस्य सर्वजगदाश्रयतयाऽव्याकृताख्यस्य पारं परतीरं तदधिष्ठानं सर्वसाक्षिभूतं तीर्त्वा प्राप्य, आविर्भूतेऽन्तराकाशे ब्रह्माकारेऽभिव्यक्ते सति शनकैः शनैरसंभ्रमेण ब्रह्मशालां विशेदिति सम्बन्धः। शनैस्तदनुप्रवेशे दृष्टान्तमाह, अवटैवेति। सन्धिवृद्धी छान्दसे। अवट इवेत्येतत्। यथा कश्चिद्धातुकामः सुवर्णादिधातूनन्तर्भूमौ निहितान् कामयमानोऽवटकृद्गर्तकर्ताऽवटे तस्मिंश्छनैः संविशति प्रकटीभूतं धातुं पश्यन्नेवं प्रादुर्भूतब्रह्मशालां ब्रह्मप्रकाशस्थानं साक्षित्वेनावशेषितं प्रत्यगेकरसमात्मानं विशेत्, ततस्तत्प्रवेशानन्तरं चत्वारि जालान्युपर्युपरि वेष्टनानि यस्मिंस्तच्चतुर्जालं ब्रह्मकोशं ब्रह्मणः कोशवदाच्छादकमन्नमयप्राणमयमनोमयविज्ञानमयाख्यैश्चतुर्भिः कोशैः परिवेष्टितमानन्दमयकोशं प्रणुदेत् प्रेरयेद्भिन्द्यादिति यावत्। केन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वतन्त्रः स्वे महिम्नि तिष्ठत्यतः स्वे महिम्नि तिष्ठमानं दृष्ट्वाऽऽवृत्तचक्रमिव सञ्चारचक्रमालोकयतीत्येवं ह्याह।

षड्भिर्मासैस्तु युक्तस्य नित्यमुक्तस्य देहिनः।
अनन्तः परमो गुह्यः सम्यग्योगः प्रवर्तते॥
रजस्तमोभ्यां विद्धस्य सुसमिद्धस्य देहिनः॥
पुत्रदारकुटुम्बेषु सक्तस्य न कदाचन॥ २८॥

साधनेन गुर्वागमेन गुरूपदिष्टेनागमेन वेदान्तवाक्येनानन्दमयकोशाश्रयं ब्रह्मैव प्रत्यगात्मेत्यागमाचार्याभ्यां निश्चित्य कोशेष्वात्माभिमानं त्यजेदित्येष क्रम इत्यर्थः। अतोऽनन्तरमतः कारणात् सर्वप्रतिबन्धनिवृत्तेरिति वा, शुद्धः पूत इत्यादिविशेषणः स्वे महिम्नि तिष्ठति, अतोऽनन्तरं स्वे महिम्नि स्वस्वरूपे तिष्ठमानमवतिष्ठमानमात्मानं दृष्ट्वा आवृत्तचक्रमिव परावृत्तचक्रमिव संसारचक्रमालोकयति यथा रथादुत्तीर्णो रथचक्रं परावृत्तव्यापारं दूरत एवावेक्षते कश्चित् तथा विद्वान् ब्रह्मसम्पन्नः संसारचक्रं दूरादेवावलोकयति न पूर्ववत् स्वसम्बन्धितयेत्यर्थः। इत्येवं ह्याह, श्लोकाभ्यामुक्तमर्थजातमित्यर्थः। नित्यमुक्तस्य शितेन्द्रियस्य अभिमानशून्यस्य षड्भिर्मासैस्तु युक्तस्य योगनिरतस्य प्रागुक्तवर्त्मना प्रणवाभ्यासं कुर्वतो देहिनोऽनन्तः परमो गुह्यः सम्यग्योगः परमात्मसम्पत्तिलक्षणः प्रवर्तते सिद्ध इत्यर्थः। सुसमिद्धस्य विद्याविनयाचारैः सुदीप्तस्याऽपि देहिनो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमुक्त्वाऽन्तर्हृदयः शाकायन्यस्तस्मै नमस्कृत्वाऽनया ब्रह्मविद्यया राजन् ब्रह्मणः पन्थानमारूढाः पुत्राः प्रजापतेरिति सन्तोषं द्वन्द्वतितिक्षां शान्तत्वं योगाभ्यासादवाप्नोतीत्येतद्गुह्यतमं नापुत्राय नाशि-

---

रजस्तमोभ्यां गुणाभ्यां विद्धस्य परवशस्य तावत्सुतः पुत्रादिष्वेत एव सक्तस्य न कदाचन सम्यग्योगः प्रवर्तत इत्यर्थः ॥ ॥ २८ ॥

इदानीं वालखिल्याख्यायिकामुपसंहरन्नुक्तयोः सगुणनिर्गुणविद्ययोः सम्प्रदानविशेषमुपदिशति शाकायन्य इत्यादि । "एवमुक्त्वान्तर्हृदयः ० सम्यन्नाय दद्यात्" इति । एवममुना प्रकारेण ब्रह्मविद्यामनेकप्रकारां बृहद्रथायोक्त्वान्तरेव प्रत्यक्त्वे हृदयं बुद्धिर्यस्य सोऽन्तर्हृदयः शाकायन्यः ऋषिस्तस्मै ब्रह्मणे स्वगुरवे वा नमस्कृत्वाऽनया मया तुभ्यमुक्तया ब्रह्मविद्यया परापरब्रह्मविषयया हे राजन् ब्रह्मणो यथोक्तस्य पन्थानं ब्रह्मप्राप्तिमार्गमारूढाः प्रजापतेः क्रत्वाख्यस्य पुत्रा वालखिल्यसञ्ज्ञिता मुनय इत्युवाचेति योज्यं । योगाभ्यासात् सन्तोषाद्यवाप्नोतीत्येवं चोवाचेत्यध्याहारः । एतदुक्तं ब्रह्मज्ञानं गुह्यतममतिगोप्यं रहस्यतममपुत्राय न कीर्तयेन्नोपदिशेत्, तथा अशिष्याय शिष्यवृत्तिरहिताय न कीर्तयेत् । शिष्यत्वे पुत्रत्वे च यद्यशान्तः साभिमानस्तस्मै अशान्ताय न कीर्तयेत्, तस्माच्छान्ताय शिष्याय पुत्राय वा कीर्तयेन्नान्यस्मै कस्मैचनेत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्याय नाशान्ताय कीर्तयेदित्यनन्यभक्ताय सर्वगुणसम्पन्नाय दद्यात् ॥ २९ ॥

ओम् शुचौ देशे शुचिः सत्त्वस्थः सदधीयान सद्वादी सद्ध्यायी सद्याजी स्यादित्यतः सद्ब्रह्मणि सत्यभिला-

---

तथा चोक्तं श्रुत्यन्तरे 'वेदान्ते परमं गुह्यं पुराकल्पप्रचोदितं। नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः' (श्वे०) इति। फलितमाह। अनन्यभक्तायाचार्यैकभजनपराय सर्वगुणसम्पन्नाय दद्यादिदं ज्ञानमित्यर्थः। शिष्यगुणाश्च श्रुतिस्मृतिपुराणसिद्धाः संगृह्य भगवत्पादैराचार्यैरुक्ताः 'प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे। गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सततं मुमुक्षवे' इति ॥ २९ ॥

इदानीमध्यायशेषेण प्रकीर्णानि कानिचित् साधनानि साधारणानि क्वचिदसाधारणानि चोपदेष्टुं प्रवर्तते श्रुतिः "ओम् शुचौ देशे शुचिः० परमां गतिं" इति। शुचौ देशे गिरिनदीपुलिनगुहादिशुद्धस्थाने उपविश्येति योज्यं, शुचिः बाह्याभ्यन्तरशुद्धिसम्पन्नः, सत्त्वस्थः सत्त्वगुणस्थः प्रसन्नचित्त इति यावत्। सदधीयानः सदध्यात्मशास्त्राद्यभ्यसन्, सद्वादी सद्ब्रह्मतद्वदनशीलः। सद्ध्यायी ब्रह्मध्यानपरायणः, सद्याजी ब्रह्मयजनशीलः, यजनं तस्येश्वररूपस्य मानसैरुपचारैरभ्यर्चनं। एवं कुर्वन् स्यात् भवेत् मुमुक्षुरिति शेषः। इति यतोऽतः सद्ब्रह्मणि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षिणि निर्वृत्तोऽन्यस्तत्फलच्छिन्नपाशोनिराशः परेष्वा-
त्मवद्विगतभयो निष्कामोऽक्षय्यमपरिमितं सुखमाक्रम्य
तिष्ठति परमं वै शेवधेरिव परस्योद्धरणं यत् निष्कामत्वं
स हि सर्वकाममयः पुरुषोऽध्यवसायसङ्कल्पाभिमान-

निर्वृत्तोऽपरिमितं सुखमाक्रम्य तिष्ठतीति सम्बन्धः। सदेव सोम्येदमिति ब्रह्मणि सच्छब्दश्रवणात् सदाख्यं ब्रह्म, तस्मिन् सदाख्ये ब्रह्मणि किंलक्षणे, सति अभिलाषिणि सति सद्धर्मनिरते पुंस्यभिलाषवति सदनुग्रहेच्छावतीति यावत्, निर्वृत्तो निष्पन्नो ब्रह्मणि सम्पन्नो ब्रह्मात्मभावमुपगतोऽत एवान्यः सङ्घाताभिमानिनो जीवरूपादन्योऽपरिच्छिन्नः, तत्फलच्छिन्नपाशस्तस्य ब्रह्मणो यत्फलं स्फूर्तिः प्रतिभासस्तेन छिन्नसंसारवासनापाशोऽत एव निराशः प्राप्तव्यविषयाशाशून्यः सर्वात्मब्रह्मरूपत्वात् परेषु जीवान्तरेष्वात्मवदात्मनीव विगतभयो निरातङ्कः न चास्य द्वितीयदर्शननिमित्तं भयं भवतीत्यर्थः, आत्मा ह्येषां स भवतीति श्रुत्यन्तरात्। यतो निष्कामः, कामवतो हि तदुपघातनिमित्तं भयं भवति, कामश्च देहाद्यभिमानपुरःसरः, तद्रहितोऽयं निष्कामत्वात् निर्भय इत्यर्थः। अतोऽक्षय्यं क्षेतुमशक्यमविनाशीति यावत्, अपरिमितमपरिच्छिन्नं वैषयिकसुखादिलक्षणमित्येतत्, एवंविधं सुखमाक्रम्यात्मसात्कृत्वा तिष्ठति परमानन्दमश्नुत इत्यर्थः। निष्कामत्वमुक्तं स्तौति तस्य सर्वसाधनेभ्यः श्रैष्ठ्यं द्योत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लिङ्गो बद्धोऽतस्तद्विपरीतो मुक्तोऽत्रैक आहुर्गुणः प्रकृतिभेदवशादध्यवसायात्मबन्धमुपागतोऽध्यवसायस्य दोषक्षयाद्धि मोक्षो मनसा ह्येव पश्यति मनसा शृणोति कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृति-

---

यितुं परमं वा इति। यत् निष्कामत्वं तत् शेवधेर्निधेरिव परस्य परमात्मनः परमं सर्वोत्तमसुद्धरणं प्रकटीकरणं वै प्रसिद्धं विद्वज्जनेष्वित्यर्थः। एतच्च दुर्घटमिति द्योतयन् पुंसः स्वभावं सङ्कीर्तयति, स हीत्यादिना। हि यस्मात् स पुरुषः स्वभावतः सर्वकाममयः सर्वविषयकामाकुलः यतोऽध्यवसाय-सङ्कल्पादिलिङ्गस्तद्वत्तया काममयत्वमवगम्यत इत्यर्थः। अत एवायं बद्धो यतः काममयो बद्धोऽतस्तद्विपरीतोऽकाममयो मुक्त एवेत्यकामात्मता सम्पाद्या मुमुक्षुणेति भावः। इदानीमत्र मतान्तरं साङ्ख्यदृष्टिविषयमुत्थापयति स्वमतपरिशुद्धये, अत्रैक आहुरिति। गुणो गुणकार्यं महदाख्यं बुद्धितत्त्वं प्रकृतिभेदवशात् पूर्ववासनात्मकस्वभावविशेषवशादध्यवसायात्मबन्धं विषयाध्यवसायादिरूपं बन्धनमुपागतः, न चिदात्मेत्यर्थः। अध्यवसायस्य यो दोषो बहिर्विषयप्रवणता तस्य क्षयान्नाशाद्विषयवासना-विच्छेदाद्धि मोक्षः पूर्वोक्तस्य गुणस्यैवेत्यर्थः। अत्रेतिशब्दोऽध्याहार्यो मोक्ष इति इत्येक आहुरिति सम्बन्धः। उत्थापितं मतं व्युत्थापयति, मनसा हीति। अन्तःकरणाभिमतस्य बुद्धि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ह्रीर्धीर्भीरित्येतत्सर्वं मन एव गुणौघैरुह्यमानः कलुषीकृतश्चास्थिरश्चलो लुप्यमानः सस्पृहो व्यग्रश्चाभिमानित्वं प्रयाता इत्यहं सो ममेदमित्येवं मन्यमानो निबध्नात्यात्मनात्मानं जालेनेव खचरोऽतः पुरुषोऽध्यव-

---

तत्त्वस्य करणविभक्त्या परामर्शात् सर्वश्रुतिषु न तस्य कर्तृत्वमवगन्तुं शक्यं, यतो मनसैव हि पश्यति लोकश्चक्षुषा यद्रूपं पश्यति तन्मनसैव पश्यति, मनोव्यासङ्गे सति चक्षुः सम्बद्धस्याप्यप्रतिभासात्, 'अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति' (बृहदा०) इत्यन्वयव्यतिरेकाभ्यां श्रुत्यन्तरे मनोबुद्ध्यहङ्कारशब्दवाच्यस्यान्तरात्मनः करणत्वावधारणात् न तस्य कर्तृत्वमिति तात्पर्यार्थः। विचिकित्सा संशयः, प्रसिद्धार्थमन्यत्, एतत् सर्वं मन एव मनोविकारत्वात्, सुवर्णं कुण्डलमितिवन्मनोऽभेदेन तद्धर्मत्वं कामादीनामवधार्यते, कर्तृधर्मत्वभ्रान्तिव्यावृत्तय इत्यर्थः। ननु यद्येते कामादयो न कर्तृधर्माः कथं तर्हि कर्त्राश्रयतयाऽहं कामीत्यादिरूपेण प्रतिभास इति चेन्नायं दोषोऽन्तःकरणोपाधिनिबन्धनत्वात्, कर्तृत्वस्य चात्मना तादात्म्याध्यासाधीनत्वादेव प्रतिभासोपपत्तिः स्फटिकमणेरिवौपाधिको लौहित्यप्रतिभास इत्यभिप्रेत्याह, गुणौघैरुह्यमान इति। गुणानां सत्त्वादीनां मायागुणानामोघाः प्रवाहा देहद्वयतद्धर्मरूपाः, तैरुह्यमानः परवशीक्रिय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सायसङ्कल्पाभिमानलिङ्गो बद्धोऽतस्तद्विपरीतो मुक्त-स्तस्मात् निरध्यवसायो निःसङ्कल्पो निरभिमानस्ति-ष्ठेदेतन्मोक्षलक्षणमेषाच ब्रह्मपदव्येषोऽत्र द्वारविवरोऽ-

---

माणोऽभिमानित्वं प्रयात इत्यन्वयः। जालेनेव खचर इत्यन्तं तृतीयप्रपाठके द्वितीयानुवाके व्याख्यातं। यस्मादेवमचेतनस्य बुद्धितत्त्वस्य स्वसत्तास्फुर्त्योरस्वतन्त्रस्य कर्तृत्वबन्धमोचभाक्त्व-मनुपपन्नं, कूटस्थस्याऽपि चिदात्मनः परोपाधिवशात् प्राति-भासिकं तत् सर्वमुपपन्नमतोऽस्माद्धेतोः पुरुषोऽध्यवसायेत्या-दिप्रासङ्गिकार्थोपसंहारः स्पष्टार्थः। प्रकृतमुपसंहरति, तस्मात् निरध्यवसाय इति। मुमुचुस्त्वेदकामः सन् विषयाध्यवसायादि-रहितः स्यादित्यर्थः। एतद्यदकामादिलचणमवस्थानमेतन्मो-चलचणं मोचसाधनं यत एषाच श्रेयोमार्गेषु मध्ये ब्रह्मपदवी साचाद्ब्रह्मप्राप्तिमार्गः, एषोऽत्र द्वारविवरो मोचद्वारस्योद्घाटन-मित्यर्थः। विधेयाविष्टलिङ्गभेदैर्निरध्यवसायाद्यात्मना अकामा-त्मत्वावस्थानं निर्दिश्यते। किं बहुनाऽनेनाकामात्मत्वावस्थानेनास्य संसाररूपस्य तमसः पारं परतीरं विष्णोः परमं पदं गमिष्यति अचिरेणैवात्मतत्त्वज्ञानेनोपैष्यतीत्यर्थः। एतां पदवीमधिगतस्य न पुनः प्राप्तव्यमवशिष्यत इत्याह, अत्र हीति। तथा च श्रुतिस्मृती 'यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामा-न्त्सह' (तैत्तिरीयो०) इति, 'यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः' (गी०) इति। अत्रोक्तेऽर्थे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेनास्य तमसः पारं गमिष्यत्यत्र हि सर्वे कामाः समाहिता इत्यत्रोदाहरन्ति ।

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् ॥

एतदुक्त्वान्तर्हृदयः शाकायन्यस्तस्मै नमस्कृत्वा यथा-

निरभिमानस्य ब्रह्मपदप्राप्तिरित्यत्र उदाहरन्ति कठाः (कठोप० ६) इति शेषः। यदा यस्मिन् काले पञ्च ज्ञानानि ज्ञानेन्द्रियाणि श्रोत्रादीनि मनसा सह मनःसहितानि सर्वेन्द्रियाणीति यावत् अवतिष्ठन्ते निश्चलानि भवन्ति बुद्धिश्चाध्यवसायलक्षणा न विचेष्टते नेङ्गते, किन्तु निर्वातदेशस्थप्रदीपवन्निश्चलीभवति इत्यर्थः। येयमिन्द्रियमनोबुद्धीनां निश्चलावस्था तां परमां गतिं परमं ब्रह्मप्राप्तिसाधनमाहुर्ब्रह्मविद इत्यर्थ। इदानीं शाकायन्यस्य वृत्तान्तं कथयन्ती श्रुतिः सगुणब्रह्मोपासकानां ब्रह्मप्राप्तिद्वारमुपदिशति तच्चिन्तनार्थं "एतदुक्त्वान्तर्हृदयः ०आदित्य इति" इति। एतदुक्तं सर्वं दर्शनं समाधनमुक्त्वा-ऽन्तर्हृदयोऽन्तरात्मनि हृदयं बुद्धिर्यस्य सोऽन्तर्हृदयः शाकायन्य उपररामेत्यध्याहारः। मरुन्मरुन्नामा बृहद्रथस्तस्मै शाकायन्याय नमस्कृत्वा यथावदुपचारी यथाशास्त्रं शुश्रूषापूजाद्युपचारपरः कृतकृत्योऽवाप्तकाम उत्तरायणं ब्रह्मपथं गतः सगुणनिर्गुणब्रह्मज्ञानमुपगत इत्यर्थः। न ह्यत्रोक्ततत्त्वनिष्ठायामुदात्मनोन्मार्गेण तिर्यगादिमार्गेण गतिर्गमनमस्तीति शेषः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वदुपचारी कृतकृत्यो मरुदुत्तरायणं गतो न ह्यत्रो-द्वर्त्मना गतिरेषोऽत्र ब्रह्मपथः सौरं द्वारं भित्त्वोर्द्ध्वेन विनिर्गता इत्यत्रोदाहरन्ति ।

यत एष उक्तविद्यारूपोऽर्थोऽत्र श्रेयोमार्गेषु ब्रह्मपथो ब्रह्मप्राप्तिमार्ग इत्यर्थः । अत्र 'न तस्य प्राणा उत्क्रामन्ति अत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति' (शत० ब्रा० का० १४ । अ० ७) इति श्रुतेर्निर्गुणब्रह्मात्मतत्त्वविदो नोत्क्रमणमस्तीत्येतत्सिद्धवत्कृत्य सगुणब्रह्मविदो ब्रह्मलोकमार्गं क्रममुक्तेर्द्वारं विस्पष्टमाह श्रुतिः, सौरमिति । सौरं द्वारं सूर्यमण्डलमध्यगतमविदुषामभेद्यं द्वारं भित्त्वा विदार्य ऊर्द्ध्वेनोपरितनेन विद्युदादिना विनिर्गता उपासका इत्यत्रास्मिन्नर्थे रश्मिविशेषनिर्द्धारणार्थमुदाहरन्ति श्लोकानिति शेषः । अथवा मरुदुत्तरायणं गत इति मरुनाम्नो राज्ञ एव वृत्तान्तः कथ्यते । तथा चायमर्थः, उत्तरायणं देवयानं पन्थानं गतः कालेनारूढो न साक्षात् कैवल्यमत्रैव गत इत्यर्थः । यदि साक्षान्मुक्तिं न प्राप तर्हि भोगान्ते संसारः स्यादित्यत आह, न ह्यत्रेति । अत्रोपासनायां सत्यामुद्वर्त्मना संसारमार्गेण पुनर्गतिर्गमनं न ह्यस्ति 'न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति' इति भगवत्स्मरणात् । यत एष देवयानोऽत्रोपासनायां ब्रह्मपथो ब्रह्मणः परस्याऽपि क्रमेण प्रापकत्वात् ब्रह्मपथ इत्यर्थः । सौरद्वारं भित्त्वोर्द्ध्वेन विनिर्गता मरुनामा राजर्षिः, अत्रोदाहरन्ति इति पूर्ववत् । तस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि।
सितासिताः कद्रुनीलाः कपिला मृदुलोहिताः॥
ऊर्द्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलं।
ब्रह्मलोकमतिक्रम्य तेन यान्ति परां गतिं॥

रश्मयो निर्गमननाड्यश्चिदाभासव्याप्ता अनन्ताः, कस्य, यो हृदि ध्यानकाले दीपवत् प्रकाशमान आत्मा स्थितस्तस्येत्यर्थः। आत्मनिर्गमननाड्यन्तर्गतानां रसानां वातपित्तकफानां सम-न्यूनाधिकभाववशात् सितादिवर्णास्तासु भवन्ति, तद्युत्पादनं तु वैद्यके सिद्धं, तदेतदाह सितेति। सिताश्चासिताश्च सिता-सिताः कफबाहुल्ये सिताः वायुबाहुल्ये त्वसिता इत्यर्थः। कद्र-वश्च नीलाश्च कद्रुनीलाः वायुकफयोः कुपितयोः सङ्करे कद्रवः कद्रुवर्णा ईषच्छ्यामा इत्यर्थः। पित्तवाय्वोः सङ्करे नीलवर्णाः, पित्ताधिक्ये कपिलाः, मृदवश्च ते लोहिताश्च मृदुलोहिताः, उद्रिक्तेन पित्तेनांशतो वायुकफयोर्योगात् मृदुलोहिता रश्मयो नाड्यन्तर्गता भवन्तीत्यर्थः। तथा च श्रुत्यन्तरं 'तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितं च' (वृहदा० अ० ६) इति। तथा नाडीः प्रकृत्य 'ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्य पूर्णाः' (छान्दो० अ० ८) इति च। तेषां रश्मीनां मध्ये एको रश्मिः सुषुम्नाख्य ऊर्द्ध्वं ब्रह्मरन्ध्रपर्यन्तं स्थितः, कोऽसौ यः सुषुम्नाख्येन सूर्यरश्मिविशेषेणैकीभूतत्वात् सूर्यमण्डलं भित्त्वा स्थितः स इत्यर्थः। तेन रश्मिमार्गेण कार्यब्रह्मलोकं गत्वा तत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदस्यान्यद्रश्मिशतमूर्द्ध्वमेव व्यवस्थितं ।
तेन देवनिकायानां स्वधामानि प्रपद्यते ॥
ये नैकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः ।
इह कर्मोपभोगाय तैः संसरति सोऽवशः ॥

भोगान्ते तमतिक्रम्य परां गतिं तद्विष्णोः परमं पदं शाश्वतं परं ब्रह्म यान्त्युपासका इत्यर्थः। 'शतं चैका च हृदयस्य नाड्यस्तासां मुर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' (कठो० ६) इत्यस्मिन् मन्त्रे तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नमृतत्वमेति इति पादद्वयस्यार्थः मुक्ता प्रथमपादोपात्तशतरश्म्युपयोगमाह, यदस्येति। अस्य हृदयस्य सम्बन्धि यद्रश्मिशतमस्ति तदप्यूर्द्ध्वमेवोर्द्ध्वगतिहेतुभूतमेव व्यवस्थितं, तेन रश्मिशतेन निर्गतो देवनिकायानां देववृन्दानां स्वधामानि तत्तद्देवस्थानानि प्रपद्यते, देवनिकायमध्ये यं देवविशेषं यः कर्मणा विद्यया चोपास्ते स रश्मिशतस्थैकेन केनचिद्रश्मिना तस्य देवस्य पदं यातीत्यर्थः। विष्वङ्ङन्या उत्क्रमणे भवन्तीति चतुर्थपादार्थमाह ये नैकरूपा इति। ये त्वस्य हृदयस्य रश्मयोऽनेकरूपा अधस्तादधोमुखा मृदुप्रभा अत्यल्पप्रकाशास्तमोबहुला रश्मयस्तैर्निर्गतः स विहितज्ञानकर्मसाधनरहितः पुमान् दुःखकर्मोपभोगाय इहैव भूमावेवावशः सन् संसरति दुःखमनुभवतीत्यर्थः। तथा च श्रुत्यन्तरं 'य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकं'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मात् सर्गस्वर्गापवर्गहेतुर्भगवानसावादित्य इति ॥ ३० ॥

किमात्मकानि वा एतानीन्द्रियाणि प्रचरन्त्युद्गन्ता

(बृहदा० अ० ८) इति। सूर्यमण्डलान्तर्गतब्रह्मोपासनमुपसंहार-व्याजेन प्रशंसति तस्मादिति। असावादित्यो भगवानादित्यात्म-नाभिव्यक्त ईश्वरोऽनुपासितः सन् सर्गहेतुः उपासितस्तु स्वर्गाप-वर्गयोर्हेतुः, देवताबुद्ध्योपासितः स्वर्गहेतुर्ब्रह्मात्मनोपासितोऽपवर्ग-हेतुरिति विभागः ॥ ३० ॥

समाप्ता शाकायन्यबृहद्रथाख्यायिका। इदानीं श्रुतिरेव प्रश्नप्रतिवचनरूपेण स्वरूपेण चेन्द्रियादितत्त्वं नामरूपात्मककार्य-तत्त्वमित्याद्यनेकानर्थान् प्रागनुक्तानुपदेष्टुं प्रवर्तते "किमात्म-कानि ० रश्मिभिर्विषयानत्ति" इति। एतानि ज्ञानकर्मार्था-नीन्द्रियाणि किमात्मकानि वै किमुपादानकानीत्यर्थः, प्रच-रन्ति स्वस्वविषयेष्विति शेषः। एषामिन्द्रियाणामुद्गन्तोद्गमनकर्ता च निमित्तभूतोऽधिष्ठाता च क इत्यर्थः। इह व्यवहारसमये को वैतेषामिन्द्रियाणां नियन्ता तैर्व्यवहर्ता वा को भवती-त्याह कश्चित्प्रष्टेत्यध्याहारः। कश्चिदन्यः प्रत्याह प्रत्युत्तरमाह प्रश्नक्रमेणेत्यर्थः। आत्मात्मकानि आत्मा वक्ष्यमाणलक्षणस्तदा-त्मकानि तदुपादानकानीत्यर्थः। इतीत्थमात्मा हि एव एषा-मिन्द्रियाणामुद्गन्ता नियन्ता च नान्यस्य घटादेरिवेत्यर्थः। अप्सरस इति विषया उच्यन्ते, शब्दादयो हि विषयाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चैतेषामिह को नियन्ता वेत्याह प्रत्याहात्मात्मकानीत्यात्मा ह्येषामुद्गन्ता नियन्ता वाप्सरसो भानवीयाश्च मरीचयो नामाथ पञ्चमी रश्मिभिर्विषयानत्ति।

कामिनामप्सरस इव विषयिणामभिलाषगोचरा भवन्ति तेऽपीन्द्रियाणां नियन्तारः, तथा च बृहदारण्यके ग्रहातिग्रहशब्दाभ्यामिन्द्रियाणि विषयांश्चोक्त्वा 'श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः' इत्यादिनातिग्रहशब्दवाच्यविषयनियम्यत्वं ग्रहशब्दवाच्यानामिन्द्रियाणां समाम्नायते। तथा च विषयाश्चेन्द्रियाणां नियन्तार इत्यर्थः। भानवीयाश्च मरीचयः सूर्यकिरणाश्चेन्द्रियाणां नियन्तार इति नाम प्रसिद्धमेतदित्यर्थः। भानुशब्द उपलक्षणं सर्वेन्द्रियदेवतानां दिगाद्यानां तैस्तैर्देवताविशेषैः केनचिद्द्वारेणानुगृहीतानीन्द्रियाणि स्वं स्वं विषयं ग्राहयन्तीति देवा अपि नियन्तार इत्यर्थः। अथ एवं सति पञ्चभिः श्रोत्रादिभिर्ज्ञानेन्द्रियैरश्मिभीरश्मिशब्दनिर्दिष्टैः विषयान् शब्दादीनत्ति भुङ्क्तेऽयमात्मेति सिद्धमित्यर्थः। कर्मेन्द्रियैर्हयशब्दनिर्दिष्टैर्विषयान् प्राप्नोति इत्यपि द्रष्टव्यम्। तथा चोक्तं प्राग् द्वितीये प्रपाठके 'बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः कर्मेन्द्रियाण्यस्य हयाः' इति एतदुक्तं भवति। इन्द्रियाणामचेतनानां भौतिकत्वेऽपि चेतनैकायत्तत्त्वं परमार्थत इत्यात्मात्मकानीत्याद्युच्यते व्यवहारतस्तु विषयालोकाद्यधीनत्वेन तन्निय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कतम आत्मेति । योऽयं शुद्धः पूतः शून्यः शान्तादि-लक्षणोक्तः स्वकैर्लिङ्गैरुपगृह्यः । तस्यैतल्लिङ्गमलिङ्ग-स्याग्नेर्यदौष्ण्यमाविष्टञ्चापां यः शिवतमो रस इत्येके

न्यता चेति । यदधीनत्वमित्यमिन्द्रियाणामुक्तं स आत्मा कतम इति पृच्छति "कतम आत्मेति" इति । देहेन्द्रियमनोबुद्धि-प्राणेष्वहमहमित्युल्लिख्यमानेषु कतमः किं तेष्वन्यतमः किं वान्य एव तेभ्य इति प्रश्नार्थः । उत्तरमाह "योऽयं शुद्धः ० स्वकैर्लिङ्गैरुपगृह्यः" इति । योऽयमात्मा शुद्धः पूतः शून्यः शान्त इत्यादिना द्वितीयप्रपाठके शुद्धत्वादिलक्षण उक्तः स्वकैरसाधारणैर्लिङ्गैः स्वरूपसद्भावसाधकैरुपगृह्यो देहादिप्राणा-न्तेषु सङ्घातात्मकेषु उप समीपे तत्सन्निहितरूपतया ग्राह्य इत्यर्थः । सङ्घातादन्योऽचेतनसङ्घातं चेतयमानोऽतस्तत्साचितया भासमान आत्मेत्युत्तरमुक्तं भवति । स्वकैर्लिङ्गैरुपगृह्य इत्युक्तं तत्र कानि स्वकानि लिङ्गानीति जिज्ञासायां तानि मत-भेदेनानेकधोपदिशति "तस्यैतल्लिङ्गं ० प्रज्ञा तदित्येके" इति । तस्यात्मनोऽलिङ्गस्य परमार्थतो निर्धर्मकत्वेन लिङ्गरहितस्यै-तद्वच्यमाणं लिङ्गं, लिङ्ग्यते ज्ञाप्यतेऽनेनेति लिङ्गं ज्ञापक-मित्यर्थः । किं तदित्यपेक्षायां दृष्टान्तोक्त्यैव तदाह, अग्ने-रिति ! यत् यद्वदौष्ण्यमग्नेर्लिङ्गं तप्तोदकादिगतेनौष्ण्येन यथा तत्राग्निर्लिङ्ग्यते, आविष्टं चेन्धनावेशादिनिमित्तं धूमादि च लिङ्गमग्नेः, यथा चापां लिङ्गं यः शिवतमो निरुपाधिमधुरो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽथ वाक् श्रोत्रं चक्षुर्मनः प्राण इत्येकेऽथ बुद्धिर्धृतिः स्मृतिः प्रज्ञा तदित्येके । अथ ते एतस्यैवं यथैवेह

रसः क्षीरादिष्वप्युपलभ्यमानः । रसस्य हि स्वाभाविकं स्वरूपं माधुर्यमेव अन्यथात्वं तु तस्य पार्थिवेषु परिणामविशेषोपाधिकृतमिति मधुररसो यत्र क्वाप्युपलभ्यमानोऽपां सद्भावज्ञापक इत्यर्थः । तथात्मनोऽचेतनेषु देहादिषूपलभ्यमानं चैतन्यं देहद्वयावेशकृतं प्राणादिकं च लिङ्गमिति दार्ष्टान्तिकं योज्यम् । इत्येके शाखिनो वदन्तीत्यर्थः । तथा च श्वेताश्वतराणां मन्त्रोपनिषत् 'नित्यो नित्यानां चेतनश्चेतनानां' इति । वागादिकमात्मनो लिङ्गमित्येके 'श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः' इति तलवकारादयः श्रोत्रादिप्रकाशकतयात्मानं साधयन्तीत्यर्थः । अथैके बुद्ध्यादि यत् तल्लिङ्गमात्मन इति वर्णयन्तीत्यर्थः, 'न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरः' इति बृहदारण्यके (अ. ५)। 'तदेतत् सञ्ज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिः स्मृतिः' इत्यादि 'प्रज्ञानस्य नामधेयानि भवन्ति' इत्यन्तं 'प्रज्ञानेत्रो लोकः' इति ऐतरेयकोपनिषत्सु । उक्तानां धर्माणामात्मविशेषणत्वाभावेऽपि तत्कार्यतया स्वनिमित्तभूतात्मलिङ्गत्वं सम्भवतीत्येतद् दृष्टान्तेनोपपादयति "अथ ते एतस्यैवं ० एवाग्नेस्त्यचोदाहरन्ति" इति । अथायमपेक्षितार्थविशेषः कथ्यते ते वै उक्ता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बीजस्याङ्कुरा वाथ धूमार्चिर्विष्फुलिङ्गा इवाग्नेश्चेत्य-
थोदाहरन्ति ।

वह्नेश्च यद्वत् खलु विष्फुलिङ्गाः
सूर्यान्मयूखाश्च तथैव तस्य ।
प्राणादयो वै पुनरेव तस्मा-
दभ्युच्चरन्तीह यथाक्रमेण ॥ ३१ ॥

तस्माद्वा एतस्मादात्मनि सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वे देवाः सर्वाणि च भूतान्युच्चरन्ति

लिङ्गविशेषा एतस्यात्मन एवं ज्ञापका इति शेषः । कथं यथैवेह व्यवहारभूमौ बीजस्य भूम्यन्तर्गततयाऽदृश्यस्य सद्भावज्ञापका अङ्कुरा वाऽथवा अग्नेश्च सद्भावसाधका धूमादय इवेति । अत्र चैतन्याभासाश्चैतन्यस्यावस्थाविशेषा अङ्कुरा इव चिदात्मानं ज्ञापयन्ति । वाक्चक्षुर्बुद्धिधृत्यादयस्तु धूमादय इवाग्ने स्वप्रवृत्त्यादिनात्मानं तद्धेतुभूतं कल्पयन्तीति विभागः । अत्रास्मिन्नुक्तेऽर्थे श्लोकमुदाहरन्ति । तमेवाह "वह्नेश्च यद्वत् ० यथाक्रमेण" इति । स्पष्टार्थः ॥ ३१ ॥

प्राणादयोऽस्मादात्मनः कथं क्रमेणाभ्युच्चरन्तीत्यपेक्षायां तदुपपादयति "तस्माद्वा ० सत्यमिति" इति । तस्मात् शुद्धः पूत इत्याद्युक्तलक्षणात् वै एव एतस्मादुक्तानेकलिङ्गानुमितसद्भावात् आत्मनि स्वस्वरूपे स्थितादविकृतादिति यावत् । सर्वे प्राणा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्योपनिषत् सत्यस्य सत्यमिति । अथ यथार्द्रैधाग्ने-रभ्याहितस्य पृथग्धूमा निश्चरन्त्येवं वा एतस्य महतो

वागादयः, सर्वे लोकास्तेषां विषयाः । सर्वे वेदा वेदनानि तत्त-द्विषया बुद्धिवृत्तयः, सर्वे देवा इन्द्रियाधिष्ठातारोऽग्न्यादयः, सर्वाणि च भूतानि भूतसङ्घातोपाधिकानि भोक्तृरूपाणि स्थावरजङ्गमात्मकानि चोच्चरन्ति व्युच्चरन्ति विविधमुत्ति-ष्ठन्ति पूर्वकृतप्रज्ञाकर्मवासनानुसारेणोद्भवन्तीत्यर्थः । यस्मादेते व्युच्चरन्ति तस्यात्मन उपनिषदुपनिगमयितृत्वात् साक्षाद्रहस्यं नाम । किं । सत्यस्य सत्यमिति यदेतत् तदयोपनिषदिति योजना । सदिति पृथिव्यप्तेजांसि त्रीणि भूतानि त्यदिति वाय्वाकाशौ द्वे भूते सच्च त्यच्च सत्यमितिव्युत्पत्त्या पञ्च भूतानि स्वविकारैः सह सत्यमुच्यन्ते, तस्य सत्यं परमार्थरूपमधिष्ठानं 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' (छान्दो०) इति श्रुत्यन्तरादनृतस्य पञ्चभूतात्मकप्रपञ्चस्याधिष्ठानमात्मा सत्यस्य सत्यमित्युच्यत इत्यर्थः । तदेवं वाच्यस्य जगत आत्मविवर्तता-मुक्त्वा वाचकस्य तस्योत्पत्तिं वेदोत्पत्तिकथनेनाह "अथ यथा ० विश्वा भूतानि" इति । अथ नाम सृष्टिकथनोपक्रमे दृष्टान्तो यथा लोके आर्द्रैधाग्नेरार्द्रमेधो यस्य स आर्द्रैधाः, स चासावग्निश्चेत्यार्द्रैधाग्निः, तस्य आर्द्रैधोऽग्नेरित्येतत्, अभ्याहि-तस्य संधुक्षितस्य पृथगनेकप्रकारा धूमा धूमज्वाला विस्फुलिङ्गा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसा इतिहासः पुराणं विद्या। उपनिषदः

विनिस्सरन्ति अन्यात्मान एव मन्त्रः उपाधिकृताकारभेदेन प्रभवन्तीत्यर्थः। एवं वै एवमेव एतस्य प्रकृतस्यात्मनो महतो ऽपरिच्छिन्नस्य भूतस्य सिद्धस्य यथाभूतस्य परमार्थस्य निश्वसितं निश्वसितमिव निश्वसितमबुद्धिपूर्वकमप्रयत्नकृतमेतत्। किं। य ऋग्वेद ऋग्वेदादिरूपं यदस्ति एतदिति योजना। अथर्वणा चाङ्गिरसा च दृष्टा मन्त्रा अथर्वाङ्गिरसः। अत्रर्ग्वेदादिशब्दैर्मन्त्रभागश्चतुर्णां वेदानां गृह्यते। इतिहासादिशब्दैस्तेषामेवाष्टविधं ब्राह्मणमभिधीयते। तत्रेतिहासः पुरावृत्तकथनं 'हरिश्चन्द्रो ह वै नाम राजासीत्' इत्यादि। यथात्रैव 'वालखिल्या इति श्रूयन्तेऽथ क्रतुं प्रजापतिमब्रुवन्' इति। तथा 'जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस' इत्यादि। 'ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः' इत्यादि। पुराणं सृष्ट्यादिवाक्यसन्दर्भः 'तस्माद्वा एतस्मादात्मनि' इत्यादि। विद्या उपासनविद्यावाक्यसन्दर्भः। उपनिषदः 'तस्योपनिषत् सत्यस्य सत्यं' इत्याद्या रहस्योपदेशवाक्यरूपाः। श्लोकाः 'अत्रोदाहरन्त्येवं ह्याहाचित्तं चित्तमध्यस्थं' इत्येवमादयः। सूत्राणि वस्तुसङ्ग्रहवाक्यानि 'अयं वाव खल्वात्मा ते' इत्येवंविधानि। अनुव्याख्यानानि तत् सूत्रमनु तस्य विस्प-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि विश्वा भूतानि ॥ ३२ ॥

पञ्चेष्टको वा एषोऽग्निः संवत्सरस्तस्येमा इष्टका यो वसन्तो ग्रीष्मो वर्षाः शरद्धेमन्तः स शिरःपक्षसी-

---

ष्टार्थं कथनानि यथानन्तरमेव 'अथ य एषोच्छ्वासाविष्टम्भनेन' इत्येवमादीनि। व्याख्यानानि तस्य सूत्रार्थस्योपपादनपराणि वाक्यानि अत्रैव वालखिल्यक्रतुसंवादप्रबन्धेन प्रवृत्तानीति। अथवा ऋग्वेदादिशब्दैर्मन्त्रब्राह्मणात्मको वेदशब्दवाच्यः सर्व एव गृह्यते, इतिहासादिशब्दैश्च महाभारतादिः प्रसिद्ध एव ग्रन्थसन्दर्भोऽभिधीयते। ब्रह्मण एव प्रत्यगात्मनस्तत्तद्व्याद्या-त्मनाभिव्यज्य व्यवस्थितस्येतिहासादिकर्तृत्वोपगमात् 'यद्यद्विभूति-मत् सत्त्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंऽश-सम्भवं' इति भगवद्वचनात्। सर्वज्ञेश्वरतन्त्र एव सर्वो व्यवहार इति तात्पर्यार्थः। एतदेवोपसंहारव्याजेनाहाऽस्यैवैतानि विश्वानि भूतानि सवाचकानीत्यर्थः॥ ३२ ॥

ब्रह्मविद्यायां वक्तव्यं विशेषमुक्त्वा पुनः संवत्सरात्मकाला-वयवानग्न्यवयवेषु सम्पाद्योपासनविशेषं पूर्वत्रानुक्तमनुक्रामति। खिलरूपत्वादस्य नात्यतीवसङ्गत्यादर इति "पञ्चेष्टको ० आ-नन्दी मोदी भवति" इति। अग्निहोत्र्यधिकारकमिदमुपासन-मुपदिश्यते, सोऽग्निहोत्रहोमकाले गार्हपत्यादिष्वग्निषु क्रमेणैत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृष्ठपुच्छवानेषोऽग्निः पुरुषविदः सेयं प्रजापतेः प्रथमा चितिः करैर्यजमानमन्तरिक्षमुत्क्षिप्ता वायवे प्रायच्छत् प्राणो वै वायुः प्राणोऽग्निस्तस्येमा इष्टका यः प्राणो व्यानोऽपानः समान उदानः स शिरःपक्षसी-

---

चिन्तयेत् तद्यथा पञ्चेष्टको वक्ष्यमाणाभिः पञ्चभिरिष्टकाभिश्चीयमान एषोऽग्निर्गार्हपत्याख्यो वै संवत्सरः संवत्सरात्मत्वेन ध्येय इत्यर्थः, तस्य संवत्सरात्मनोऽग्नेरिमा अनन्तरमेव वक्ष्यमाणा इष्टकाः वसन्तादयः। तत्र वसन्तः शिरः ग्रीष्मो दक्षिणः पक्षः वर्षा उत्तरः पक्षः शरत् पृष्ठं हेमन्तशिशिरावृतू एकीकृत्य पुच्छमित्येवं विभागमभिप्रेत्याह, शिरः पक्षसी इत्यादि। शिरः पूर्वभागः पक्षसी पक्षौ दक्षिणोत्तरभागौ पुच्छं पश्चाद्भागः पृष्ठं मध्यभागः, एतदङ्गवानेषोऽग्निः, पुरुषविदः पुरुषं विराजमात्मानं वेत्ति उपास्ते इति पुरुषवित् तस्य पुरुषविदः प्रजापतेः संवत्सरात्मनो विराजो या प्रथमा चितिः सा इयं पृथिवीति योजना। अयं गार्हपत्योऽग्निः पृथिवीसंवत्सरात्मा विराड् वसन्तादीष्टकाभिश्चितः शिरःपक्षपुच्छपृष्ठवानहमस्मीति ध्यायेदिति तात्पर्यार्थः। पुरुषविध इति पाठे पुरुषाकार एषोऽग्निरित्यर्थः। एवं ध्यायतो यजमानस्यैतदग्निकृतमुपकारमाह, करैरिति। यजमानस्य परलोकगमनावसरे तं यजमानमग्निहोत्रिणमुपासकं करैर्हस्तैरन्तरिक्षं प्रत्यु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृष्ठपुच्छवानेषोऽग्निः पुरुषविदस्तदिदमन्तरिक्षं प्रजापतेर्द्वितीया चितिः करैर्यजमानं दिवमुत्क्षिप्येन्द्राय प्रायच्छदसौ वा आदित्य इन्द्रः सैषोऽग्निस्तस्येमा इष्टका यदृग्यजुःसामाथर्वाङ्गिरसा इतिहासः पुराणं

त्क्षिप्योत्क्षिप्य वायवे हिरण्यगर्भाय सूत्रात्मने प्रायच्छत् प्रयच्छतीत्येतत् । स्थूलवायुशङ्कां वारयति, प्राणो वै वायुरिति । प्राणश्च हिरण्यगर्भः सर्वश्रुतिषु प्रसिद्धः । इति गार्हपत्याग्निविषयं ध्यानं फलञ्चोक्तम् । इदानीं हिरण्यगर्भप्राणदृष्ट्या दक्षिणाग्निध्यानप्रकारमाह, प्राणोऽग्निरिति । तस्य प्राणरूपस्य दक्षिणाग्नेरिमा इष्टकास्ताः का इति ता आह, प्राणादयः पञ्च वायवः शरीराभ्यन्तरचारिणो यथाक्रमं शिर आद्यवयवतया चितेष्टकारूपा इत्ययमप्यग्निः शिरःपक्षपुच्छपृष्ठवानित्यादि सर्वं पूर्ववद्योज्यम् । तदिदमन्तरिक्षमन्तरिक्षात्मको दक्षिणाग्निः प्रजापतेर्द्वितीया चितिः । करैरित्याद्यपि पूर्ववत् । कोऽसाविन्द्र इत्येतदाह असौ वै प्रसिद्ध आदित्य इन्द्रः परमेश्वरः सैषोऽग्निः स एष इन्द्रोऽग्निराहवनीयस्तस्येमा इष्टकाः सेतिहासपुराणास्त्वारो वेदाः पूर्ववत्क्रमेण शिरःप्रभृत्यवयवात्मना चितेष्टकारूपा ध्येयाः इहापीतिहासपुराणयोरेकत्वं द्रष्टव्यम् । सैषा द्यौर्दिवात्मकोऽयमाहवनीयोऽग्निः प्रजापतेस्तृतीया चितिः । अयं पुनरिन्द्रः सविता दिवाहवनीयाग्निरूपो यजमानस्यात्मविदे,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स शिरःपक्षसीपुच्छपृष्ठवानेषोऽग्निः पुरुषविदः सैषा द्यौः प्रजापतेस्तृतीया चितिः करैर्यजमानस्यात्मवि-देऽवदानं करोत्यथात्मविदुत्क्षिप्य ब्रह्मणे प्रायच्छत् तत्रानन्दी मोदी भवति ॥ ३३ ॥

पृथिवी गार्हपत्योऽन्तरिक्षं दक्षिणाग्निर्द्यौराहवनीय-स्तत एव पवमानपावकशुचय आविष्कृतमेतेनास्य

त्रैलोक्यात्मकः प्रजापतिर्यजमानस्यात्मवित् यजमानेन त्रिष्वग्नि-ष्वात्मत्वेन भावितस्तस्मै, अवदानमवदानवत् तत्प्रीतिकरं यज-मानं करोति तदात्मसाचात्करोतीत्यर्थः । अथ च आत्म-विदे, पूर्वोपासकः फलावस्थ आत्मवित् तस्मा आत्मविदे यजमानस्यावदानं करोतीति सम्बन्धः, यजमानं तस्मै सम-र्पयतीत्यर्थः । अथानन्तरमात्मविद्यजमानमुत्क्षिप्य ब्रह्मणे समष्टि-सूत्रात्मने कार्यावस्थाय प्रायच्छत् प्रत्तवान्, तत्र ब्रह्मणि स्थितो यजमान आनन्दी मोदी सामान्यतो विशेषतश्च यथासङ्कल्पमानन्दवान् भवतीत्यर्थः । अस्या ब्रह्मप्राप्तेर्गत्या-यत्तलाभात्त्र ब्रह्मशब्दः परब्रह्मविषयः । 'कार्यं बादरिरस्य गत्युपपत्तेः' (शा ० सू ० अ ० ४ । पा ० ३ । सू ० ७) इति न्यायात् ॥ ३३ ॥

पुनः प्रकारान्तरेण गार्हपत्याद्यग्निविषये सम्पाद्यविशेष-मुपदिशन्नुपासनान्तरमाह "पृथिवी गार्हपत्यः ० विचिनोति" इति । गार्हपत्यादिष्वग्निषु यथानिर्देशं पृथिव्यादिदृष्टिर्वि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यज्ञं यतः पवमानपावकशुचिसङ्घातो हि जाठरस्त-स्मादग्निर्यष्टव्यश्चेतव्यः स्तोतव्योऽभिध्यातव्यो यजमानो हविर्गृहीत्वा देवताभिध्यानमिच्छति ।

धीयते, तत एवेति त एवेत्येतत्, पवमानपावकशुचयोऽग्नि-विशेषा ये प्रसिद्धास्त एव एव गार्हपत्यः पवमानो दक्षिणाग्निः पावक आहवनीयः शुचिरिति भेदः । अस्य गार्हपत्यादि-सङ्घातस्य सम्बन्धि यज्ञं यजमानमेतेन पवमानादिदेवता-सङ्घातेनाविष्कृतं प्रवर्तितमित्यर्थः । आधानेनाग्निषु संस्कृतेषु प्रथमं पवमानादयो होष्टाः मन्तोऽग्नीनामुत्तरकालङ्गतां सम्पा-दयन्ति तस्मात् पवमानादिरूपा एते ध्येया इत्यभिप्रायः । तथा जाठरोऽपि योऽग्निः सोऽपि पवमानादिसङ्घात एवेति ध्येयत्वमभिप्रेत्याह, पवमानपावकेति । यस्मादेवमध्यात्ममधि-भूतमधिदैवमधियज्ञञ्चाग्निराहवनीयादिरूपस्तस्मादग्निर्यष्टव्यः पय आदिभिर्हविर्भिः, चेतव्य इष्टकाभिरधियज्ञमध्यात्मञ्च यथा-शास्त्रं, स्तोतव्य उपस्थानादिमन्त्रैः, अभिध्यातव्य आभिमुख्येन प्रत्यगात्मतया ध्यातव्य इत्यग्निप्रशंसया तन्निष्ठता कर्तव्योप-दिष्टा । इदानीं होमकालेऽग्नौ चिन्तनीयं मन्त्रेणोपदेष्टुं तत् प्रसञ्जयति यजमानो हविर्गृहीत्वेति । इच्छति इच्छेत कुर्वीते-त्यर्थः । हिरण्यवर्ण इति मन्त्रः हिरण्यवत्प्रकाशमानः शकुनः पक्षी पक्षीव नीडस्थो नीडादन्यो देहसङ्घातादिलक्षणः हृदि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हिरण्यवर्णः शकुनो हृद्यादित्ये प्रतिष्ठितः ।
मद्गुर्हंसस्तेजोवृषः सोऽस्मिन्नग्नौ यजामहे ॥

इति चापि मन्त्रार्थं विचिनोति । तत् सवितुर्वरेण्यं भर्गोऽस्याभिध्येयं यो बुद्ध्यन्तस्थो ध्यायीह मनःशान्तिपदमनुसरत्यात्मन्येव धत्तेऽत्रेमे श्लोका भवन्ति ।

अन्तर्हृदये आदित्ये सवितृमण्डले च प्रतिष्ठितो वर्तते । केन केन रूपेणेत्यपेक्षायामाह, मद्गुः जलचरः पक्षी, स यथा जले निमग्न इव गच्छति तथा हृद्यात्मा जीवरूपः सम्पूर्णोऽपि यथावदनवभासनान्मद्गुसदृशः । हंसो मानससरोऽम्भोरुहवनविहारी पक्षिविशेषः, स यथा शुद्धस्तथा आदित्ये पुरुषो ब्रह्मरूपो यतः स तेतोवृषस्तेजसा श्रेष्ठस्तेजोबहुल इत्यर्थः । तमेव पुरुषमुभयत्र वर्तमानमित्यध्याहारः, अस्मिन्नग्नौ यथोपदिष्टस्वरूपे यजामहे वयं पूजयाम इति मन्त्रस्यार्थः । इतिशब्दो मन्त्रसमाप्त्यर्थः । इति च मन्त्रमुच्चार्य अपि, मन्त्रार्थमपीति योजना, विचिनोति विचारयति चिन्तयतीत्यर्थो धातूनामनेकार्थत्वात्, यद्वा विचिनोति विशेषेण मन्त्रतात्पर्यसम्बन्धतया चिनोति सङ्कलयतीत्यर्थः । तमेव तात्पर्यमुपन्यस्यति "तत् सवितुः ० भवन्ति" इति । सवितुरादित्यस्य सम्बन्धि तत् स्वरूपं वरेण्यं वरणीयं सम्भजनीयं, कीदृशं तत् भर्गः 'भाभिर्गतिरस्य हि' इत्यादिना (खं० ७) पूर्वत्र व्याख्यातरूपं, अस्य यजमानस्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा निरिन्धनो वह्निः स्वयोना उपशाम्यते।
तथा वृत्तिक्षयाच्चित्तं स्वयोना उपशाम्यते॥
स्वयोना उपशान्तस्य मनसः सत्यकामतः।
इन्द्रियार्थविमूढस्यान्टताः कर्मवशानुगाः॥
चित्तमेव हि संसारं तत्प्रयत्नेन शोधयेत्।
यच्चित्तस्तन्मयो भवति गुह्यमेतत् सनातनं॥

भिध्येयं, यो बुद्ध्यन्तस्थो ध्यायी ध्याता हृदि प्रतिष्ठितो ध्यातेति चिन्तयेदित्यर्थः। एवं कुर्वन्निह मनःशान्तिपदं मनसो विक्षेपपरित्यागेन शान्तिपदमालम्बनमनुसरति प्राप्नोति यत आत्मन्येव प्रतीति ध्येयं रूपं धत्ते अनुसन्धत्ते इत्यर्थः। अन्नोक्तेऽस्मिन्नर्थे इमे वक्ष्यमाणाः श्लोका भवन्ति। "यथा निरिन्धनो॰ उपशाम्यते"। स्वयोनौ भूतसूक्ष्मलक्षणे स्वकारणे, तथा चित्तं स्वयोनौ स्वाधिष्ठाने साभासाज्ञानोपलक्षिते उपशाम्यते शाम्यतीत्यर्थः। "स्वयोनौ ॰ कर्मवशानुगाः"। इन्द्रियार्थविमूढस्य मनसः कर्मवशानुगा अनृता मिथ्याप्रवृत्तयो यास्ताः सत्यकामतो यथार्थात्मवस्त्वनुपरागात् स्वयोनावुपशान्तस्य पुनर्न प्रभवन्तीत्यध्याहारेण योजना। यस्मादेवं तस्मात् "चित्तमेव ॰ सनातनं"। संसरत्यनेन पुमानिति वा संसरति पुरुषमभिभूय प्रवर्तत इति वा चित्तमेव संसारं, तत्संसर्गं विना पुरुषस्य संसारादर्शनादित्यर्थः। तत्प्रयत्नेन शास्त्रोक्तशुभविषयनिवेशनं कृत्वा शोधयेन्निवृत्ताशुभवासनं सम्पादयेत्। यतो यच्चित्तो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभं।
प्रसन्नात्मात्मनि स्थित्वा सुखमव्ययमश्नुते॥
समासक्तं यथा चित्तं जन्तोर्विषयगोचरे।
यद्येवं ब्रह्मणि स्यात् तत् को न मुच्येत बन्धनात्॥
मनो हि द्विविधं प्रोक्तं शुद्धञ्चाशुद्धमेव च।
अशुद्धं कामसम्पर्कात् शुद्धं कामविवर्जितं॥
लयविक्षेपरहितं मनः कृत्वा सुनिश्चलं।
यदा यात्यमनीभावं तदा तत् परमं पदं॥
तावन्मनो निरोद्धव्यं हृदि यावत् क्षयं गतं*।
एतज्ज्ञानञ्च मोक्षञ्च शेषान्ये ग्रन्थविस्ताराः॥

यस्मिन्निवेशितचित्तः पुरुषः स तन्मयस्तत्स्वभावो भवतीत्येतद्दुह्य प्राकृतबुद्ध्यगम्यं सनातनमव्यभिचारीत्यर्थः। "चित्तस्य० अव्ययमश्नुते"। प्रसन्नात्मा प्रसन्नचित्तः, आत्मनि प्रत्यक्स्वरूपे। सुगममन्यत्। "समासक्तं ० बन्धनात्"। स्पष्टार्थः। "मनो हि ० विवर्जितं"। तस्मात् कामस्त्याज्य इत्यर्थः। "लयविक्षेपरहितं ० परमं पदं" लयो निद्रा, विक्षेपो बहिर्विषयस्मृत्यादिः। अमनीभावः आत्मनो मनउपाधिप्रवेशकृतविशेषपरित्यागः, तं यदा याति तदा तदेव निरुपाधिकस्वरूपं परमं पदं याति। न पुनरप्राप्तप्राप्तिरस्येत्यर्थः। "तावन्मनो०

---

* गतक्षयमिति व्याख्यानुसारी पाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाधिनिर्द्धौतमलस्य चेतसो
निवेशितस्यात्मनि यत् सुखं भवेत्।
न शक्यते वर्णयितुं गिरा तदा
स्वयं तदन्तःकरणेन गृह्यते॥
अपामापोऽग्निरग्नौ वा व्योम्नि व्योम न लक्षयेत्।
एवमन्तर्गतं यस्य मनः स परिमुच्यते॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासङ्गि मोक्षो निर्विषयं स्मृतं॥ इति।

ग्रन्थविस्तराः"। हृदि हृदयसाक्षिणि। गतः प्राप्तः क्षयो विनाशो येन तत् तथा। उत्तरार्द्धं स्पष्टार्थं। "समाधि ० करणेन गृह्यते"। आत्मनि निवेशितस्य सत इत्यर्थः। अन्तःकरणेनान्तःकरणावस्थासाक्षिणा गृह्यते स्वानुभवमात्रसिद्धं तन्नान्यस्मै वक्तुं शक्यमित्यर्थः। "अपामापो ० परिमुच्यते" यथेत्यध्याहारः, अपामिति षष्ठी सप्तमीत्वेन विपरिणेया, प्रथमाश्च द्वितीयात्वेन। तथा चाप्सु यथा निक्षिप्ता अपः पृथङ् न लक्षयेत् कश्चिदग्नौ वाग्निं व्योम्नि वा प्रविष्टं घटाकाशादि, एवं यस्य मनोऽन्तर्गतमात्मैकतां गतं स परिमुच्यते सर्वसंसारबन्धनादित्यर्थः। किं बहुना मनःकृतः संसारस्तद्विलयनाच्च मोक्ष इति निश्चित्य तन्निरोधे यत्नः कार्य इत्यभिप्रेत्योपसंहरति "मन एव ० स्मृतमिति" इति। स्पष्टार्थः। मनोनिरो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतोऽनग्निहोत्र्यनग्निचिदज्ञानभिध्यायिनां ब्रह्मणः पदव्योमानुस्मरणं विरुद्धं तस्मादग्निर्यष्टव्यश्चेतव्यः स्तोतव्योऽभिध्यातव्यः ॥ ३४ ॥

नमोऽग्नये पृथिवीक्षिते लोकस्मृते लोकमस्मै यजमानाय धेहि नमो वायवेऽन्तरिक्षक्षिते लोकस्मृते

धस्य चोपायं व्यतिरेकोक्तिपूर्वकं विदधती प्रकृतमुपसंहरति "अतोऽनग्निहोत्रि० अभिध्यातव्यः" इति। अतो यस्मादनग्निहोत्रिणां यथोक्तविधाग्निहोत्रहीनानां, अनग्निचितां पञ्चेष्टक इत्याद्युक्तप्रकाराग्निचयनमकुर्वतां, अज्ञानां चित्तवृत्तान्तं संसारमोक्षहेतुमजानतां, अनभिध्यायिनां पूर्वोक्तसवितृमण्डलस्थात्माभिध्यानरहितानां पुंसां ब्रह्मणः पदमात्मतत्त्वं तदेव व्योम व्योमवन्निराकारत्वात्, तस्यानुस्मरणमनुसन्धानं विरुद्धं विशेषेण रुद्धं, चित्ताशुद्धिक्षयाभावात् ब्रह्मानुसन्धानमशक्यमित्यर्थः। तस्मादित्यादि व्याख्यातम् ॥ ३४ ॥

इदानीं पूर्वोक्ताग्निहोत्रमग्निचयनञ्चानुतिष्ठतो ध्यायिनः स्तोतव्य इत्युक्तमग्न्यादित्योपस्थानं कैर्मन्त्रैः कार्यमित्यपेक्षायां तान् मन्त्रान् पठति "नमोऽग्नये ० सर्वमस्मै यजमानाय धेहि"। एतेऽग्न्युपस्थानमन्त्रा गार्हपत्यादिक्रमेण त्रयो योज्यास्तुर्यस्तु सर्वाग्निसाधारणोऽन्ते सकृत् प्रयोज्यः। पृथिवीक्षिते पृथिवीलोकनिवासाय, लोकस्मृते पृथिवीलोकस्य स्मर्त्रे यजमानार्थं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोकमस्मै यजमानाय धेहि नम आदित्याय दिवि-
क्षिते लोकस्पृते लोकमस्मै यजमानाय धेहि नमो
ब्रह्मणे सर्वक्षिते सर्वस्पृते सर्वमस्मै यजमानाय धेहि ।

हिरण्मयेन पात्रेण सत्यस्याभिहितं मुखम् ।
तत् त्वं पूषन्नपावृणु सत्यधर्माय विष्णवे ॥

योऽसा आदित्ये पुरुषः सोऽसा अहं । एष ह वै

चिन्तयतेऽग्नये गार्हपत्यात्मने नमः प्रह्वीभावोऽस्तु, अस्मै यजमानाय मह्यं लोकं पृथिवीलोकं धेहि मदर्थं धारयाहमुत्तरकाले त्वदात्मा सन्निमं लोकं प्राप्स्यामीत्यर्थः । एवमेवोत्तरे मन्त्रा योज्याः । आदित्योपस्थानमन्त्रान् पठति "हिरण्मयेन ० असा अहं" इति । हिरण्मयेन ज्योतिर्मयेन पात्रेण मण्डलरूपेणामत्रेण सत्यस्य सत्यात्मनो ब्रह्मणो मुखं प्राप्तिद्वारमभिहितमपि हितमाच्छादितं वर्तते, हे पूषन् श्रीसूर्य त्वं तदपावृणु तद्द्वारमुद्घाटय, किमर्थं सत्यधर्माय, किं लक्षणाय विष्णवे व्यापनशीलाय । व्याख्यास्यमानसत्यधर्मविष्णुस्वरूपप्राप्तय इत्यर्थः । योऽसौ परोक्ष आदित्ये मण्डलोपलक्षिते देवतात्मनि पुरुषः पूर्णोऽन्तर्यामी सोऽसौ स एवाहं, नाहं तस्मादन्य इत्यर्थः । यद्वेत्थं योजना, य आत्मनि पुरुषोऽसावादित्ये पुरुष आत्मा अस्यासौ आदित्ये पुरुषः सोऽहमात्मनि पुरुषः, अतोऽन्तःकरणोपलक्षितस्यादित्यदेवतोपलक्षितस्य चाव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्यधर्मो यदादित्यस्यादित्यत्वं तच्छुक्लं पुरुषमलिङ्गं नभसोऽन्तर्गतस्य तेजसोऽंशमात्रमेतद्यदादित्यस्य मध्य इवेत्यक्षिण्यग्नौ चैतद्ब्रह्मैतदमृतमेतद्भर्ग एतत् सत्यधर्मो नभसोऽन्तर्गतस्य तेजसोऽंशमात्रमेतद्यदादित्यस्य

योर्न भेदोऽस्तीत्यर्थः, इतिशब्द उपस्थानमन्त्रसमाप्त्यर्थः। सत्यधर्मपदस्यार्थमाह "एष ह वै० उदाहरन्ति" इति। एष ह एव वै प्रसिद्धः, सत्यधर्मः, कः आदित्यस्यादित्यत्वमिति यत् एष हीति योजना, आदाय यातीत्यादित्यः, तथा च श्रुत्यन्तरे निर्वचनं 'यदिदं सर्वमाददाना यन्ति तस्मादादित्याः' (बृहदा० अ० ५) इति। तथा च भौमानां रसानामुत्तरायणे आदानं ग्रहणं कुर्वन् दक्षिणायने वृष्टिरूपेण तान् रसान् आ समन्ताद्ददच्च परिभ्रमन् यदादित्यशब्देन निरुच्यते एतदेव सत्यधर्मत्वमेष आदित्य एव सत्यधर्म इत्यर्थः। तदादित्यात्मत्वं शुक्लं शुद्धं भास्वरमिति वा. पुरुषं पुरुषाकारं 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' (छान्दो० अ० १) इति श्रुतेः। अलिङ्गं स्वतोलिङ्गवर्जितं स्त्रीपुन्नपुंसकादिभेदरहितं 'नैव स्त्री न पुमानेष न चैवायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स युज्यते' (श्वे० अ० ५) इति श्रुतेः। इदानीं विष्णुत्वमस्योपपादयति, नभस इत्यादिना। नभसोऽन्तर्गतस्य दिङ्मण्डलव्यापिनस्तेजसः प्रकाशस्यांशमात्रं लेशमात्रमेतद्यदादित्यस्य मध्य इवादित्यमण्डलस्थमिव न तु तत् तत्रैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्ये अमृतं यस्य हि सोमः प्राणा वा अप्यथ-ङ्कुरा एतद्ब्रह्मैतदमृतमेतद्भर्ग एतत् सत्यधर्मो नभसोऽन्तर्गतस्य तेजसोंऽशमात्रमेतद्यदादित्यस्य मध्ये यजु-

---

वर्तते किन्तु सर्वव्यापीत्यर्थः, इति एवम्प्रकारेण अचिणि सर्व-प्राणिचक्षुर्देशे अग्नौ च प्रसिद्धेऽस्यैव तेजसोऽंशमात्रमित्यर्थः। किं तत्तेजः, एतद्ब्रह्म परिपूर्णं, अत एवैतदमृतमनागमापायि नित्यमिति यावत्। एतदेव भर्गः सर्वकारणत्वादिरूपं पूर्वं व्याख्यातम्। तेजस्तेजस्विनामहमिति भगवद्वचनात् सर्वत्रव्यापि तेजोरूपं ब्रह्मामृतं विष्णुरित्युक्तं भवति। इदानीमुक्तमेव स्वरूपमनूद्य तस्य सर्वात्मत्वमाविष्कुर्वती ध्येयविशेषमर्यादुपदिशति, एतत् सत्यधर्म इत्यादिना। किं तत्सत्यधर्मपदाभिधेयं तदाह, यदादित्यस्य मध्ये अमृतमिति। किं तदमृतं तदाह, यस्येति। सोमश्चन्द्रमाः, प्राणाः प्राणिनां जीवनाख्याः प्राणादिवृत्तयः, वाशब्दात् प्राणस्थित्यर्थमन्नं गृह्यते, एते सर्वेऽप्यमृतरूपाः पदार्था यस्याङ्कुराः कार्याणि अमृताङ्कुरकारणत्वादमृतमित्यर्थः। अप्ययङ्कुरा इति यकारः प्रमादपतितः। एतद्ब्रह्मेत्याद्युक्तार्थम्। अमृतात्मत्वमुपपाद्यास्य पुनरपि यजुरात्मत्वमाहैतत् सत्यधर्म इति। यदादित्यस्य मध्ये यजुर्दीप्यति दीप्यते, किं तद्यजुरिति तदाहोमाप इति। ॐकारोऽनुज्ञापनात्, आप्यायनादापः, प्रकाशनाज्ज्योतिः, रसः सर्वकर्मपरि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दीप्यत्योमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।
अष्टपादं शुचि हंसं त्रिसूत्रमणुमव्ययं।
द्विधर्मोऽन्धं तेजसेन्धं सर्वं पश्यन् पश्यति॥

पाकनिर्वृत्तत्वादादित्यस्य रसत्वं सर्वकर्मफलाश्रय इत्यर्थः, अमृतं देवानां मोदनहेतुत्वात्, ब्रह्म भूर्भुवःस्वरोमिति त्रैलोक्यमोङ्कारार्थभूतमोङ्कारस्य सर्वमेतदेवेत्यर्थः। एतत् सर्वं छान्दोग्ये 'असौ वा आदित्यो देवमधु' इत्यत्र मधुविद्यायां स्पष्टमाम्नातं। अत्रैष श्लोकः अष्टपादमिति। अष्टौ दिशः पादा यस्य सोऽष्टपादस्तं। सविता ह्यन्तरिक्षस्थः पादैरिव दिग्भिः प्रतितिष्ठतीव विभाव्यते। यद्वा 'आरोगो भ्राजः पटरः पतङ्गः स्वर्णरो ज्योतिषीमा विभासः कश्यपोऽष्टमः स महामेरुं न जहाति' इति तैत्तिरीयारण्यकोक्ता आरोगादयोऽष्टौ पादा ज्ञेयाः। शुचि शुद्धमलेपकमित्येतत्। हंसं हन्ति गच्छतीति हंसः, परिभ्रमन्तमिति यावत्। अथ वा हंस इति सूर्यनाम 'हंसः शुचिषत्' इति, 'असौ वा आदित्यो हंसः शुचिषत्' इति ब्राह्मणदर्शनात्। त्रिसूत्रं त्रीणि सूत्राणि सूचकानि बन्धनानि वा यस्य स त्रिसूत्रस्तं, ऋग्यजुःसामभिर्हि प्रतिपाद्यते सविता त्रय्यात्मकमण्डलनिबद्धस्य। तथा च श्रुतिः 'सैषा त्रय्येव विद्या तपति' इति। अणुं सूक्ष्ममिन्द्रियागोचरं। अव्ययं शाश्वतं। द्विधर्मोऽन्धं द्वाभ्यां पुण्यपापाभ्यामन्धमनवभासमानं पुण्यपापरहितमित्यर्थः। धर्मोऽन्धमिति छान्दसः। तेजसेन्धं तेज-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नभसोऽन्तर्गतस्य तेजसो ऽंशमात्रमेतदादित्यस्य मध्ये उद्गुत्वा मयूखे भवत एतत् सवित् सत्यधर्म एतद्यजुरेतत् तप एतदग्निरेतद्वायुरेतत् प्राण एतदाप एतच्चन्द्रमा एतच्छुक्रमेतदमृतमेतद्ब्रह्मविषयमेतद्भानु-

---

सेद्धं दीप्तमतितेजस्विनमित्यर्थः। एवंविधमीश्वरं सवितारं पश्यन् सर्वं पश्यति तदात्मभावनां कुर्वन् सर्वज्ञो भवतीत्यर्थः। किं बहुनाऽयमेव सर्वात्मको नातःपरमस्तीति तं महीकर्तुं पुनरुपादत्ते नभसोऽन्तर्गतस्येति। किं तद्यदादित्यस्य मध्ये उदित्वोद्गम्य मयूखे अंशू भवतः प्रभवतः समर्थौ भवतः, जगत् प्रकाशयितुमित्यर्थः द्विवचनं प्राधान्याभिप्रायं। उद्गुत्वा मयूखे इति पाठे उत् उत्वा उद्गम्य मयूखे उत्प्रभवत इत्यन्वयः। उदयाचलमारूढे सवितरि ततः प्रथमं निर्गते मयूखे मण्डलमतिक्रम्य ब्रह्माण्डमण्डलमखिलमवभासयतो उच्चैः प्रसर्पत इत्यर्थः। यदेतन्मयूखद्वयं प्राधान्येनोक्तमेतत् सवित् सवितृरूप, सत्यधर्मः मयूखोपलक्षितं सवितृस्वरूपं सत्यधर्म इत्यर्थः। एतद्यजुरित्याद्यस्य महिमोपन्यासः स्पष्टार्थः। एतद् ब्रह्मविषयमिति ब्रह्म विषयो यस्मिन् तत् तथा ब्रह्मप्राप्तिद्वारमित्यर्थः। एतद्भानुरर्णव इत्येकं पदं तेजोराशिरित्यर्थः। यद्वा भानुः प्रकाशस्वभावोऽर्णवोऽर्णं उदकं वहति प्रापयति वृष्टिद्वारेणेत्यर्णव इत्यर्थः। तस्मिन्नर्णव एव यजमानाः कर्मि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रर्णवस्तस्मिन्नेव यजमानाः सैन्धव इव व्लीयन्त एषा वै ब्रह्मैकताच हि सर्वे कामाः समाहिता इत्यत्रोदाहरन्ति । अंशुधारय इवाणुवातेरितः संस्फुरत्यसावन्तर्गः सुराणां । यो हैवंवित् स सवित् स द्वैतवित्

णत्तदविरोधेनोपासकाश्च, सैन्धव इव सैन्धवखिल्य इवोदके निक्षिप्तः, लीयन्ते विलीयन्ते तदात्मतां गच्छन्तीत्यर्थः । यदेवमस्मिन् यजमानानां विलयनमेषा वै एषैव ब्रह्मैकता कार्यब्रह्मसायुज्यप्राप्तिरेवोपासनाफलं न परब्रह्मसायुज्यमित्यभिप्रायः । तत्र हेतुरच हि यस्मात् सर्वे कामाः काम्यमाना विषयाः समाहिताः स्थिताः सन्तीत्यर्थः । कार्यब्रह्मलोके हि सङ्कल्पमात्रसिद्धाः पित्रादिलक्षणाः कामाः श्रूयन्ते 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते' (छान्दो० अ० ८) इत्यादौ । इतिशब्दो महिमोपवर्णनसमाप्त्यर्थः । अत्रोक्तफले उदाहरन्ति ऋषय इत्यर्थः । "अंशुधारय ० कृष्णवर्त्मनः" इति । असौ सवितारमीशं प्रविष्टो मुक्तो यजमानः सुराणां सर्वेषां देवानामन्तर्गोऽन्तर्गतः संस्फुरति सर्वदेवतात्मा भवति, क इवेत्युच्यते, अणुवातेरितोऽल्पवायुना प्रेरितोऽंशुधारय इव अंशून् धारयतीत्यंशुधारः, अंशुधार एवांशुधारयः प्रदीपः । धर्ता च विधर्ता च विधारय इतिवत् प्रयोगः । यो हैवंवित् स सवित्, विदा ज्ञानेन सह वर्तत इति सवित् विद्वानित्यर्थः । स द्वैतवित् द्वैतं परापर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सैकधामेतः स्यात् तदात्मकश्च। ये बिन्दव इवाभ्युच्चरन्त्यजस्रं विद्युदिवाभ्रार्चिषः परमे व्योमन्। तेऽर्चिषो वै यशस आश्रयवशाज्जटाभिरूपा इव कृष्णवर्त्मनः ॥ ३५ ॥

ब्रह्मभेदं वेत्तीति द्वैतवित्। यद्वा जीवानां द्वैतं भेदतत्त्वं वेत्तीति द्वैतवित्। स विद्वानेकधाम एकं मुख्यं धाम इतः प्राप्तः स्यात् भवेत्। यस्य धाम प्राप्नोति तदात्मकश्च तत्स्वरूपश्च भवेत् ब्रह्मैव क्रमेण स भवतीत्यर्थः। द्वैतवित्त्वं प्रपञ्चयति, ये बिन्दव इवेति। ये महासमुद्राद्बिन्दव इव वायूद्भूताः परमात्मनः सकाशादविद्याकार्योद्भूता अजस्रं पुनः पुनर्जागरितादावभ्युच्चरन्ति पृथगुत्तिष्ठन्ति, तेऽर्चिषो वै इत्युत्तरेणान्वयः। पृथग्भावावभासमात्रांशे दृष्टान्तमुक्त्वा पृथग्भूतस्यैव सतः पृथक्परिच्छेदप्रतिभासे दृष्टान्तमाह, विद्युदिवाभ्रार्चिषः परमे व्योमन् इति। परमे व्योम्नि महाकाशे यथाऽभ्रार्चिषोऽभ्रान्तर्गतस्याखण्डस्यार्चिषो विद्युद् विद्युदाकारावभासः, तथा ते जीवात्मानो यशसः परमात्मनः, 'तस्य नाम महद्यशः' इति श्रुतेर्यशः परमात्मा, तस्य यदर्चिश्चैतन्यप्रकाशस्तस्य वै आश्रयवशाच्चैतन्याभासखचितत्वात् तत्प्रतिबिम्बाधारत्वाद्वा अविद्याकार्यदेहद्वयरूपा विविक्ता जीवा इति व्यपदिश्यन्त इति योज्यं। यथा कृष्णवर्त्मनोऽग्नेरभिरूपा जटा ज्वाला स्फुलिङ्गाः प्रकाशाश्रय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वे वाव खल्वेते ब्रह्मज्योतिषो रूपके शान्तमेकं समृद्धञ्चैकमथ यच्छान्तं तस्याधारं खमथ यत् समृद्ध-मिदं तस्यान्नं तस्मान्मन्त्रौषधाज्यामिषपुरोडाशस्था-लीपाकादिभिर्यष्टव्यमन्तर्वेद्यामास्न्यवसृष्टैरन्नपानैश्चा-

---

त्वादनेकाग्नित्वमापद्यन्ते स्फुलिङ्गादिव्यपदेशभेदश्च तथेत्यर्थः॥ ॥ ३५ ॥

जीवद्वैततत्त्वमेवमाविष्कृत्य जीवेश्वरद्वैतमाविष्करोति "द्वे वाव ० अत्रोदाहरन्ति" इति। ब्रह्मज्योतिषो ब्रह्मात्मकस्य चित्प्रकाशस्य द्वे वाव खलु रूपके ज्ञापके, एकं शान्तं समृद्धं चैकं। ते एवाश्रयभेदनिर्देशेन विभजते। अथ तयोर्मध्ये यच्छान्तं तस्य खमाकाशं आधारमाश्रयः, क्लैव्यं छान्दसं, खे व्याप्य व्यवस्थितोऽखण्डप्रकाशः। शान्तं रूपकमीश्वरस्याभोक्तुः स्वरूपज्ञापक-मित्यर्थः। अथ यत् समृद्धं तस्येदमन्नमाधार इत्यनुवर्तते, अन्ने भोक्तृत्वेन व्यवस्थितं ब्रह्मजोतिस्तस्य जीवत्वज्ञापकं, भोक्ता जीव इत्यर्थः। तथा च मन्त्रः 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (ऋग्० मं० १। सू० १६४) इति। विभाग-निर्देशप्रयोजनमाह, तस्मादिति। यस्मादेवं ब्रह्मैव जीवेश्वररूपेण विभक्तं वर्तते तस्मान्मन्त्रौषधाज्यादिभिर्मन्त्रोपबृंहितैरोषधादिभिर्द्र-विभिरन्तर्वेद्यां त्रेताविहितायां गृह्योक्तायामपि स्थण्डिलादि-

---

* यत्र् शान्तमिति लिखितपूर्वमस्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यमाहवनीयमिति मत्वा तेजसः सम्मृद्धौ पुण्यलोक-
विजित्यर्थायामृतत्वाय चाचोदाहरन्ति। अग्निहोत्रं
जुहुयात् स्वर्गकामो यमराज्यमग्निष्टोमेनाभिजयति*

रूपायां यष्टव्यमीश्वरात्मकब्रह्मयजनं कर्तव्यमित्यर्थः। औषधं
चरुधानादि, आमिषं पश्वङ्गावदानं, पुरोडाशो मन्त्रसंस्कृतः
पिष्टपाकविशेषः। स्थालीपाकः स्मार्तश्चरुः। आदिश-
पयःसोमादि गृह्यते। तथा जीवरूपब्रह्मयजनम्...न्यिनुष्ठेयानि
मित्यभिप्रेत्याह, आज्यवशिष्टैरिति। अवशिष्टैर...माहात्म्यं प्रपञ्चयति
ज्ञाद्यवशिष्टैः स्वभोजनलेन पश्वादिविहितै...दुक्तानि कर्माण्यभीष्ट-
आस्ये यष्टव्यमिति पूर्वेणान्वयः। ...रलायोमित्यनेन मन्त्रेण आदा-
रूपब्रह्मयजनं क्रियते तद...आसीत तात्पर्येणानुतिष्ठेदित्यर्थः।
ऽस्मिन्नाहवनीयेऽग्नौ प्रत्य...
मयेति चिन्तयन्...न्त्युदाहृत्य यज्ञदानतपःक्रियाः।
तेजस इति।...ते विधानोक्ताः सततं ब्रह्मवादिनां'॥ इति।
मास्याहवनी...रमितं तेजोऽस्येति शेषः। अस्योङ्कारस्य तेजः प्रभावो
ऽन...त्यर्थः। ब्रह्मरूपत्वात् तस्येति भावः। तत् तेजस्त्रेधाऽभि-
हितं अभितो हितं निहितं कथितमिति वा। अग्नौ होमाद्या-
धारतया कर्मनिर्वर्तके, आदित्ये देवतात्मनि, प्राणे च कर्मफल-
भोक्तरि यजमाने चेति त्रेधा विहितमित्यर्थः। एतत्कथनोप-
योगमाहाऽथैषेति। अथैवं सति एषा शास्त्रसिद्धा नाडी द्वाररूपा
अन्नं बहुलयतीत्यन्वयः, प्रथमार्थे द्वितीया, इत्येवंविधेषा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5095

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1269.

शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ:

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY

PRATAPACANDRA GHOṢA

PART I. FAS. XV.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET.

1911.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London, W.*, AND MR. OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	As.
...3 @ /10/ each ...	Rs. 1	14
Advaitachintā Kaustubha, Fasc. 1-3 @ ... Vol. II, Fasc. 1-5; Vol.		
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; ...	14	6
III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ...	2	0
Aitareyalocana ...	2	8
*Anu Bhāshya, Fasc. 2-5 @ /10/ each ...	3	12
Aṣtasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ...	0	10
Ātmatattvaviveka, Fasc. I ...	3	2
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...		
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-8. Vol. ...	16	0
II, Fasc. 1-8 @ 1/ each ...	1	14
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol. II, Fasc. 1, @ /10/ each ...	3	12
Baudhāyana Srauta Sūtra, Fasc. 1-3; Vol. II, Fasc. 1-3 @ /10/ each	4	6
Bhāṭṭa Dīpikā, Vol. I, Fasc. 1-6; Vol. II, Fasc. 1, @ /10/ each ...	2	0
Bauddhastotrasangraha ...	2	8
Bṛhaddevatā, Fasc. 1-4 @ /10/ each ...	3	12
Bṛhaddharma Purāṇa, Fasc. 1-6 @ /10/ each ...	3	2
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each ...	1	14
Çri Cantinatha Charita, Fasc. 1-3 ...	1	4
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ...	8	0
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 Vol. ...	14	6
III, Fasc. 1-7; Vol. V, Fasc. 1-4 @ /10/ each ...	3	2
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each ...	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/ ...	8	12
Çatasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-14 @ /10/ each ...		
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III, Part I,		
Fasc. 1-18, Part II, Fasc. 1-10; Vol. IV, Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each ...	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/ ...	1	4
Çlokavartika, (English), Fasc. 1-7 @ 1/4/ each ...	8	12
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc. 1-7; Vol. II, Fasc. 1-4;		
Vol. III, Fasc. 1-4; Vol. 4, Fasc. 1 @ /10/ each ...	10	0
	1	14
Çrī Bhāshyam, Fasc. 1-3 @ /10/ each ...	1	4
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each ...	4	6
Gadadhara Paddhati Kālasāra, Vol. 1, Fasc. 1-7 @ /10/ each ...	3	2
Ditto Ācārasāra, Vol. II, Fasc. 1-4 ...	3	2
Gobhilīya Gṛhya Sūtra, Vol. I. @ /10/ each ...	2	8
Ditto Vol. II, Fasc. 1-2 @ 1/4 /each ...	2	0
Ditto (Appendix) Gobhila Parisista ...	0	10
Ditto Grihya Sangraha ...	1	14
Haralata ...	1	4
Karmapradiph, Fasc. 1 ...	4	6
Kāla Viveka, Fasc. 1-7 @ /10/ each ...	4	8
Kātantra, Fasc. 1-6 @ /12/ each ...	17	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ...	6	14
Madana Pārijāta, Fasc. 1-11 @ /10/ each ...		
Mahā-bhāsya-pradīpodyota, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12; ...	19	6
Vol. III, Fasc. 1-10 @ /10/ each ...	1	4
Ditto Vol. IV, Fasc. 1 @ 1/4 ...	1	14
Manuṭīkā Saṅgraha, Fasc. 1-3 @ /10/ eac...	9	0
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9...	6	4
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ ...	3	2
Nyāyavārtika, Fasc. 2-6 @ /10/ each ...	4	6
Nityācārapaddhati, Fasc. 1-7 @ /10/ eac...		

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

State Museum Lucknow 5095

सोऽस्मिन् त्रिसाहस्रमहासाहस्र लोकधातौ यो नैरयिकोऽग्नि-स्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा नैरयिकाः सत्त्वास्तं बुद्धशब्दसुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौ-मनस्येन ततो निरयेभ्यो व्युत्तिष्ठान्तो। ते च ततो निरयेभ्यो व्युत्थाय यत्र यत्र लोकधातुषु बुद्धाभगवन्तस्तिष्ठन्ति भ्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। ते तत्र तत्रोपपद्यन्ते। सोऽस्मिं स्त्रिसाहस्रमहासाहस्रे लोकधातौ तिर्य्यग्योनिकानां सत्त्वानां तिर्य्यग्योनिदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तैर्य्यग्यो-निकः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततस्तिर्य्यग्योनिभ्यो व्युत्तिष्ठन्ते। ते ततस्ति-र्य्यग्योनेर्व्युत्थाय यत्र यत्र बुद्धक्षेत्रे बुद्धाभगवन्तस्तिष्ठन्ति भ्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। ततोऽस्मिं स्त्रिसाहस्रमहासाहस्रे लोकधातौ यामलौकिकानां सत्त्वानां यमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति। शब्दमुदीरयति। घोषमनुश्रावयति। ततो यामलौकिकाः सत्त्वास्तच्च बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततो यमलोकाद्व्युत्तिष्ठन्ते। ततो यमलोकाद्व्यु-त्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति भ्रियन्ते याप-यन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स पूर्व्वस्यां दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु योनैरयिकोऽग्निस्कन्धस्तं सर्व्वं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। ते तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति तत्र तत्रोपपद्यन्ते। स दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ते ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति। धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सपश्चिमायां दिशिगङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स उत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिलभन्ते । तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते । ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति । तत्र तत्रोपपद्यन्ते । सदक्षिणं पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्यं नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति घोषमनुश्रावयति । तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते । तेन सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते । ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति । धर्म्मञ्च देशयन्ति । तत्र तत्रोपपद्यन्ते । सदक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति । घोषमनुश्रावयति । तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते । तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते । ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति । धर्म्मञ्च देशयन्ति । तत्र तत्रोपपद्यन्ते । सपश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति । घोषमनुश्रावयति । तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते । ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति । धर्म्मञ्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देशयन्ति तत्र तत्रोपपद्यन्ते। स पूर्व्वोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सोऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु यो नैरयिकोऽग्निस्कन्धस्तं सर्व्वं निर्व्वाप्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते नैरयिकाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन ततो नरकेभ्यो व्युत्तिष्ठन्ते। ततो नरकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते।

स पूर्व्वस्याम्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनि यमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनि यमलोकोपपन्नां सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनि यमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनि यमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्तिष्ठन्ते। तेभ्यस्तिर्य्यग्योनि यमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रे बुद्धाभगवन्ततिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स पश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो। व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते याप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स उत्तरस्या-न्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनि लोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागताायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नां सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन च सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्ना सत्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्युत्तिष्ठन्ते ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धचेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्ययोनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। ते तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धचेत्रेषु बुद्धाभगन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। सोऽधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धक्षेत्रेषु बुद्धाभगवन्तस्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्म्मञ्च देशयन्ति। तत्र तत्रोपपद्यन्ते। स उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु तिर्य्यग्योनियमलोकोपपन्नानां सत्त्वानां तिर्य्यग्योनियमलोकदुःखं प्रशमय्य नमस्तस्मै तथागतायार्हते सम्यक् सम्बुद्धायेति शब्दमुदीरयति। घोषमनुश्रावयति। तदा ते तिर्य्यग्योनियमलोकोपपन्नाः सत्त्वास्तं बुद्धशब्दं श्रुत्वा सुखसौमनस्यं प्रतिलभन्ते। तेन सुखसौमनस्येन तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्तिष्ठन्ते। तेभ्यस्तिर्य्यग्योनियमलोकेभ्यो व्युत्थाय यत्र यत्र बुद्धाभगवन्तस्तिष्ठन्ते ध्रियन्ते यापयन्ति। तत्र तत्रोपपद्यन्ते।

तद्यथापि नाम सुभूते दक्षोमायाकारोमायाकारान्तेवासी वा चतुर्महापथे महतोजननिकारस्य पुरतो नरकास्तिर्य्यग्योनियमलोकांश्चाभिनिर्माय तेषां मायिकानां सत्त्वानां बुद्धशब्दमुद्घोषयेद्धर्म्मशब्दमुद्घोषयेत्संघशब्दमुद्घोषयेदत्र तेऽभिनिर्म्मितास्तेन बुद्धशब्देन धर्म्मशब्देन संघशब्देन ततो नरकेभ्यस्तिर्य्यग्योनियमलोकेभ्योव्युत्तिष्ठेरं स्तत्किं मन्यसे सुभूतेऽपि नुतेन मायाकारेण मायाकारान्तेवासिना वा कश्चित्सत्त्वो नरकेभ्यस्तिर्य्यग्योनियमलोकाद्व्युत्थितो भवेत्। आह नोहीदं भगवन्। भगवानाह। एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेन दशसु दिक्षु अप्रमेयासंख्येयेषु लोकधातुषु सत्त्वास्तिर्य्यग्योनिभ्यो दुर्गतिभ्यः परिमोचेरन् नरकादिसत्त्वः परिमोचितो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवति। तत्कस्य हेतोः। धर्म्मतैषा सुभूते धर्म्मानामाया धर्म्मतामुपादाय। एक खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो दानपारमितायां स्थित्वा महासत्त्वाह सहस्त्रिसाहस्र महासाहस्र लोकधातुं वैदूर्य्यमयमभिनिर्मिमीते वैदूर्य्यमयमभिनिर्म्माय चक्रवर्त्तिव्युहमभिनिर्मिमीते। चक्रवर्त्ति व्यूहमभिनिर्माय अन्नमन्नार्थिकेभ्यो ददाति। पानं पानार्थिकेभ्यो ददाति। यानं यानार्थिकेभ्यो ददाति। वस्त्रं वस्त्रार्थिकेभ्यो ददाति। पुष्पं पुष्पार्थिकेभ्यो ददाति। माल्यं माल्यार्थिकेभ्यो ददाति। गन्धं गन्धार्थिकेभ्यो ददाति। विलेपनं विलेपनार्थिकेभ्यो ददाति। शयनमासनं शयनासनार्थिकेभ्यो ददाति। उपाश्रयमुपाश्रयार्थिकेभ्यो ददाति। प्राजीविकं प्राजीविकार्थिकेभ्यो ददाति। उपकरनमुपकरनार्थिकेभ्यो ददाति। ग्लानप्रत्ययभैषज्यपरिष्कारं ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यो ददाति। मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपार्थिकेभ्यो मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपाणि ददाति। यावदन्यतरान्यतरान् मानुष्यकान् परिष्कारान् ददाति। सोऽन्नमन्नार्थिकेभ्यो दत्त्वा पानं पानार्थिकेभ्यो दत्त्वा यानं यानार्थिकेभ्यो दत्त्वा वस्त्रं वस्त्रार्थिकेभ्यः पुष्पं पुष्पार्थिकेभ्यः। माल्यं माल्यार्थिकेभ्यः गन्धं गन्धार्थिकेभ्यः विलेपनं विलेपनार्थिकेभ्यः शयनमासनं शयनासनार्थिकेभ्यः उपाश्रयमुपाश्रयार्थिकेभ्यः प्राजीविकं प्राजीबिकार्थिकेभ्यः उपकरनमुपकरनार्थिकेभ्यः ग्लानप्रत्ययभैषज्यपरिष्कारं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यः मणिमुक्तावैदूर्य्यशङ्खशिला-प्रवालरजतजातरूपाणि मुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरू-पार्थिकेभ्यः दत्त्वा यावदन्यतराऽन्यतरान् मानुष्यकान् परिष्कारान् दत्त्वातेभ्यः सत्त्वेभ्योधर्म्मं देशयति। यदुतेमामेव षट् पारमिताप्रति-संयुक्तं धर्म्मदेशनां। ते च खलु पुनः सत्त्वास्तां धर्म्मदेशनां श्रुत्वा न जातुषड्भिः पारमिताभिर्व्विरहितो भवति। यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

तद्यथापि नाम सुभूते दक्षोमायाकारोमायाकारान्तेवासीवा चतुर्महापथे महतोजननिकायस्याग्रेमहान्तं जननिकायमभिनिर्मा-यान्नमन्नार्थिकेभ्यो दद्यात्पानं पानार्थिकेभ्यो दद्यात् वस्त्रं वस्त्रार्थि-केभ्यो दद्यात् पुष्पं पुष्पार्थिकेभ्यो दद्यात् माल्यं माल्यार्थिकेभ्यो दद्यात् गन्धं गन्धार्थिकेभ्यो दद्यात् विलेपनं विलेपनार्थिकेभ्यो दद्यात् शयनमासनं शयनासनार्थिकेभ्यो दद्यात् उपाश्रयमुपा-श्रयार्थिकेभ्यो दद्यात् प्राजीविकं प्राजीविकार्थिकेभ्यो दद्यात् उप-करणमुपकरणार्थिकेभ्यो दद्यात् ग्लानप्रत्ययभैषज्यपरिष्कारान् ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यो दद्यात् मणिमुक्तावैदूर्य्यशङ्ख-शिलाप्रवाड़रजतजातरूपाणि मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजत-जातरूपार्थिकेभ्यो दद्यात् यावदन्यतरान्यतरान् मानुष्यकान् परि-ष्कारान् दद्यात्। तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण मायाकारान्तेवासिनावाकस्मैचित्सत्त्वाय किञ्चिद्दत्तं भवेत्। आह नो हीदं भगवन्। भगवानाह। एवमेव सुभूते बोधिसत्त्वेन महा-सत्त्वेन यावच्चक्रवर्त्तिव्यूहमभिनिर्म्मायान्नमन्नार्थिकेभ्यो ददता पानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पानार्थिकेभ्यो ददता यानं यानार्थिकेभ्यो ददता वस्त्रं वस्त्रार्थिकेभ्यो ददता पुष्पं पुष्पार्थिकेभ्यो ददता माल्यं माल्यार्थिकेभ्यो ददता गन्धं गन्धार्थिकेभ्यो ददता विलेपनं विलेपनार्थिकेभ्यो ददता शयनासनं शयनासनार्थिकेभ्यो ददता उपाश्रयमुपाश्रयार्थिकेभ्यो ददता आजीविकं आजीविकार्थिकेभ्यो ददता उपकरणमुपकरणार्थिकेभ्यो ददता ग्लानप्रत्ययभैषज्यपरिष्कारान् ग्लानप्रत्ययभैषज्यपरिष्कारार्थिकेभ्यो ददता मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपाणि मणिमुक्तावैदूर्य्यशङ्खशिलाप्रवालरजतजातरूपार्थिकेभ्यो ददता यावदन्यतरान्यतरान् मानुष्यकान् परिष्कारान् ददता न कस्मैचित्सत्वाय किञ्चिद्दत्तं भवति। तत्कस्य हेतोः धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मतामुपादाय। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाऽसन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः शीलपारमितायां स्थित्वा सञ्चिन्त्योपपत्तिपरिग्रहेण चक्रवर्त्तिकुले प्रत्याजायते। स तत्र चक्रवर्त्तिस्वर्य्येस्थित्वा सत्त्वान् दशकुशलेषु कर्म्मपथेषु प्रतिष्ठापयति। स चतुर्षुध्यानेष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु पञ्चस्वभिज्ञासु चतुर्षुस्मृत्युपस्थानेषु चतुर्षु सम्यक् प्रहाणेषु चतुर्षुबुद्धपादेषु पञ्चस्विन्द्रियेषु पञ्चसुबलेषु सप्तसुबोध्यङ्गेषु। आर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताप्रणिहितविमोक्षसुखेषु नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्त्वेषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशसु तथागतबलेषु चतुर्षुवैशारद्येषु चतसृषु प्रतिसम्वित्सु महामैत्र्यां महाकरुणायां अष्टादशावेणिकबुद्धधर्म्मेषु प्रतिष्ठापयति। ते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्वा न जातु विरहितो भवति तथा धर्म्मदेशनया यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

तद्यथापिनाम सुभूते दक्षोमायाकारोमायाकारान्तेवासीवा-चतुःपथे महतो जननिकायस्य पुरतोमहान्तं जननिकायमभिनिर्म्माय सत्त्वान् दशकुशलेषु कर्म्मपथेषु प्रतिष्ठापयेत्। चतुर्षुध्यानेषु चतुर्ष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु। पञ्चस्वभिज्ञासु चतुर्षु स्मृत्युपस्थानेषु चतर्षु सम्यक् प्रहाणेषु चतुर्ष्वृद्धिपादेषु पञ्चेन्द्रियेषु पञ्चसु वलेषु सप्तसु बोध्यङ्गेषु आर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्येषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशसु तथागतवलेषु चतुर्षु वैशारद्येषु चतसृषु प्रतिसम्वित्सु महामैत्र्यां महाकरुणायां अष्टादशस्वावेणिकबुद्धधर्म्मेषु प्रतिष्ठापयेत्। तत् किं मन्यसे सुभूतेऽपि गतेन मायाकारेण मायाकारान्तेवासिनाकश्चित्सत्त्वोदशकुशलेषु कर्मपथेषु प्रतिष्ठापितोभवेत्। चतुर्षुध्यानेषु चतुर्ष्वप्रमाणेषु चतसृष्वारूप्यसमापत्तिषु पञ्चस्वभिज्ञासु चतुर्षुस्मृत्युपस्थानेषु चतुर्षु सम्यक् प्रहाणेषु चतुर्ष्वृद्धिपादेषु पञ्चस्विन्द्रियेषु पञ्चसुवलेषु सप्तबोध्यङ्गेषु अर्य्याष्टाङ्गमार्गे शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु। नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्ष्वार्य्यसत्येषु सर्व्वसमाधिषु सर्व्वधारणीमुखेषु दशतथागतवलेषु चतुर्षु वैशारद्येषु चतसृषु प्रतिसम्वित्सु महामैत्र्यां महाकरुणायां अष्टादशावेणिकबुद्धधर्म्मेषु प्रतिष्ठापितो भवति। आह। नोहीदं भगवन्। एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेनाप्रमेयासंख्येयानपि सत्त्वान् दशकुशलेषु कर्म्मपथेषु प्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्ठाप्य चतुर्षु ध्यानेषु चतुर्ष्वप्रमाणेषु चतसृष्वारूप्य समापत्तिषु पञ्चस्वभिज्ञासु चतुर्षु स्मृत्युपस्थानेषु चतुर्षु सम्यक् प्रहाणेषु चतुर्ष्वृद्धिपादेषु पञ्चस्विन्द्रियेषु पञ्चसु बलेषु सप्तसुबोध्यङ्गेषु आर्य्याष्टाङ्ग-मार्गे शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखेषु अष्टासु विमोक्षेषु नवस्वनुपूर्व्वविहारसमापत्तिषु चतुर्व्वार्य्यसत्येषु सर्व्वसमाधिषु सर्व्व-धारणीमुखेषु दशसु तथागतबलेषु चतुर्षु वैशारद्येषु चतसृषु प्रतिसम्वित्सु महामैत्र्यां महाकरुणायां अष्टादशावेणिकबुद्धधर्म्मेषु न कश्चित् सत्त्वः प्रतिष्ठापितो भवति । तत्कस्य हेतोः । धर्म्मतैषासुभूते धर्म्माणां मायाधर्म्मतामुपादाय । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहं सन्नद्ध इत्युच्यते ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः क्षान्तिपारमितायां स्थित्वा सर्व्वसत्त्वान् क्षान्तिपारमितायां नियोजयति प्रतिष्ठापयति । कथञ्च सुभूते बोधिसत्त्वो महासत्त्वः क्षान्तिपारमितायां स्थित्वा सर्व्वसत्त्वान् क्षान्तिपारमितायां नियोजयति प्रतिष्ठापयति । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रथमचित्तोत्पादमुपादायैव सन्नाहं सन्नह्यति । स चेत् सर्व्वसत्त्वा मे लोष्टदण्डशस्त्रप्रहारान् दद्युस्तत्र मयैकमपि क्षोभसहगतं चित्तं नोत्पादयितव्यं । सर्व्वसत्त्वांश्चैवं रूपायां क्षान्तौ प्रतिष्ठापयति ।

तद्यथापि नाम सुभूते दक्षोमायाकारो मायाकारान्तेवासी वा चतुर्महापथे महतो जननिकायस्य पुरतो महान्तं जननिकाय-मभिनिर्माय क्षान्तिपारमितायां नियोजयेत् प्रतिष्ठापयेत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण मायाकारान्तेवासिना वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कश्चित् सत्त्वः क्षान्तिपारमितायां प्रतिष्ठापितो भवेत् आह । नोहीदं भगवन् । भगवानाह । एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेनाप्रमेयाऽसंख्येयान् सत्त्वान् क्षान्तिपारमितायां प्रतिष्ठाप्य न कश्चित्सत्त्वः क्षान्तिपारमितायां प्रतिष्ठापितो भवति । तत्कस्य हेतोः । धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मतामुपादाय ।

एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते । पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो वीर्य्यपारमितायां स्थित्वा सत्त्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । कथञ्च सुभूते बोधिसत्त्वो महासत्त्वो वीर्य्यपारमितायां स्थित्वा सर्व्वसत्त्वान् वीर्य्यपारमितायां समादापयति । निवेशयति प्रतिष्ठापयति । इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्ते न चित्तोत्पादेन सर्व्वसत्त्वान् कायिकचेतसिक वीर्य्ये समादापयति निवेशयति प्रतिष्ठापयति । तद्यथापि नाम सुभूते दक्षोमायाकारो मायाकारान्तेवासी वा चतुर्महापथे-महतो जननिकायस्य पुरतो महान्तं जननिकायमभिनिर्म्माय कायिकचेतसिकवीर्य्ये प्रतिष्ठापयेत् तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण वा मायाकारान्ते वासिना वा चतुर्महापथे महतोजननिकायस्य पुरतो महान्ते जननिकायमभिनिर्ममे कायिकचेतसिकवीर्य्यप्रतिष्ठापयेत् । तत् किं मन्यसे सुभूतेऽपि-नु तेन मायाकारेण वा मायाकारान्तेवासिना वा कश्चित् सत्त्वः कायिकचेतसिकवीर्य्यप्रतिष्ठापितो भवेत् । आह । नो हीदं भगवन् । एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेनाऽप्रमेयाऽसंख्येयान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वान् कायिकचैतसिकवीर्य्ये प्रतिष्ठाप्य न कश्चित् सत्त्वः कायिकचैतसिकवीर्य्ये प्रतिष्ठापितो भवति। तत्कस्य हेतोः धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मतामुपादाय। एवं खलु बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो ध्यानपारमितायां स्थित्वा सर्व्वसत्त्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। कथञ्च सुभूते बोधिसत्त्वो महासत्त्वो ध्यानपारमितायां स्थित्वा सर्व्वसत्त्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वधर्म्मसमतायां स्थित्वा यत्र कस्यचिद्धर्म्मस्य विक्षेपं वा समनुपश्यत्येवं ध्यानपारमितायां स्थितो भवति। स तथैव सत्त्वान् ध्यानपारमितायां समादापयति। निवेशयति। प्रतिष्ठापयति। ते च समादापिता न जातुविरहिता भवन्ति ध्यानपारमितायाः यावदनुत्तरां सम्यक् सम्बोधेमभिसम्बुध्यते। तद्यथापि नाम सुभूते दक्षोमायाकारोमायाकारान्तेवासी वा चतुर्महापथे महतोजननिकायस्य पुरतो महान्तं जननिकायमभिनिर्म्माय ध्यानपारमितायां प्रतिष्ठापयति। तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण वा मायाकारान्तेवासिना वा कश्चित्सत्त्वो ध्यानपारमितायां प्रतिष्ठापितो भवेत्। आह। नोहीदं भगवन्। भगवानाह। एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वान् ध्यानपारमितायां प्रतिष्ठाप्य न कश्चित्सत्त्वो ध्यानपारमितायां प्रतिष्ठापितो भवति। तत्कस्य हेतोः। धर्म्मतैषा सुभूते धर्म्माणां माया धर्म्मतामुपा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दाय। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां स्थित्वा सर्व्वसत्त्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। कथञ्च सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां स्थित्वा सर्व्वसत्त्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। आह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरन् यत् कस्यचिद्धर्म्मस्योत्पादं वा निरोधं वा संक्लेशं वा व्यवदानं वा आरं वा पारं वोपलभते। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां स्थितो भवति। स तथैव सर्व्वसत्त्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। तद्यथापि नाम सुभूते दक्षोमायाकारो मायाकारान्तेवासी वा चतुर्महापथे महतोजननिकायस्य पुरतो महान्तं जननिकायमभिनिर्माय प्रज्ञापारमितायां समादापयेत् निवेशयेत् प्रतिष्ठापयेत्। तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण वा मायाकारान्तेवासिना वा कश्चित् सत्त्वः प्रज्ञापारमितायां समादापितो निवेशितः प्रतिष्ठापितो भवेत्। आह। नोहीदं भगवन्। भगवानाह। एवमेव सुभूते बोधिसत्त्वेन महासत्त्वेन सर्व्वसत्त्वान् प्रज्ञापारमितायां प्रतिष्ठाप्य न कश्चित् सत्त्वः प्रज्ञापारमितायां प्रतिष्ठापितो भवेत्। तत्कस्य हेतोः धर्म्मतैषासुभूते धर्म्माणां मायाधर्म्मतामुपादाय। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाह सन्नद्ध इत्युच्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहं सन्नह्य पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मनादानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति। निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यदुत या एव षट्पारमितास्ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहितो भवति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु गत्वा यथैवात्मनादानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मनाक्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्य-पारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। धर्म्मं देशयति यदुते या एव षट्पार-मिताः। ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

पश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मनादानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादा-पयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्ति-पारमितायां समादापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपार-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। धर्म्मं देशयति यदुते या एव षट्पारमिताः। ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ति।

उत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति। निवेशयति प्रतिष्ठापयति। धर्म्मञ्च देशयति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदुत या एव षट्पारमिताः । ते सत्त्वास्तं धर्म्मं श्रुत्वा नजातु-विरहिता भवन्ति । षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मनादानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना शीलपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना क्षान्तिपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति । धर्म्मञ्च देशयति यदुत या एव षट्-पारमिताः । ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिपारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति । तथैव तत्र लोक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना शीलपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना क्षान्तिपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना वीर्य्यपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना ध्यानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना प्रज्ञापारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति । धर्म्मञ्च देशयति । यदुत या एव षट्पारमिताः । ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभि र्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना शीलपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना क्षान्तिपारमितायां तिष्ठति ।

5095

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादायति निवेशति प्रतिष्ठापयति यथैवात्मना प्रज्ञापारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति। धर्म्मञ्च देशयति यदुत या एव षट्-पारमिताः। ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते।

उत्तरपूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशति प्रतिष्ठापयति। यथैवात्मना शीलपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना क्षान्तिपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्ति-पारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति। यथैवात्मना ध्यानपार-मितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना प्रज्ञापारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वान् सर्व्वान् प्रज्ञापारमितायां समादापयति । निवेशयति प्रतिष्ठापयति । धर्म्मञ्च देशयति यदुते या एव षट्पारमिताः ते सत्त्वास्तान् धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिर्यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

अधस्ताद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना शीलपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना क्षान्तिपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् क्षान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना वीर्य्यपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति। यथैवात्मना ध्यानपारमितायां तिष्ठति। तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना प्रज्ञापारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति । धर्म्मञ्च देशयति यदुते या एव षट्पारमिताः । ते सत्त्वास्तान् धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षड्भिः पारमिताभिः । यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

उपरिष्टाद्दिशि गङ्गानदीवालुकोपमान् लोकधातून् गत्वा यथैवात्मना दानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् दानपारमितायां समादापति निवेशयति प्रतिष्ठापयति । यथैवात्मना शीलपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् शीलपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना चान्तिपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् चान्तिपारमितायां समादापयति निवेशयति प्रतिष्ठापयति यथैवात्मना वीर्य्यपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् वीर्य्यपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना ध्यानपारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् ध्यानपारमितायां समादापयति निवेशयति प्रतिष्ठापयति । यथैवात्मना प्रज्ञापारमितायां तिष्ठति । तथैव तत्र लोकधातुषु ये सत्त्वास्तान् सर्व्वान् प्रज्ञापारमितायां समादापयति निवेशयति प्रतिष्ठापयति । धर्म्मञ्च देशयति यदुत या एव षट्पारमिताः । ते सत्त्वास्तं धर्म्मं श्रुत्वा न जातुविरहिता भवन्ति षड्भिः पारमिताभिः । यावदनुत्तरां सम्यक् सम्बोधिमभिसम्बुध्यन्ते ।

तद्यथापि नाम सुभूते दक्षोमायाकारो वा मायाकारान्तेवासी वा चतुर्महापथे महतोजनकायस्यापुरतो महान्तं जनकाय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मभिनिर्म्माय षट्सु पारमितासु समादापयेन्निवेशयेत् प्रतिष्ठापयेत्। तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण वा मायाकारान्तेवासिना वा कश्चित् सत्त्वः षट्सु पारमितासु समादापितो निवेशितः प्रतिष्ठापितो वा भवेत्। आह नोहीदं भगवन्। भगवानाह। एवमेव बोधिसत्त्वेन महासत्त्वेन पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। दक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। पश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। उत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु उत्तर पूर्व्वस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। पूर्व्वदक्षिणस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। दक्षिणपश्चिमायान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। पश्चिमोत्तरस्यान्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। अधस्ताद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु। उपरिष्टाद्दिशि गङ्गानदीवालुकोपमेषु लोकधातुषु ये सत्त्वास्ते सर्व्वे षट्सु पारमितासु प्रतिष्ठापिता भवन्ति। तत् कस्य हेतोः। धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मता मुपादाय। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहसन्नद्ध इत्युच्यते।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहं सन्नह्य सर्व्वाकारज्ञता प्रतिसंयुक्तेन चित्तेन विहरन्नान्येषां चित्तोत्पादानामवकाशं ददाति। इयन्तो मया सत्त्वाः दानपारमितायां प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठापयितव्याः। इयन्तो मया शीलपारमितायां प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठापयितव्याः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्रयन्तो मया सत्त्वाः क्षान्तिपारमितायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः वीर्य्यपारमितायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः ध्यानपारमितायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठा-पयितव्याः। द्रयन्तो मया सत्त्वाः प्रज्ञापारमितायां प्रतिष्ठापयि-तव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः।

द्रयन्तो मया सत्त्वाः अध्यात्मशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः बहिर्द्धाशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः अध्यात्मबहिर्द्धाशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः शून्यताशून्यतायां प्रति-ष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः महाशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः परमार्थशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः संस्कृतशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः असंस्कृतशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठा-पयितव्या। द्रयन्तो मया सत्त्वाः अत्यन्तशून्यतायां प्रतिष्ठापयि-तव्याः। द्रयन्तो मया न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः अनवराग्रशून्यतायां प्रतिष्ठापयितव्याः। द्रयन्तो न प्रतिष्ठापयि-तव्याः। द्रयन्तो मया सत्त्वाः अनवकारशून्यतायां प्रतिष्ठापयि-तव्याः। द्रयन्तो न प्रतिष्ठापयितव्याः। द्रयन्तो मया सत्त्वाः प्रकृति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यतायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः सर्व्वधर्म्म शून्यतायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः स्वलक्षण-शून्यतायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः अनुपलम्भशून्यतायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः। इयन्तो मया सत्त्वाः अभावशून्यतायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः स्वभावशून्यतायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठा-पयितव्याः । इयन्तो मया सत्त्वाः अभावस्वभावशून्यतायां प्रतिष्ठा-पयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः ।

इयन्तो मया सत्त्वास्चतुर्षुस्मृत्युपस्थानेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वास्चतुर्षु सम्यक्-प्रहाणेषु प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठापयितव्याः। इयन्तो मया सत्त्वास्चतुर्षुऋद्धिपादेषु प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठा-पयितव्याः। इयन्तो मया सत्त्वाः पञ्चस्विन्द्रियेषु प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठापयितव्याः। इयन्तो मया सत्त्वाः पञ्चसु बलेषु प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठापयितव्याः। इयन्तो मया सत्त्वाः सप्तसु बोध्यङ्गेषु प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठा-पयितव्याः। इयन्तो मया सत्त्वाः आर्य्याष्टाङ्गमार्गे प्रतिष्ठापयितव्याः। इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः आर्य्यसत्येषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः। इयन्तो मया सत्त्वास्चतुर्षु ध्यानेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तव्याः । इयन्तो मया सत्त्वाश्चतुर्ष्वप्रमाणेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः विमोक्षेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः नवस्वनुपूर्व्वविहारसमापत्तिषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः शून्यतानिमित्ताप्रणिहित-विमोक्षेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः पञ्चस्वभिज्ञासु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठा-पयितव्याः । इयन्तो मया सत्त्वाः सर्व्वसमाधिषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः सर्व्वधारणी-मुखेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः दशसु तथागतबलेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाश्चतुर्षु वैशारद्येषु प्रतिष्ठा-पयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाश्चतसृषु प्रतिसम्बित्सु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठा-पयितव्याः । इयन्तो मया सत्त्वा महामैत्र्यां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः महाकरुणायां प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः अष्टादशस्वावेणिक बुद्धधर्म्मेषु प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः स्रोत आपत्ति फले प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठापयितव्याः । इयन्तो मया सत्त्वाः सकृदागामिफले प्रतिष्ठापयितव्याः । इयन्तो न प्रतिष्ठा-पयितव्याः । इयन्तो मया सत्त्वाः अनागामिफले प्रतिष्ठापयितव्याः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्भयन्तो न प्रतिष्ठापयितव्याः । द्भयन्तो मया सत्त्वाः अर्हत्वे प्रतिष्ठापयितव्याः । द्भयन्तो न प्रतिष्ठापयितव्याः । द्भयन्तो मया सत्त्वाः प्रत्येकबोधौ प्रतिष्ठापयितव्याः । द्भयन्तो न प्रतिष्ठापयितव्याः । द्भयन्तो मया सत्त्वाः मार्गाकारज्ञतायां प्रतिष्ठापयितव्याः । द्भयन्तो न प्रतिष्ठापयितव्याः । द्भयन्तो मया सत्त्वाः सर्व्वाकारज्ञतायां प्रतिष्ठापयितव्याः । द्भयन्तो न प्रतिष्ठापयिव्याः ।

अपि तु पुनरस्यैवं भवत्यप्रमेयाऽसंख्येया मया सत्त्वाः दानपारमितायां प्रतिष्ठापयितव्याः । शीलपारमितायां प्रतिष्ठापयितव्याः । चान्तिपारमितायां प्रतिष्ठापयितव्याः । वीर्य्यपारमितायां प्रतिष्ठापयितव्याः । ध्यानपारमितायां प्रतिष्ठापयितव्याः । प्रज्ञापारमितायां प्रतिष्ठापयितव्याः । अध्यात्मशून्यतायां प्रतिष्ठापयितव्याः । वहिर्द्धाशून्यतायां प्रतिष्ठापयितव्याः । अध्यात्मवहिर्द्धाशून्यतायां प्रतिष्ठापयितव्याः। शून्यताशून्यतायां प्रतिष्ठापयितव्याः। महाशून्यतायां प्रतिष्ठापयितव्याः । परमार्थशून्यतायां प्रतिष्ठापयितव्याः । संस्कृतशून्यतायां प्रतिष्ठापयितव्याः । असंस्कृतशून्यतायां प्रतिष्ठापयितव्याः। अत्यन्तशून्यतायां प्रतिष्ठापयितव्याः । अनवराग्रशून्यतायां प्रतिष्ठापयितव्याः । अनवकारशून्यतायां प्रतिष्ठापयितव्याः । प्रकृतिशून्यतायां प्रतिष्ठापयितव्याः । सर्व्वधर्म्मशून्यतायां प्रतिष्ठापयितव्याः । स्वलक्षणशून्यतायां प्रतिष्ठापयितव्या । अनुपलम्भशून्यतायां प्रतिष्ठापयितव्याः । अभावशून्यतायां प्रतिष्ठापयितव्याः। स्वभावशून्यतायां प्रतिष्ठापयितव्याः। अभावस्वभावशून्यतायां प्रतिष्ठापयितव्याः । चतुर्षुस्मृत्युपस्थानेषु प्रतिष्ठापयितव्याः । चतुर्षु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्यक् प्रहाणेषु प्रतिष्ठापयितव्याः। चतुर्षु ऋद्धिपादेषु प्रतिष्ठापयितव्याः। पञ्चस्विन्द्रियेषु प्रतिष्ठापयितव्याः। पञ्चसु बलेषु प्रतिष्ठापयितव्याः। सप्तसुबोध्यङ्गेषु प्रतिष्ठापयितव्याः। आर्य्याष्टाङ्गमार्गे प्रतिष्ठापयितव्याः। चतुर्ष्वार्य्यसत्येषु प्रतिष्ठापयितव्याः। चतुर्षु ध्यानेषु प्रतिष्ठापयितव्याः। चतर्ष्वप्रमाणेषु प्रतिष्ठापयितव्याः। चतसृष्वारूप्यसमापत्तिषु प्रतिष्ठापयितव्याः। अष्टासु विमोक्षेषु प्रतिष्ठापयितव्याः। नवस्वनुपूर्व्वविहारसमापत्तिषु प्रतिष्ठापयितव्याः। शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु प्रतिष्ठापयितव्याः। पञ्चस्वभिज्ञासु प्रतिष्ठापयितव्याः। सर्व्वसमाधिषु प्रतिष्ठापयितव्याः। सर्व्वधारणीमुखेषु प्रतिष्ठापयितव्याः। दशसुतथागतबलेषु प्रतिष्ठापयितव्याः। चतुर्षु वैशारद्येषु प्रतिष्ठापयितव्याः। चतसृषु प्रतिसम्बित्सु प्रतिष्ठापयितव्याः। महामैत्र्यां प्रतिष्ठापयितव्याः। महाकरुणायां प्रतिष्ठापयितव्याः। अष्टादशावेणिकबुद्धधर्म्मेषु प्रतिष्ठापयितव्याः। स्रोत आपत्तिफले प्रतिष्ठापयितव्याः। सकृदागामिफले प्रतिष्ठापयितव्याः। अनागामिफले प्रतिष्ठापयितव्याः। अर्हत्त्वे प्रतिष्ठापयितव्याः। प्रत्येकबोधौ प्रतिष्ठापयितव्याः। मार्गाकारज्ञतायां प्रतिष्ठापयितव्याः। सर्व्वाकारज्ञतायां प्रतिष्ठापयितव्याः।

तद्यथापि नाम सुभूते दक्षोमायाकारो वा मायाकारान्तेवासी वा चतुर्महापथे महतोजनकायस्य पुरतो महान्तजनकायमभिनिर्माय्यैवं चित्तमुत्पादयेत् एते मया अप्रमेयासंख्येयाः सत्त्वाः षट्सु पारमितासु प्रतिष्ठापयितव्याः। अष्टादशसु शून्यतासु प्रतिष्ठाप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यितव्याः। चतुर्षु स्मृत्युपस्थानेषु प्रतिष्ठापयितव्याः। चतुर्षु सम्यक् प्रहाणेषु प्रतिष्ठापयितव्याः। चतुर्षु ऋद्धिपादेषु प्रतिष्ठापयितव्याः। पञ्चस्विन्द्रियेषु प्रतिष्ठापयितव्याः। पञ्चसु बलेषु प्रतिष्ठापयितव्याः। सप्तसु बोध्यङ्गेषु प्रतिष्ठापयितव्याः। आर्य्याष्टाङ्गमार्गे प्रतिष्ठापयितव्याः। चतुर्ष्वार्य्यसत्येषु प्रतिष्ठापयितव्याः। चतुर्षु ध्यानेषु प्रतिष्ठापयिव्याः। चतुर्ष्वप्रमाणेषु प्रतिष्ठापयितव्याः। चतस्र्ष्वारूप्यसमापत्तिषु प्रतिष्ठापयितव्याः। अष्टासु विमोक्षेषु प्रतिष्ठापयितव्याः। नवस्वपूर्व्वविहारसमापत्तिषु प्रतिष्ठापयितव्याः। शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु प्रतिष्ठापयितव्याः। पञ्चस्वभिज्ञासु प्रतिष्ठापयितव्याः। सर्व्वसमाधिषु प्रतिष्ठापयितव्याः। सर्व्वधारणीमुखेषु प्रतिष्ठापयितव्याः। दशसु तथागतबलेषु प्रतिष्ठापयितव्याः। चतुर्षु वैशारद्येषु प्रतिष्ठापयितव्याः। चतसृषु प्रतिसम्वित्सु प्रतिष्ठापयितव्याः। महामैत्र्यां प्रतिष्ठापयितव्याः। महाकरुणायां प्रतिष्ठापयिव्याः। अष्टादशस्वावेणिकबुद्धधर्म्मेषु प्रतिष्ठापयितव्याः। स्रोत आपत्तिफले प्रतिष्ठापयितव्याः। सकृदागामि फले प्रतिष्ठापयितव्याः। अनागामिफले प्रतिष्ठापयितव्याः। अर्हत्त्वे प्रतिष्ठापयितव्याः। प्रत्येकबोधौ प्रतिष्ठापयितव्याः। मार्गाकारज्ञतायां प्रतिष्ठापयितव्याः। सर्व्वाकारज्ञतायां प्रतिष्ठापयितव्याः।

तत् किं मन्यसे सुभूतेऽपि नु तेन मायाकारेण वा मायाकारान्तेवासिना वा कश्चित्सत्वः षट्सु पारमितासु प्रतिष्ठापितो भवेत्। अष्टादशसु शून्यतासु प्रतिष्ठापितो भवेत्। चतुर्षु स्मृत्युप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थानेषु प्रतिष्ठापितो भवेत्। चतुर्षु सम्यक् प्रहाणेषु प्रतिष्ठापितो भवेत्। चतुर्षु ऋद्धिपादेषु प्रतिष्ठापितो भवेत्। पञ्चस्विन्द्रियेषु प्रतिष्ठापितो भवेत्। पञ्चसु बलेषु प्रतिष्ठापितो भवेत्। सप्तसु बोध्यङ्गेषु प्रतिष्ठापितो भवेत्। आर्य्याष्टाङ्गमार्गे प्रतिष्ठापितो भवेत्। चतुर्ष्वार्य्यसत्येषु प्रतिष्ठापितो भवेत्। चतुर्षु ध्यानेषु प्रतिष्ठापितो भवेत्। चतुर्ष्वप्रमाणेषु प्रतिष्ठापितो भवेत्। चतसृष्वारूप्यसमापत्तिषु प्रतिष्ठापितो भवेत्। अष्टासु विमोक्षेषु प्रतिष्ठापितो भवेत्। नवस्वनुपूर्व्वविहारसमापत्तिषु प्रतिष्ठापितो भवेत्। शून्यतानिमित्तप्रणिहितविमोक्षमुखेषु प्रतिष्ठापितो भवेत्। पञ्चस्वभिज्ञासु प्रतिष्ठापितो भवेत्। सर्व्वसमाधिषु प्रतिष्ठापितो भवेत्। सर्व्वधारणीमुखेषु प्रतिष्ठापितो भवेत्। दशतथागतबलेषु प्रतिष्ठापितो भवेत्। चतुर्षु वैशारद्येषु प्रतिष्ठापितो भवेत्। चतसृषु प्रतिसम्वित्सु प्रतिष्ठापितो भवेत्। महामैत्र्यां प्रतिष्ठापितो भवेत्। महाकरुणायां प्रतिष्ठापितो भवेत्। अष्टादशस्वावेणिकबुद्धधर्म्मेषु प्रतिष्ठापितो भवेत्। स्रोत आपत्तिफले प्रतिष्ठापितो भवेत्। सकृदागामिफले प्रतिष्ठापितो भवेत्। अनागामिफले प्रतिष्ठापितो भवेत्। अर्हत्वे प्रतिष्ठापितो भवेत्। प्रत्येकबोधौ प्रतिष्ठापितो भवेत्। मार्गाकारज्ञतायां प्रतिष्ठापितो भवेत्। सर्व्वाकारज्ञतायां प्रतिष्ठापितो भवेत्।

आह। नोहीदं भगवन्। भगवानाह। एव मेव सुभूते बोधिसत्त्वेन महासत्त्वेनाऽप्रमेयाऽसंख्येयानां सत्त्वानां षट्सु पारमितासु प्रतिष्ठापनाय चित्तमुत्पाद्य। अष्टादशसु शून्यतासु प्रतिष्ठापनाय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्तमुत्पाद्य। चतुर्षु स्मृत्युपस्थानेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। चतुर्षु सम्यक् प्रहाणेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। चतुर्ष्वृद्धिपादेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। पञ्चस्विन्द्रियेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। पञ्चसु बलेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। सप्तसु बोध्यङ्गेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। आर्य्याष्टाङ्गमार्गे प्रतिष्ठापनाय चित्तमुत्पाद्य। आर्य्यसत्येषु प्रतिष्ठापनाय चित्तमुत्पाद्य। चतुर्षु ध्यानेषु प्रतिष्ठापनाद्य चित्तमुत्पाद्य। चतुर्ष्वप्रमाणेषु प्रतिष्ठा नाम चित्तमुत्पाद्य। आरूप्यसमापत्तिषु प्रतिष्ठापनाय चित्तमुत्पाद्य। अष्टासु विमोक्षेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। नवस्वनुपूर्व्वविहारसमापत्तिषु प्रतिष्ठापनाय चित्तमुत्पाद्य। शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। पञ्चस्वभिज्ञासु प्रतिष्ठापनाय चित्तमुत्पाद्य। सर्व्वसमाधिषु प्रतिष्ठापनाय चित्तमुत्पाद्य। सर्व्वधारणीमुखेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। दशतथागतबलेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। चतुर्षु वैशारद्येषु प्रतिष्ठापनाय चित्तमुत्पाद्य। चतसृषु प्रतिसम्वित्सु प्रतिष्ठापनाय चित्तमुत्पाद्य। महामैत्र्यां प्रतिष्ठापनाय चित्तमुत्पाद्य। महाकरुणायां प्रतिष्ठापनाय चित्तमुत्पाद्य। अष्टादशस्वावेणिकेषु बुद्धधर्म्मेषु प्रतिष्ठापनाय चित्तमुत्पाद्य। स्रोत आपत्तिफले प्रतिष्ठापनाय चित्तमुत्पाद्य। सकृदागामिफले प्रतिष्ठापनाय चित्तमुत्पाद्य। अनागामिफले प्रतिष्ठापनाय चित्तमुत्पाद्य। अर्हत्त्वे प्रतिष्ठापनाय चित्तमुत्पाद्य। प्रत्येकबोधौ प्रतिष्ठापनाय चित्तमुत्पाद्य। मार्गाकारज्ञतायां प्रतिष्ठापनाय चित्तमुत्पाद्य। सर्व्वाकारज्ञतायां प्रतिष्ठापनाय चित्तमुत्पाद्य।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न कस्य चित्सत्त्वस्यार्थाय चित्तमुत्पादित भवति। तत्कस्य हेतोः। धर्म्मतैषा सुभूते धर्म्माणां मायाधर्म्मतामुपादाय। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहसन्नद्ध इत्युच्यते।

सुभूतिराह। यथाहं भगवन् भवतो भाषितस्यार्थमाजानामि। असत्त्वाह सन्नद्धोवताऽयं बोधिसत्त्वो महासत्त्वो वेदितव्यः। स्वलक्षण शून्यतामुपादाय। तत्कस्य हेतोस्तथाहि। रूपं भगवन् रूपेण शून्यं। वेदना वेदनया शून्या। संज्ञासंज्ञया शून्या। संस्काराः संस्कारैः शून्याः। विज्ञानं विज्ञानेन शून्यं। चक्षुश्चक्षुषाशून्यं। श्रोत्रं श्रोत्रेण शून्यं। घ्राणं घ्राणेन शून्यं। जिह्वाजिह्वयाशून्या। कायः कायेन शून्यः। मनो मनसाशून्यं। रूपं रूपेणशून्यं। शब्दः शब्देन शून्यः। गन्धो गन्धेन शून्यः। रसो रसेन शून्यः। स्पर्शः स्पर्शेन शून्यः। धर्म्म धर्म्मैः शून्याः। चक्षुर्व्विज्ञानं चक्षुर्व्विज्ञानेनशून्यं। श्रोत्रं विज्ञानं श्रोत्रविज्ञानेन शून्यं। घ्राणविज्ञानं घ्राणविज्ञानेन शून्यं। जिह्वाविज्ञानं जिह्वाविज्ञानेन शून्यं। कायविज्ञानं कायविज्ञानेन शून्यं। मनोविज्ञानं मनोविज्ञानेन शून्यं। चक्षुःसंस्पर्शश्चक्षुःसंस्पर्शेन शून्यः। श्रोत्रसंस्पर्शः श्रोत्रसंस्पर्शेन शून्यः। घ्राणसंस्पर्शः घ्राणसंस्पर्शेन शून्यः। जिह्वासंस्पर्शः जिह्वासंस्पर्शेन शून्यः। कायसंस्पर्शः कायसंस्पर्शेन शून्यः। मनःसंस्पर्शः मनःसंस्पर्शेन शून्यः। चक्षुः संस्पर्शप्रत्ययवेदना चक्षुःसंस्पर्शप्रत्ययवेदनया शून्या। श्रोत्रसंस्पर्शप्रत्ययवेदना श्रोत्रसंस्पर्शप्रत्ययवेदनया शून्या। घ्राणसंस्पर्शप्रत्ययवेदना घ्राणसंस्पर्शप्रत्ययवेदनया शून्या। कायसंस्पर्शप्रत्ययवेदना कायसंस्पर्शप्रत्ययवेदनया शून्या। मनः संस्पर्शप्रत्ययवेदना मनःसंस्पर्शप्रत्ययवेदनया शून्या।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथिवीधातुः पृथिवीधातुना शून्या । अब्धातुरब्धातुना शून्या । तेजोधातुस्तेजोधातुना शून्या । वायुधातुर्वायुधातुना शून्या । आकाशधातुराकाशधातुना शून्या । विज्ञानधातुर्विज्ञानधातुना शून्या । अविद्या अविद्यया शून्या । संस्काराः संस्कारैः शून्याः । विज्ञानं विज्ञानेन शून्यं । नामरूपं नारूपेण शून्यं । षडायतनं षडायतनेन शून्यं । स्पर्शः स्पर्शेन शून्यः । वेदना वेदनया शून्या । तृष्णा तृष्णया शून्याः । उपादानमुपादानेन शून्यं । भवो भवेन शून्यः । जातिर्जात्याशून्या । जरामरण जरामरणेन शून्यं ।

दानपारमिता दानपारमितया शून्या । शीलपारमिता शील-पारमितया शून्या । क्षान्तिपारमिता क्षान्तिपारमितया शून्या । वीर्य्यपारमिता वीर्य्यपारमितया शून्या । ध्यानपारमिता ध्यानपा-रमितया शून्या । प्रज्ञापारमिता प्रज्ञापारमितया शून्या ।

अध्यात्मशून्यता अध्यात्मशून्यतया शून्या । वहिर्द्धाशून्यता वहि-र्द्धाशून्यतया शून्या । अध्यात्मवहिर्द्धाशून्यता अध्यात्मवहिर्द्धाशून्यतया शून्या । शून्यताशून्यता शून्यताशून्यतयाशून्या । महाशून्यता महा-शून्यतया शून्या । परमार्थशून्यता परमार्थशून्यतया शून्या । संस्कृतशून्यता संस्कृतशून्यतया शून्या । असंस्कृतशून्यता असंस्कृतशून्य-तया शून्या । अत्यन्तशून्यता अत्यन्तशून्यतया शून्या । अनवराग्रशू-न्यता अनवराग्रशून्यतया शून्या । अनवकारशून्यता अनवकारशून्य-तयाशून्या । प्रकृतिशून्यता प्रकृतिशून्यतया शून्या । सर्व्वधर्म्मशून्यता सर्व्वधर्म्मशून्यतया शून्या । स्वलक्षणशून्यता स्वलक्षणशून्यतया शून्या । अनुपलम्भशून्यता अनुपलम्भशून्यतया शून्या । अभावशून्यता अभा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वशून्यतया शून्या । स्वभावशून्यता स्वभावशून्यतया शून्या । अभाव-स्वभावशून्यता अभावस्वभावशून्यतया शून्या ।

स्मृत्युपस्थानानि स्मृत्युपस्थानै शून्यानि । सम्यक् प्रहाणानि सम्यक्प्रहाणैः शून्यानि । ऋद्धिपादा ऋद्धिपादैः शून्याः । इन्द्रि-याणीन्द्रियैः शून्यानि । बलानिबलैः शून्यानि । बोध्यङ्गानि बोध्यङ्गैः शून्यानि । आर्य्याष्टाङ्गमार्ग आर्य्याष्टाङ्गमार्गैः शून्यः । आर्य्यसत्यानि आर्य्यसत्यैः शून्यानि । ध्यानानि ध्यानैः शून्यानि । अप्रमाणानि अप्रमाणैः शून्यानि । आरूप्यसमापत्तय आरूप्यसमापत्तिभिः शून्याः । विमोक्षाविमोक्षैः शून्याः । अणुपूर्व्वविहारसमापत्तयोऽणुपूर्व्वविहा-रसमापत्तिभिः शून्याः । शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखानि शून्यतानिमित्ताऽप्रणिहितविमोक्षसुखैः शून्यानि । अभिज्ञा अभि-ज्ञाभिः शून्याः । समाधयः समाधिभिः शून्याः । धारणीमुखानि धारणीमुखैः शून्यानि । तथागतबलानि तथागतबलैः शून्यानि । वैशारद्यानि वैशारद्यैः शून्यानि । प्रतिसम्विदः प्रतिसम्विद्भिः शून्यानि । महामैत्री महामैत्र्या शून्या । महाकरुणा महाकरुणया शून्या । आवेणिकबुद्धधर्म्मा आवेणिकबुद्धधर्म्मैः शून्याः । बोधिसत्त्वो बोधिसत्त्वेन शून्याः । महासन्नाहो महासन्नाहेन शून्यः । अनेन भग-वन् पर्य्यायेन सन्नाह सन्नद्धो बोधिसत्त्वो महासत्त्वो वेदितव्यः । भगवानाह । एवमेव सुभूते एवमेतत् तथायथावदसि । तत्कस्य-हेतोः । अकृताहि सुभूते सर्व्वाकारज्ञता । अविकृता अनभिसंस्कृता । येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाहः सन्नद्धः । आह केन कारणेन भगवन् सर्व्वाकारज्ञता अकृता अविकृता अनभिसंस्कृता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाहः सन्नद्धः । भगवानाह । कारकानुपलब्धितामुपादाय सुभूते सर्व्वाकारज्ञता अकृता अविकृता अनभिसंस्कृता । तेपि सत्त्वा अकृता अविकृता अनभिसंस्कृताः येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाः सन्नद्धः । तत्कस्य हेतोः । तथाहि सुभूते रूपं न करोति न विकरोति । नाऽभिसंस्करोति । वेदना न करोति न विकरोति नाभिसंस्करोति । संज्ञा न करोति न विकरोति नाऽभिसंस्करोति । संस्कारा न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति । विज्ञानं न करोति न विकरोति नाऽभिसंस्करोति । चक्षुः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । श्रोत्रं न करोति न विकरोति नाभिसंस्करोति । घ्राणं न करोति न विकरोति नाऽभिसंस्करोति । जिह्वा न करोति न विकरोति नाऽभिसंस्करोति । कायो न करोति न विकरोति नाभिसंस्करोति । मनो न करोति न विकरोति नाऽभिसंस्करोति । रूपं सुभूते न करोति न विकरोति नाभिसंस्करोति । शब्दो न करोति न विकरोति नाऽभिसंस्करोति । गन्धो न करोति न विकरोति नाऽभिसंस्करोति । रसो न करोति न विकरोति नाभिसंस्करोति । स्पर्शो न करोति न विकरोति नाऽभिसंस्करोति । धर्म्मा न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति । चक्षुर्व्विज्ञानं सुभूते न करोति न विकरोति नाऽभिसंस्करोति । श्रोत्रविज्ञानं न करोति न विकरोति नाऽभिसंस्करोति । घ्राणविज्ञानं न करोति न विकरोति नाभिसंस्करोति । जिह्वाविज्ञानं न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वशून्यतया शून्या । स्वभावशून्यता स्वभावशून्यतया शून्या । अभाव-स्वभावशून्यता अभावस्वभावशून्यतया शून्या ।

स्मृत्युपस्थानानि स्मृत्युपस्थानै शून्यानि । सम्यक् प्रहाणानि सम्यक्प्रहाणैः शून्यानि । ऋद्धिपादा ऋद्धिपादैः शून्याः । इन्द्रि-याणीन्द्रियैः शून्यानि । बलानिवलैः शून्यानि । बोध्यङ्गानि बोध्यङ्गैः शून्यानि । आर्य्याष्टाङ्गमार्ग आर्य्याष्टाङ्गमार्गैः शून्यः । आर्य्यसत्यानि आर्य्यसत्यैः शून्यानि । ध्यानानि ध्यानैः शून्यानि । अप्रमाणानि अप्रमाणैः शून्यानि । आरूप्यसमापत्तय आरूप्यसमापत्तिभिः शून्याः । विमोचाविमोचैः शून्याः । अणुपूर्व्वविहारसमापत्तयोऽणुपूर्व्वविहा-रसमापत्तिभिः शून्याः । शून्यतानिमित्ताऽप्रणिहितविमोचमुखानि शून्यतानिमित्ताऽप्रणिहितविमोचसुखैः शून्यानि । अभिज्ञा अभि-ज्ञाभिः शून्याः । समाधयः समाधिभिः शून्याः । धारणीमुखानि धारणीमुखैः शून्यानि । तथागतबलानि तथागतबलैः शून्यानि । वैशारद्यानि वैशारद्यैः शून्यानि । प्रतिसम्विदः प्रतिसम्विद्भिः शून्यानि । महामैत्री महामैत्र्या शून्या । महाकरुणा महाकरुणया शून्या । आवेणिकबुद्धधर्म्मा आवेणिकबुद्धधर्म्मैः शून्याः । बोधिसत्त्वो बोधिसत्त्वेन शून्याः । महासन्नाहो महासन्नाहेन शून्यः । अनेन भग-वन् पर्य्यायेन सन्नाह सन्नद्धो बोधिसत्त्वो महासत्त्वो वेदितव्यः । भगवानाह । एवमेव सुभूते एवमेतत् तथायथावदसि । तत्कस्य-हेतोः । अकृताहि सुभूते सर्व्वाकारज्ञता । अविकृता अनभिसंस्कृता । येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाहः सन्नद्धः । आह केन कारणेन भगवन् सर्व्वाकारज्ञता अकृता अविकृता अनभिसंस्कृता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाहः सन्नद्धः। भगवानाह। कारकानुपलब्धितामुपादाय सुभूते सर्व्वाकारज्ञता अकृता अविकृता अनभिसंस्कृता। तेपि सत्त्वा अकृता अविकृता अनभिसंस्कृताः येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाः सन्नद्धः। तत्कस्य हेतोः। तथाहि सुभूते रूपं न करोति न विकरोति। नाऽभिसंस्करोति। वेदना न करोति न विकरोति नाभिसंस्करोति। संज्ञा न करोति न विकरोति नाऽभिसंस्करोति। संस्कारा न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। विज्ञानं न करोति न विकरोति नाऽभिसंस्करोति। चक्षुः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। श्रोत्रं न करोति न विकरोति नाभिसंस्करोति। घ्राणं न करोति न विकरोति नाऽभिसंस्करोति। जिह्वा न करोति न विकरोति नाऽभिसंस्करोति। कायो न करोति न विकरोति नाभिसंस्करोति। मनो न करोति न विकरोति नाऽभिसंस्करोति। रूपं सुभूते न करोति न विकरोति नाभिसंस्करोति। शब्दो न करोति न विकरोति नाऽभिसंस्करोति। गन्धो न करोति न विकरोति नाऽभिसंस्करोति। रसो न करोति न विकरोति नाभिसंस्करोति। स्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। धर्म्मा न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। चक्षुर्व्विज्ञानं सुभूते न करोति न विकरोति नाऽभिसंस्करोति। श्रोत्रविज्ञानं न करोति न विकरोति नाऽभिसंस्करोति। घ्राणविज्ञानं न करोति न विकरोति नाभिसंस्करोति। जिह्वाविज्ञानं न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करोति न विकरोति नाऽभिसंस्करोति। कायविज्ञानं न करोति न विकरोति नाऽभिसंस्करोति। मनोविज्ञानं न करोति न विकरोति नाऽभिसंस्करोति। चक्षुःसंस्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। श्रोत्रसंस्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। घ्राणसंस्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। जिह्वासंस्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। कायसंस्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। मनःसंस्पर्शो न करोति न विकरोति नाऽभिसंस्करोति। चक्षुःसंस्पर्शप्रत्ययवेदना न करोति न विकरोति नाभिसंस्करोति। श्रोत्रसंस्पर्शप्रत्ययवेदना न करोति न विकरोति नाऽभिसंस्करोति। घ्राणसंस्पर्शप्रत्ययवेदना न करोति न विकरोति नाऽभिसंस्करोति। जिह्वासंस्पर्शप्रत्ययवेदना न करोति न विकरोति नाऽभिसंस्करोति। कायसंस्पर्शप्रत्ययवेदना न करोति न विकरोति नाऽभिसंस्करोति। मनःसंस्पर्शप्रत्ययवेदना न करोति न विकरोति नाऽभिसंस्करोति।

आत्मा सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। जीवः सत्त्वः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोः। तथाहि सोऽत्यन्ततया नोपलभ्यते। जीवः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोः। तथाहि सोऽत्यन्ततया नोपलभ्यते। जन्तुः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोः। तथाहि सोऽत्यन्ततया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपलभ्यते । पोषः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । पुरुषः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । पुद्गलः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोः । तथाहि सोऽत्यन्ततया नोपलभ्यते । मनुजः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । मानवः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । कारकः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । वेदकः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । जानकः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । पश्यकः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । स्वप्नः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्यहेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । माया सुभूते न करोति न विकरोति नाभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । प्रतिश्रुत्का सुभूते न न करोति न विकरोति नाभिसंस्कारोति । तत्कस्य हेतोस्तथा हि साऽत्यन्ततया नोपलभ्यते । प्रतिभासः सुभूते न करोति न विकरोति नाभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपलभ्यते। प्रतिविम्ब सुभूते न करोति न विकरोति नाभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। मरीचिका सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। निर्म्मितः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। अविद्या सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। संस्कारा सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतस्तथा हि *सोऽत्यन्ततया नोपलभ्यन्ते। विज्ञानं सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथा हि †सोऽत्यन्ततया नोपलभ्यते। नामरूपं सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्यहेतोस्तथा हि सोऽत्यन्ततया नोपलभ्यते। षड़ायतनं सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्यहेतोस्तथा हि सोऽत्यन्ततया नोपलभ्यते। स्पर्शः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। वेदना सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। तृष्णा सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्यहेतोस्तथा हि। साऽत्यन्त-

---

* तेऽत्यन्ततया नोपलभ्यन्ते—इति पाठो युक्तः।

† तदत्यन्ततया नोपलभ्यते—इति युक्तं एवं परत्रापि क्लीवलिङ्गार्थपरामर्शस्थले।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तया नोपलभ्यते। उपादानं सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। भवः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि। सोऽत्यन्ततया नोपलभ्यते। जातिः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। जरामरणं सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते।

दानपारमिता* न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। शीलपारमिता न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। क्षान्तिपारमिता न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। वीर्य्यपारमिता न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। ध्यानपारमिता न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्यहेतोस्तथा हि साऽत्यन्ततया नोपलभ्यते। प्रज्ञापारमिता न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते।

---

* पारमिताशब्दात् परं सुभूते-इति पदं षट्पारमितास्थलेऽस्तीति प्रतीयते पूर्व्वापरस्थलेषु तत्प्रयोगदर्शनात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यात्मशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। बहिर्द्धाशून्यता न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । अध्यात्मबहिर्द्धाशून्यता न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । शून्यताशून्यता न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । महाशून्यता न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । परमार्थशून्यता न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । संस्कृतशून्यता न करोति न विकरोति नाभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । असंस्कृतशून्यता न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । अत्यन्तशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । अनवराग्रशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । अनवकारशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । प्रकृतिशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । सर्व्वधर्म्मशून्यता सुभूते न करोति न विकरोति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। स्वलक्षणशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सात्यन्ततया नोपलभ्यते। अनुपलम्भशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। अभावशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। स्वभावशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। अभावस्वभावशून्यता सुभूते न करोति न विकरोति नाऽभिसंस्करोति तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते।

स्मृत्युपस्थानानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। सम्यक् प्रहानानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। ऋद्धिपादान-कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तेऽत्यन्ततया नोपलभ्यन्ते। इन्द्रियाणि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। बलानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। बोध्यङ्गानि न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। आर्य्याष्टाङ्गमार्गः सुभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया न विद्यते। आर्य्यसत्यानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततयानोपलभ्यन्ते। ध्यानानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। अप्रमाणानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। आरूप्यसमापत्तयः सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि ता अत्यन्ततया नोपलभ्यन्ते। विमोचाः सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तेऽत्यन्ततया नोपलभ्यन्ते। अनुपूर्व्वविहारसमापत्तयः सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि ता अत्यन्ततया नोपलभ्यन्ते। शून्यतानिमित्ताप्रणिहित विमोचमुखानि न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यन्ततया नोपलभ्यन्ते। अभिज्ञाः सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि ता अत्यन्ततया नोपलभ्यन्ते। सर्वसमाधयः सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तेऽत्यन्ततया नोपलभ्यन्ते। सर्वधारणीमुखानि न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। तथागतबलानि सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैशारद्यानि सुभूते न कुर्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतोस्तथाहि तान्यत्यन्ततया नोपलभ्यन्ते। प्रतिसम्बिदः सुभूते न कुर्व्वन्ति न विकुर्व्वन्ति नाऽभिसंस्कुर्व्वन्ति। तत्कस्य हेतो-स्तथाहि ता अत्यन्ततया नोपलभ्यन्ते। महामैत्री सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। महाकरुणा सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। आवेणिकबुद्धधर्म्माः सुभूते न कुर्व्वन्ति नविकुर्व्वन्ति नाऽभिसंस्कुर्वन्ति। तत्कस्य हेतोस्तथाहि तेऽत्यन्ततया नोपलभ्यन्ते। तथता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। अवितथता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यन्ते। अनन्यतथता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। धर्म्मता सुभूते न करोति न विकरोति नाऽभिसं-स्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। धर्म्म-धातुः सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते। धर्म्मास्थिता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। धर्म्मनियामता सुभूते न करोति न विकरोति नाऽभिसंस्करोति। तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते। भूतकोटिः सुभूते न करोति न विकरोति नाऽ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । अचिन्त्यधातुः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि सोऽत्यन्ततया नोपलभ्यते । बोधिः सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । सर्व्वज्ञता सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । सर्व्वाकारज्ञता सुभूते न करोति न विकरोति नाऽभिसंस्करोति । तत्कस्य हेतोस्तथाहि साऽत्यन्ततया नोपलभ्यते । तदनेन सुभूते पर्य्यायेणैवं वेदितव्यं यथा अकृता सर्व्वाकारज्ञता अविकृता अनभिसंस्कृता । तेऽपि सत्त्वा अकृता अविकृता अनभिसंस्कृता । येषां कृते बोधिसत्त्वेन महासत्त्वेन महासन्नाहः सन्नद्धः । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो महासन्नाहसन्नद्ध इत्युच्यते ।

आह । यथाहं भगवन् भगवताभाषितस्याऽर्थमाजानामि । रूपं भगवन्नबद्धममुक्तं । वेदना अबद्धा अमुक्ता । संज्ञा अबद्धा अमुक्ता । संस्कारा अबद्धा अमुक्ताः । विज्ञानमबद्धममुक्तं ।

अथायुष्मान् पूर्णमैत्रायणीपुत्रो आयुष्मन्तं सुभूतिमेतदवोचत् । रूपमायुष्मन् सुभूते अबद्धममुक्तं । वेदना अबद्धा अमुक्ता । संज्ञा अबद्धा अमुक्ता । संस्कारा अबद्धा अमुक्ताः । विज्ञानमबद्धममुक्तं । आहैवमेतदायुष्मन् पूर्णैवमेतत् । रूपमायुष्मन् पूर्णाबद्धममुक्तं । वेदनाऽबद्धाऽमुक्ता । संज्ञाऽबद्धाऽमुक्ता । संस्कारा अबद्धा अमुक्ताः । विज्ञानमबद्धममुक्तं । पूर्ण आह ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कतमत्तावदायुष्मन् सुभूते यदबद्धमसुक्तं। कतमामावेदनायाऽबद्धाऽमुक्ता। कतमामासंज्ञायाऽबद्धाऽमुक्ता। कतमेते संस्कारा ये अबद्धामुक्ताः। कतमत्तद्विज्ञानं यदबद्धमसुक्तं। आह यदेतदायुष्मन् पूर्णस्वप्नोपमं रूपं तदबद्धमसुक्तं। येयं स्वप्नोपमावेदनामाऽबद्धाऽमुक्ता। येयं स्वप्नोपमासंज्ञामाऽबद्धाऽमुक्ता। य इमे स्वप्नोपमाः संस्काराः ते ऽबद्धा असुक्ताः। यदेतत् स्वप्नोपमं विज्ञानं तदबद्धमसुक्तं। यदेतन्मायोपमं रूपं तदबद्धमसुक्तं। येयं मायोपमा वेदनासाऽबद्धाऽमुक्ता। येयं मायोपमासंज्ञामाऽबद्धाऽमुक्ता। य इमे मायोपमाः संस्काराः तेऽबद्धा अमुक्ताः। यदिदं मायोपमं विज्ञानं तदबद्धमसुक्तं।

यदेतत् प्रतिश्रुत्कोपमं रूपं तदबद्धमसुक्तं। येयं प्रतिश्रुत्कोपमावेदनासाऽबद्धाऽमुक्ता। येयं प्रतिश्रुत्कोपमासंज्ञासाऽबद्धाऽमुक्ता। य इमे प्रतिश्रुत्कोपमाः संस्कारास्तेऽबद्धा असुक्ताः। यदेतत्प्रतिश्रुत्कोपमं विज्ञानं तदबद्धमसुक्तं। यदेतत्प्रतिभासोपमं रूपं तदबद्धमसुक्तं। येयं प्रतिभासोपमावेदनासाऽबद्धाऽमुक्ता। येयं प्रतिभासोपमासंज्ञासाऽबद्धाऽमुक्ता। य इमे प्रतिभासोपमाः संस्कारास्तेऽबद्धा असुक्ताः। यदेतत्प्रतिभासोपमं विज्ञानं तदबद्धमसुक्तं। यदेतत्प्रतिविम्बोपमं रूपं तदबद्धमसुक्तं। येयं प्रतिविम्बोपमा वेदनासाऽबद्धाऽमुक्ता। येयं प्रतिविम्बोपमासंज्ञासाऽबद्धाऽमुक्ता। य इमे प्रतिविम्बोपमाः संस्कारास्तेऽबद्धा असुक्ताः। यदेतत्प्रतिविम्बोपमं विज्ञानं तदबद्धमसुक्तं। यदेतन्मरीच्युपमं रूपं तदबद्धमसुक्तं। येयं मरीच्युपमावेदनामाऽबद्धाऽमुक्ता। येयं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मरीच्युपमासंज्ञासाऽबद्धाऽमुक्ता। य इमे मरीच्युपमाः संस्कारास्ते-ऽबद्धा अमुक्ता। यदेतन्मरीच्युपमं विज्ञानं तदबद्धममुक्तं। यदेतन्निर्म्मितोपमं रूपं तदबद्धममुक्तं। येयं निर्म्मितोपमा वेदना न साऽबद्धाऽमुक्ता। येयं निर्म्मितोपमासंज्ञासाऽबद्धाऽमुक्ता। य इमे निर्म्मितोपमाः संस्कारास्तेऽबद्धा अमुक्ताः। यदेतन्निर्म्मितोपमं विज्ञानं तदबद्धममुक्तं।

अतीतमायुष्मन् पूर्णरूपमबद्धममुक्तं। अतीतावेदनाऽबद्धा-ऽमुक्ता। अतीतासंज्ञाऽबद्धाऽमुक्ता। अतीताः संस्काराः अबद्धा अमुक्ताः। अतीतं विज्ञानमबद्धममुक्तं। प्रत्युत्पन्नमायुष्मन् पूर्णरूपमबद्धममुक्तं। प्रत्युत्पन्नावेदनाऽबद्धाऽमुक्ता। प्रत्युत्पन्नासंज्ञाऽबद्धा-ऽमुक्ता। प्रत्युत्पन्नाः संस्कारा अबद्धा अमुक्ताः। प्रत्युत्पन्नं विज्ञानमबद्धममुक्तं। तत्कस्य हेतोस्तथाहि। असत्त्वादायुष्मन् पूर्णरूपस्य रूपमबद्धममुक्तं। असत्त्वाद्वेदनायावेदनाऽबद्धाऽमुक्ता। असत्त्वात्संज्ञायाः संज्ञाऽबद्धाऽमुक्ता। असत्त्वात् संस्काराणां संस्कारा अबद्धा अमुक्ताः। असत्त्वाद्विज्ञानस्य विज्ञानमबद्धममुक्तं। विविक्तत्वाद्रूपस्य रूपमबद्धममुक्तं। विविक्तत्वात्संज्ञायाः संज्ञाऽबद्धाऽमुक्ता। विविक्तत्वात्संस्काराणां संस्कारा अबद्धा अमुक्ताः। विविक्तत्वाद्विज्ञानस्य विज्ञानमबद्धममुक्तं। अनुत्पन्नत्वाद्रूपस्य रूपमबद्धममुक्तं। अनुत्पन्नत्वाद्वेदनाया वेदनाऽबद्धाऽमुक्ता। अनुत्पन्नत्वात्संज्ञायाः संज्ञाऽबद्धा-ऽमुक्ता। अनुत्पन्नत्वात्संस्कारानां संस्कारा अबद्धा अमुक्ताः। अनुत्पन्नत्वाद्विज्ञानस्य विज्ञानमबद्धममुक्तं।

कुशलमायुष्मन् पूर्णरूपमबद्धममुक्तं। कुशलावेदनाऽबद्धाऽमुक्ता।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुशलासंज्ञाऽबद्धाऽमुक्ता। कुशलाः संस्कारा अबद्धा अमुक्ता। कुशलं विज्ञानमबद्धममुक्तं। अकुशलमायुष्मन् पूर्णरूपमबद्धममुक्तं। अकुशलं वेदनाऽबद्धाऽमुक्ता। अकुशलासंज्ञा अबद्धा अमुक्ता। अकुशलाः संस्कारा अबद्धा अमुक्ताः। अकुशलं विज्ञानमबद्धममुक्तं। अव्याकृतमायुष्मन् पूर्णरूपमबद्धममुक्तं। अव्याकृतावेदनाऽबद्धाऽमुक्ता। अव्याकृतासंज्ञाऽबद्धाऽमुक्ता। अव्याकृताः संस्काराः अबद्धा अमुक्ताः। अव्याकृतं विज्ञानमबद्धममुक्तं। लौकिकमायुष्मन् पूर्णरूपमबद्धममुक्तं। लौकिका वेदनाऽबद्धाऽमुक्ता। लौकिकासंज्ञा अबद्धा अमुक्ता। लौकिकाः संस्कारा अबद्धा अमुक्ताः। लौकिकं विज्ञानमबद्धममुक्तं। लोकोत्तरमायुष्मन् पूर्णरूपमबद्धममुक्तं। लोकोत्तरा वेदनाबद्धाऽमुक्ता। लोकोत्तरासंज्ञाऽबद्धाऽमुक्ता। लोकोत्तराः संस्कारा अबद्धा अमुक्ताः। लोकोत्तरं विज्ञानमबद्धममुक्तं। साश्रवमायुष्मन् पूर्णरूपमबद्धममुक्तं। साश्रवा वेदनाऽद्धाऽमुक्ता। साश्रवासंज्ञाऽबद्धाऽमुक्ता। साश्रवाः संस्काराः अबद्धा अमुक्ताः। साश्रवं विज्ञानमबद्धममुक्तं। अनाश्रवमायुष्मन् पूर्णरूपमबद्धममुक्तं। अनाश्रवा वेदनाऽबद्धाऽमुक्ता। अनाश्रवासंज्ञाऽबद्धाऽमुक्ता। अनाश्रवाः संस्कारा अबद्धाऽमुक्ताः। अनाश्रवं विज्ञानमबद्धममुक्तं। तत्कस्य हेतोः। असत्त्वाद्रूपस्य रूपमबद्धममुक्तं। असत्त्वाद्वेदनायाः वेदनऽबद्धाऽमुक्ता। असत्त्वात् संज्ञायाः संज्ञाऽबद्धाऽमुक्ता। असत्त्वात् संस्काराणां संस्कारा अबद्धा अमुक्ताः। असत्त्वाद्विज्ञानस्य विज्ञानमबद्धममुक्तं। विविक्तत्वाद्रूपस्य रूपमबद्धममुक्तं। विविक्तत्वाद्वेदनायाः वेदनाऽबद्धाऽमुक्ता। विविक्तत्वात् संज्ञाया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संज्ञाऽबद्धाऽमुक्ता। विविक्तत्वात् संस्काराणां संस्कारा अबद्धा अमुक्ताः। विविक्तत्वाद्विज्ञानस्य विज्ञानमबद्धममुक्तं। अनुत्पन्नत्वाद्रूपस्य रूपमबद्धममुक्तं। अनुत्पन्नत्वाद्वेदनायाः वेदनाऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् संज्ञायाः संज्ञाऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् संस्काराणां संस्कारा अबद्धा अमुक्ताः। अनुत्पन्नत्वाद्विज्ञानस्य विज्ञानमबद्धममुक्तं।

सर्व्वधर्म्मा अप्यायुष्मन् पूर्ण अबद्धा अमुक्ताः। असत्त्वादबद्धा अमुक्ताः। विविक्तत्वादबद्धा अमुक्ताः। अनुत्पन्नत्वादबद्धा अमुक्ताः। दानपारमिताप्यायुष्मन् पूर्ण अबद्धाऽमुक्ताः। शीलपारमिताऽबद्धा अमुक्ता। क्षान्तिपारमिताऽबद्धाऽमुक्ता। वीर्य्यपारमिताऽबद्धाऽमुक्ता। ध्यानपारमिताऽबद्धाऽमुक्ता। प्रज्ञापारमिताऽबद्धाऽमुक्ता। असत्त्वाद्दानपारमिताऽबद्धाऽमुक्ता। विविक्तत्वाद्दानपारमिताऽबद्धाऽमुक्ता। अनुत्पन्नत्वाद्दानपारमिताऽबद्धाऽमुक्ता। असत्त्वाच्छीलपारमिताऽबद्धाऽमुक्ता। विविक्तत्वाच्छीलपारमिताऽबद्धाऽमुक्ता। अनुत्पन्नत्वाच्छीलपारमिताऽबद्धाऽमुक्ता। असत्त्वात् क्षान्तिपारमिताऽबद्धाऽमुक्ता। विविक्तत्वात् क्षान्तिपारमिताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् क्षान्तिपारमिताऽबद्धाऽमुक्ता। असत्त्वाद्वीर्य्यपारमिताऽबद्धाऽमुक्ता। विविक्तत्वात् वीर्य्यपारमिताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् वीर्य्यपारमिताऽबद्धाऽमुक्ता। असत्त्वात् ध्यानपारमिताऽबद्धाऽमुक्ता। विविक्तत्वात् ध्यानपारमिताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् ध्यानपारमिताऽबद्धाऽमुक्ता। असत्त्वात् प्रज्ञापारमिताऽबद्धाऽमुक्ता। विविक्तत्वात् प्रज्ञापारमिताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् प्रज्ञापारमिताऽबद्धाऽमुक्ता।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यात्मशून्यताप्यबद्धाऽमुक्ता। बहिर्द्धाशून्यताप्यबद्धाऽमुक्ता। अध्यात्मबहिर्द्धाशून्यताप्यबद्धाऽमुक्ता। शून्यताशून्यताप्यबद्धाऽमुक्ता। महाशून्यताप्यबद्धाऽमुक्ता। परमार्थशून्यताप्यबद्धाऽमुक्ता। संस्कृतशून्यताप्यबद्धाऽमुक्ता। असंस्कृतशून्यताप्यबद्धाऽमुक्ता। अत्यन्तशून्यताप्यबद्धाऽमुक्ता। अनवराग्रशूताप्यबद्धाऽमुक्ता। अनवकारशून्यताप्यबद्धाऽमुक्ता। प्रकृतिशून्यताप्यबद्धाऽमुक्ता। सर्व्वधर्म्मशून्यताप्यबद्धाऽक्ता। स्वलक्षणशून्यताप्यबद्धाऽमुक्ता। अनुपलम्भशून्यताप्यबद्धाऽमुक्ता। अभावशून्यताप्यबद्धाऽमुक्ता। स्वभावशून्यताप्यबद्धाऽमुक्ता। अभावस्वभावशून्यताप्यबद्धाऽमुक्ता।

असत्त्वादध्यात्मशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादध्यात्मशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादध्यात्मशून्यताऽबद्धाऽमुक्ता। असत्त्वाद्बहिर्द्धाशून्यताऽबद्धाऽमुक्ता। विविक्तत्वाद्बहिर्द्धाशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वाद्बहिर्द्धाशून्यताऽबद्धाऽमुक्ता। असत्त्वादध्यात्मबहिर्द्धाशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादध्यात्मबहिर्द्धाशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादध्यात्मबहिर्द्धाशून्यताऽबद्धाऽमुक्ता। असत्त्वाच्छून्यताशून्यताऽबद्धाऽमुक्ता। विविक्तत्वाच्छून्यताशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वाच्छून्यताशून्यताऽबद्धाऽमुक्ता। असत्त्वान्महाशून्यताऽबद्धाऽमुक्ता। विविक्तत्वान्महाशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वान्महाशून्यताऽबद्धाऽमुक्ता। असत्त्वात्परमार्थशून्यताऽबद्धाऽमुक्ता। विविक्तत्वात्परमार्थशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात्परमार्थशून्यताऽबद्धाऽमुक्ता। असत्त्वात् संस्कृतशून्यताऽबद्धाऽमुक्ता। विविक्तत्वात् संस्कृतशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात् संस्कृतशून्यताऽबद्धाऽमुक्ता। असत्त्वाद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कृतशून्यताऽबद्धाऽमुक्ता । विविक्तत्वादसंस्कृतशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वादसंस्कृतशून्यताऽबद्धाऽमुक्ता। असत्त्वादत्यन्तशून्यताऽबद्धाऽमुक्ता । विविक्तत्वादत्यन्तशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वादत्यन्तशून्यताऽबद्धाऽमुक्ता। असत्त्वादनवराग्रशून्यताऽबद्धाऽमुक्ता। विविक्तत्वादनवराग्रशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वादनवराग्रशून्यताऽबद्धाऽमुक्ता । असत्त्वादनवकारशून्यताऽबद्धाऽमुक्ता । विविक्तत्वादनवकारशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वादनवकारशून्यताऽबद्धाऽमुक्ता । असत्त्वात्प्रकृतिशून्यताऽबद्धाऽमुक्ता । विविक्तत्वात्प्रकृतिशून्यताऽबद्धाऽमुक्ता। अनुत्पन्नत्वात्प्रकृतिशून्यताऽबद्धाऽमुक्ता । असत्त्वात् सर्व्वधर्म्मशून्यताऽबद्धाऽमुक्ता । विविक्तत्वात् सर्व्वधर्म्मशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वात् सर्व्वधर्म्मशून्यताऽबद्धाऽमुक्ता । असत्त्वात् स्वलक्षणशून्यताऽबद्धाऽमुक्ता । विविक्तत्वात् स्वलक्षणशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वात् स्वलक्षणशून्यताऽबद्धाऽमुक्ता। असत्त्वादनुपलम्भशून्यताऽबद्धाऽमुक्ता । विविक्तत्वादनुपलम्भशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वादनुपलम्भशून्यताऽबद्धाऽमुक्ता । असत्त्वादभावशून्यताऽबद्धाऽमुक्ता । विविक्तत्वादभावशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वादभावशून्यताऽबद्धाऽमुक्ता । असत्त्वात् स्वभावशून्यताऽबद्धाऽमुक्ता । विविक्तत्वात् स्वभावशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वात् स्वभावशून्यताऽबद्धाऽमुक्ता । असत्वादभावस्वभावशून्यताऽबद्धाऽमुक्ता । विविक्तत्वादभावस्वभावशून्यताऽबद्धाऽमुक्ता । अनुत्पन्नत्वादभावस्वभावशून्यताऽबद्धाऽमुक्ता ।

स्मृत्युपस्थानान्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि । सम्यक्प्रहाणान्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्यायुष्मन् पूर्णाबद्धान्यमुक्तानि। ऋद्धिपादा अप्यायुष्मन् पूर्णाबद्धा अमुक्ताः । इन्द्रियाण्यप्यायुष्मन् पूर्णाबद्धान्यमुक्तानि। बलान्यप्यायुष्मन् पूर्णाबद्धान्यमुक्तानि । बोध्यङ्गान्यप्यायुष्मन् पूर्णाबद्धान्यमुक्तानि । आर्य्याष्टाङ्गमार्गोप्यायुष्मन् पूर्णाऽबद्धोऽमुक्तः ।

असत्त्वात् स्मृत्युपस्थानान्यबद्धान्यमुक्तानि। विविक्तत्वात् स्मृत्युपस्थानान्यबद्धान्यमुक्तानि । अनुत्पन्नत्वात् स्मृत्युपस्थानान्यबद्धान्यमुक्तानि । असत्त्वात् सम्यक्प्रहाणान्यबद्धान्यमुक्तानि । विविक्तत्वात् सम्यक् प्रहाणान्यबद्धान्यमुक्तानि । अनुत्पन्नत्वात् सम्यक् प्रहाणान्यबद्धान्यमुक्तानि । असत्त्वादृद्धिपादा अबद्धा अमुक्ताः । विविक्तत्वादृद्धिपादा अबद्धा अमुक्ताः । अनुत्पन्नत्वादृद्धिपादा अबद्धा अमुक्ताः । असत्त्वादिन्द्रियान्यबद्धान्यमुक्तानि । विविक्तत्वादिन्द्रियाण्यबद्धान्यमुक्तानि । अनुत्पन्नत्वादिन्द्रियाण्यबद्धान्यमुक्तानि । असत्त्वाद्बलान्यबद्धान्यमुक्तानि । विविक्तत्वाद्बलान्यबद्धान्यमुक्तानि । अनुत्पन्नत्वाद्बलान्यबद्धान्यमुक्तानि। असत्त्वाद्बोध्यङ्गान्यबद्धान्यमुक्तानि। विविक्तत्वाद्बोध्यङ्गान्यबद्धान्यमुक्तानि । अनुत्पन्नत्वाद्बोध्यङ्गान्यबद्धान्यमुक्तानि। असत्त्वादार्य्याष्टाङ्गमार्गोऽबद्धोऽमुक्तः । विविक्तत्वादार्य्याष्टाङ्गमार्गोऽबद्धोऽमुक्तः। अनुत्पन्नत्वादार्य्याष्टाङ्गमार्गोऽबद्धोऽमुक्तः।

आर्य्यसत्यान्याप्यायुष्मन् पूर्णाबद्धान्यमुक्तानि । ध्यानान्यप्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि । अप्रमाणान्यायुष्मन् पूर्णाबद्धान्यमुक्तानि । आरूप्यसमापत्तयोऽप्यायुष्मन् पूर्णाबद्धा अमुक्ताः । विमोचा अप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः । अनुपूर्व्वविहारसमापत्तयोऽप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः । शून्यतानिमित्ता प्रणिहितविमोचमुखान्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युष्मन् पूर्णाऽबद्धान्यमुक्तानि। अभिज्ञा अप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः। सर्व्वसमाधयोऽप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः। सर्व्वधारणी-मुखान्यप्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि।

तत्कस्य हेतोः। असत्त्वादायुष्मन् पूर्णार्य्यसत्यान्यबद्धान्यमुक्तानि। विविक्तत्वादार्य्यसत्यान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वादार्य्यसत्यान्य-बद्धान्यमुक्तानि। असत्त्वादायुष्मन् पूर्णध्यानान्यबद्धान्यमुक्तानि। विविक्तत्वात् ध्यानान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वात् ध्यानान्यबद्धान्य-मुक्तानि। असत्त्वादायुष्मन् पूर्णाऽप्रमाणान्यबद्धान्यमुक्तानि। विविक्तत्वादप्रमाणान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वादप्रमाणान्यबद्धान्य-मुक्तानि। असत्त्वादायुष्मन् पूर्णारूप्यसमापत्तयोऽबद्धा अमुक्ताः। विविक्तत्वादारूप्यसमापत्तयोऽबद्धा अमुक्ताः। अनुत्पन्नत्वादारूप्यसमा-पत्तयोऽबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णविमोचा अबद्धा अमुक्ताः। विविक्तत्वाद्विमोचा अबद्धा अमुक्ताः। अनुत्पन्नत्वाद्विमोचा अबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णनवानुपूर्व्वविहारसमापत्तयो-ऽबद्धा अमुक्ता। विविक्तत्वान्नवानुपूर्व्वविहारसमापत्तयोबद्धा अमुक्ताः। अनुत्पन्नत्वान्नवानुपूर्व्वविहारसमापत्तयोऽबद्धा अमुक्ताः। असत्त्वादायुष्मन् पूर्णशून्यतानिमित्ताप्रणिहितविमोचमुखान्यबद्धान्य-मुक्तानि। विविक्तत्वाच्छून्यतानिमित्ताप्रणिहितविमोचमुखान्यबद्धा-न्यमुक्तानि। अनुत्पन्नत्वाच्छून्यतानिमित्ताप्रणिहितविमोचमुखान्य-बद्धान्यमुक्तानि। असत्त्वादायुष्मन् पूर्णाऽभिज्ञा अबद्धा अमुक्ताः। विविक्तत्वादभिज्ञा अबद्धा अमुक्ताः। अनुत्पन्नत्वादभिज्ञा अबद्धा अमुक्ताः। असत्त्वदायुष्मन् पूर्णसमाधयोऽबद्धा अमुक्ताः। विविक्तत्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाधयोऽबद्धा अमुक्ताः। अनुत्पन्नत्वात् समाधयोऽबद्धा अमुक्ताः असत्त्वादायुष्मन् पूर्णधारणीमुखान्यबद्धान्यमुक्तानि। विविक्तत्वाद्धारणीमुखान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वाद्धारणीमुखान्यबद्धान्यमुक्तानि।

तथागतबलान्यप्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि। वैशारद्यान्यप्यायुष्मन् पूर्णाऽबद्धान्यमुक्तानि। प्रतिसम्विदोऽप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः। महामैत्र्यप्यायुष्मन् पूर्णाबद्धाऽमुक्ता। महाकरुणाऽप्यायुष्मन् पूर्णाबद्धाऽमुक्ता। आवेणिकबुद्धधर्म्मा अप्यायुष्मन् पूर्णाऽबद्धा अमुक्ताः। तत्कस्य हेतोः। असत्त्वादायुष्मन् पूर्णतथागतबलान्यबद्धान्यमुक्तानि। विविक्तत्वात्तथागतबलान्यबद्धान्यमुक्तानि। अनुत्पन्नत्वात्तथागतबलान्यबद्धान्यमुक्तानि। असत्त्वाद्वैशारद्यान्यबद्धाऽन्यमुक्तानि। विविक्तत्वाद्वैशारद्यान्यबद्धान्यमुक्तानि। असत्त्वाद्वैशारद्यान्यबद्धाऽन्यमुक्तानि। असत्त्वात् प्रतिसम्विदोऽबद्धा अमुक्ताः। विविक्तत्वात् प्रतिसम्विदोऽबद्धा अमुक्ताः। अनुत्पन्नत्वात् प्रतिसम्विदोऽबद्धा अमुक्ताः। असत्त्वान्महामैत्री अबद्धाऽमुक्ता। विविक्तत्वान्महामैत्री अबद्धाऽमुक्ता। अनुत्पन्नत्वान्महामैत्री अबद्धाऽमुक्ता। असत्वान्महाकरुणाऽबद्धाऽमुक्ता। विविक्तत्वान्महाकरुणाऽबद्धाऽमुक्ता। अनुत्पन्नत्वान्महाकरुणाऽबद्धाऽमुक्ता। असत्त्वादावेणिकबुद्धधर्म्मा अबद्धा अमुक्ताः। विविक्तत्वादावेणिकबुद्धधर्म्मा अबद्धा अमुक्ताः। अनुत्पन्नत्वादावेणिकबुद्धधर्म्मा अबद्धा अमुक्ताः।

सर्व्वज्ञताऽप्यायुष्मन् पूर्णाऽबद्धाऽमुक्ता। मार्गाकारज्ञताप्यायुष्मन् पूर्णाबद्धाऽमुक्ता। सर्व्वाकारज्ञताऽप्ययुष्मन् पूर्णाऽबद्धाऽमुक्ता।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

असत्तामुपादाय सर्व्वज्ञताऽबद्धाऽमुक्ता। विविक्ततामुपादाय सर्व्वज्ञताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादाय सर्व्वज्ञताऽबद्धाऽमुक्ता। असत्तामुपादाय मार्गाकारज्ञताऽबद्धाऽमुक्ता। विविक्ततामुपादाय मार्गाकारज्ञताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादाय मार्गाकारज्ञताऽबद्धाऽमुक्ता। असत्तामुपादाय सर्व्वाकारज्ञताऽबद्धाऽमुक्ता। विविक्ततामुपादाय सर्व्वाकारज्ञताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादाय सर्व्वाकारज्ञताऽबद्धाऽमुक्ता। बोधिसत्त्वोऽप्यायुष्मन् पूर्णाऽबद्धोऽमुक्तः। बुद्धोऽप्यबद्धोऽमुक्तः। असत्तामुपादाय बोधिसत्त्वोऽबद्धोऽमुक्तः। विविक्ततामुपादाय बोधिसत्त्वोऽबद्धोऽमुक्तः। अनुत्पन्नतामुपादाय बोधिसत्त्वोऽबद्धोऽमुक्तः। असत्तामुपादाय बुद्धोऽबद्धोऽमुक्तः। विविक्ततामुपादाय बुद्धोऽबद्धोऽमुक्तः। अनुत्पन्नतामुपादाय बुद्धोऽबद्धोऽमुक्तः। तथताप्यायुष्मन् पूर्णाऽबद्धाऽमुक्ता। अवितथताप्यबद्धाऽमुक्ता। अनन्यतथताप्यबद्धाऽमुक्ता। धर्म्मताप्यबद्धाऽमुक्ता। धर्म्मधातुरप्यबद्धोऽमुक्तः। धर्म्मनियामताप्यबद्धाऽमुक्तः। भूतकोटिरप्यबद्धाऽमुक्तः। असत्तामुपादाय तथताऽबद्धाऽमुक्ता। विविक्ततामुपादाय तथताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादाय तथताऽबद्धाऽमुक्ता। असत्तामुपादाय अवितथताऽबद्धाऽमुक्ता। विविक्ततामुपादायाऽवितथताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादायाऽवितथताऽबद्धाऽमुक्ता। असत्तामुपादायाऽनन्यतथताऽबद्धाऽमुक्ता। विविक्ततामुपादायाऽनन्यतथताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादायाऽनन्यतथताऽबद्धाऽमुक्ता। असत्तामुपादाय धर्म्मताऽबद्धाऽमुक्ता। विविक्ततामुपादाय धर्म्मताऽबद्धाऽमुक्ता। अनुत्पन्नतामुपादाय धर्म्मताऽबद्धाऽमुक्ता।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

असत्ततामुपादाय धर्म्मधातुरबद्धोऽमुक्तः । विविक्ततामुपादाय धर्म्मधातुरबद्धोऽमुक्तः । अनुत्पन्नतामुपादाय धर्म्मधातुरबद्धोऽमुक्तः । असत्तामुपादाय धर्म्मस्थितिताऽबद्धाऽमुक्ता । विविक्ततामुपादाय धर्म्मस्थितिताऽबद्धाऽमुक्ता । अनुत्पन्नतामुपादाय धर्म्मस्थितिताऽबद्धाऽमुक्ता । असत्तामुपादाय धर्म्मनियामताऽबद्धाऽमुक्तः । विविक्तताऽमुपादाय धर्म्मनियामताऽबद्धाऽमुक्ता । अनुत्पन्नतामुपादाय धर्म्मनियामताऽबद्धाऽमुक्ता । असत्तामुपादाय भूतकोटिरबद्धोऽमुक्तः । विविक्ततामुपादाय भूतकोटिरबद्धोऽमुक्तः अनुत्पन्नतामुपादाय भूतकोटिरबद्धोऽमुक्तः । असंस्कृतमप्यायुष्मन् पूर्णाबद्धममुक्तः । असत्तामुपादायाऽसंस्कृतमबद्धममुक्तः । विविक्त्तामुपादायाऽसंस्कृतमबद्धममुक्तः अनुत्पन्नतामुपादायाऽसंस्कृतमबद्धममुक्तं इदमायुष्मन् पूर्णबोधिसत्त्वानां महासत्त्वानामामः । अबद्धममुक्तं नामधर्म्ममुखं ।

यद्दानपारमिताऽबद्धामुक्ता । शीलपारमिताऽबद्धाऽमुक्ता । क्षान्तिपारमिताऽबद्धाऽमुक्ता । वीर्य्यपारमिताऽबद्धाऽमुक्ता । ध्यानपारमिताऽबद्धाऽमुक्ता । प्रज्ञापारमिताऽबद्धाऽमुक्ता । अध्यात्मशून्यताऽबद्धाऽमुक्ता । वहिर्द्धाशून्यताऽबद्धाऽमुक्ता । अध्यात्मवहिर्द्धाशून्यताऽबद्धाऽमुक्ता । शून्यताशून्यताऽबद्धाऽमुक्ता । महाशून्यताऽबद्धाऽमुक्ता । परमार्थशून्यताऽबद्धाऽमुक्ता । संस्कृतशून्यताऽबद्धाऽमुक्ता । असंस्कृतन्यताऽबद्धाऽमुक्ता । अत्यन्तशून्यताऽबद्धाऽमुक्ता । अनवराग्रशून्यताऽबद्धाऽमुक्ता । अनवकारशून्यताऽबद्धाऽमुक्ता । प्रकृतिशून्यताऽबद्धाऽमुक्ता । सर्व्वधर्म्मशून्यताऽबद्धाऽमुक्ता । स्वलक्षणशून्यताऽबद्धा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽमुक्ता। अनुपलम्भशून्यताऽबद्धाऽमुक्ता। अभावशून्यताऽबद्धाऽमुक्ता। स्वभावशून्यताऽबद्धाऽमुक्ता। अभावस्वभावशून्यताऽबद्धाऽमुक्ता।

स्मृत्युपस्थानान्यबद्धान्यमुक्तानि। सम्यक्प्रहाणान्यावद्धान्यमुक्तानि। ऋद्धिपादा अबद्धा अमुक्ताः। इन्द्रियाण्यबद्धान्यमुक्तानि। बलान्य-बद्धान्यमुक्तानि। बोध्यङ्गान्यबद्धान्यमुक्तानि। आर्य्याष्टाङ्गमार्गो-ऽबद्धोऽमुक्तः। आर्य्यसत्यान्यबद्धान्यमुक्तानि। ध्यानान्यबद्धान्यमुक्तानि। अप्रमाणान्यबद्धान्यमुक्तानि। आरूप्यसमापत्तयोऽबद्धा अमुक्ताः। विमोचा अबद्धा अमुक्ताः। अनुपूर्व्वविहारसमापत्तयोऽबद्धा अमुक्ताः। शून्यतानिमित्ताऽप्रणिहितविमोचमुखान्यबद्धान्यमुक्तानि। अभिज्ञा अबद्धाऽमुक्ता। समाधयोऽबद्धा अमुक्ताः। धारणीमुखान्यबद्धान्य-मुक्तानि। तथागतबलान्यबद्धान्यमुक्तानि। वैशारद्यान्यबद्धान्यमुक्तानि। प्रतिसम्विदोऽबद्धा अमुक्ताः। महामैत्र्यबद्धाऽमुक्ता। महाकरुणा-ऽबद्धाऽमुक्ता। आवेणिकबुद्धधर्म्मा अबद्धा अमुक्ताः। बोधिरबद्धा-ऽमुक्ता। सर्व्वज्ञताऽबद्धाऽमुक्ता। मार्गाकारज्ञताऽबद्धाऽमुक्ता। सर्व्वाकारज्ञताऽबद्धाऽमुक्ता। बोधिसत्त्वोऽबद्धोऽमुक्तः। बुद्धोऽबद्धो-ऽमुक्तः। तथताऽबद्धाऽमुक्ता। अवितथताऽबद्धाऽमुक्ता। अनन्यतथता-ऽबद्धाऽमुक्ता। धर्म्मताऽबद्धाऽमुक्ता। धर्म्मधातुरबद्धोऽमुक्तः। धर्म्म-स्थितिताऽबद्धाऽमुक्ता। धर्म्मनियामताऽबद्धाऽमुक्ता। भूतकोटि-रबद्धोऽमुक्तः। असंस्कृतताऽबद्धाऽमुक्ता।

सोऽबद्धाऽमुक्तायां दानपारमितायां स्थिता। अबद्धाऽमुक्तायां शीलपारमितायां स्थिता। अबद्धाऽमुक्तायां चान्तिपारमितायां स्थिता। अबद्धाऽमुक्तायां वीर्य्यपारमितायां स्थिता। अबद्धाऽमुक्तायां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्यानपारमितायां स्थिता। अबद्धाऽमुक्तायां प्रज्ञापारमितायां स्थिता। अबद्धाऽमुक्तायामध्यात्मशून्यतायां स्थिता। अबद्धाऽमुक्तायां बहिर्द्धाशून्यतायां। स्थिता अबद्धाऽमुक्तायामध्यात्मबहिर्द्धाशून्यतायां स्थिता। अबद्धाऽमुक्तायां शून्यताशून्यतायां स्थिता। अबद्धाऽमुक्तायां महाशून्यतायां स्थिता। अबद्धाऽमुक्तायां परमार्थशून्यतायां स्थिता। अबद्धाऽमुक्तायां संस्कृतशून्यतायां स्थिता। अबद्धाऽमुक्तायामसंस्कृत-शून्यतायां स्थिता। अबद्धाऽमुक्तायामत्यन्तशून्यतायां स्थिता। अबद्धा-ऽमुक्तायामनवराग्रशून्यतायां स्थिता। अबद्धाऽमुक्तायामनवकारशून्य-तायां स्थिता। अबद्धाऽमुक्तायां प्रकृतिशून्यतायां स्थिता। अबद्धा-ऽमुक्तायां सर्व्वधर्म्मशून्यतायां स्थिता। अबद्धाऽमुक्तायां स्वलक्षणशून्य-तायां स्थिता। अबद्धाऽमुक्तायामनुपलम्भशून्यतायां स्थिता। अबद्धा-ऽमुक्तायामभावशून्यतायां स्थिता। अबद्धाऽमुक्तायां स्वभावशून्यतायां स्थिता। अबद्धाऽमुक्तायामभावस्वभावशून्यतायां स्थिता। अबद्धा-ऽमुक्तेषु चतुर्षु स्मृत्युपस्थानेषु स्थिता। अबद्धाऽमुक्तेषु चतुर्षु सम्यक् प्रहाणेषु स्थिता। अबद्धाऽमुक्तेषु चतुर्षु ऋद्धिपादेषु स्थिता। अबद्धा-ऽमुक्तेषु पञ्चस्विन्द्रियेषु स्थिता। अबद्धाऽमुक्तेषु पञ्चसु बलेषु स्थिता। अबद्धाऽमुक्तेषु सप्तसु बोध्यङ्गेषु स्थिता। अबद्धाऽमुक्ते आर्य्याष्टाङ्गमार्गे स्थिता। अबद्धाऽमुक्तेष्वार्य्यसत्येषु स्थिता। अबद्धाऽमुक्तेषु चतुर्षु ध्यानेषु स्थिता। अबद्धाऽमुक्तेषु चतुर्ष्वप्रमाणेषु स्थिता। अबद्धाऽमुक्तासु चतुर्ष्वा-रूप्यसमापत्तिषु स्थिता। अबद्धाऽमुक्तेषु अष्टासु विमोक्षेषु स्थिता। अबद्धाऽमुक्तासु नवस्वनुपूर्व्वविहारसमापत्तिषु स्थिता। अबद्धाऽमुक्तेषु शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु स्थिता। अबद्धाऽमुक्तास्वभि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञासु स्थित्वा। अबद्धामुक्तेषु समाधिषु स्थित्वा। अबद्धामुक्तेषु धारणी-मुखेषु स्थित्वा। अबद्धामुक्तेषु दशसु तथागतबलेषु स्थित्वा। अबद्धा-मुक्तेषु चतुर्षु वैशारद्येषु स्थित्वा। अबद्धामुक्तासु चतसृषु प्रतिसम्वित्सु स्थित्वा। अबद्धामुक्तायां महामैत्र्यां स्थित्वा। अबद्धामुक्तायां महा-करुणायां स्थित्वा। अबद्धामुक्तेष्वावेणिकबुद्धधर्मेषु स्थित्वा। अबद्धा-मुक्तायां बोधौ स्थित्वा। अबद्धामुक्तायां सर्व्वज्ञतायां स्थित्वा। अबद्धा-मुक्तायां मार्गाकारज्ञतायां स्थित्वा। अबद्धामुक्तायां सर्व्वाकारज्ञतायां स्थित्वा। अबद्धामुक्तायां तथतायां स्थित्वा। अबद्धामुक्तायामवि-तथतायां स्थित्वा। अबद्धामुक्तायामनन्यतथतायां स्थित्वा। अबद्धा-मुक्तायां धर्म्मतायां स्थित्वा। अबद्धामुक्ते धर्म्मधातौ स्थित्वा। अबद्धा-मुक्तायां धर्म्मस्थितितायां स्थित्वा। अबद्धामुक्तायां धर्म्मनियामतायां स्थित्वा। अबद्धामुक्तायां भूतकोटौ स्थित्वा। अबद्धामुक्तेऽसंस्कृते स्थित्वा। अबद्धामुक्तोऽबद्धामुक्तान् सत्त्वान् परिमोचयिष्यति।

अबद्धामुक्तोऽबद्धामुक्तं बुद्धक्षेत्रं परिशोधयिष्यति। अबद्धा-मुक्तोऽबद्धामुक्तान् बुद्धान् भगवतः पर्य्युपासिष्यत। अबद्धामुक्तो-ऽबद्धामुक्तान् धर्म्मान् श्रोष्यति। अबद्धामुक्तोऽबद्धामुक्तैर्बुद्धैर्भगव-द्भिर्नजातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्ताभिरभिज्ञा-भिर्न जातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्तैः पञ्चभिश्च-क्षुर्भिर्न जातुविरहितो भवति। अबद्धामुक्तोऽबद्धामुक्ताभिर्धारणी-भिर्न जातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्तैः समाधि-भिर्न जातुविरहितो भविष्यति। अबद्धामुक्तोऽबद्धामुक्तां मार्गा-कारज्ञतामुत्पादयिष्यति। अबद्धामुक्तोऽबद्धामुक्तां सर्व्वज्ञतां सर्व्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारज्ञतामभिसम्भोत्स्यते। अबद्धामुक्तोऽबद्धामुक्तं धर्मचक्रं प्रवर्त्तयिष्यति। अबद्धामुक्तोऽबद्धामुक्तान् सत्त्वां स्त्रिषु यानेषु नियोजयिष्यति। एवं खल्वायुष्मन् पूर्ण बोधिसत्त्वो महासत्त्वोऽबद्धामुक्तोऽबद्धामुक्ताभिः षड्भिः पारमिताभिः सर्व्वधर्म्मा ननु भोत्स्यते। असत्ताषु पादाय विविक्ततामुपादाय। अनुत्पादतामुपादय।

एवं खल्वायुष्मन् पूर्ण बोधिसत्त्वो महासत्त्वोऽबद्धामुक्तो महायान सन्नाह सन्नद्ध इति वेदितव्यः।

अथायुष्मन् सुभूतिर्भगवन्तमेतदवोचत्। कतमद्भगवन् बोधिसत्त्वस्य महासत्त्वस्य महायानं। कियन्तो भगवन् बोधिसत्त्वो महासत्त्वो महायानसंप्रस्थिता वेदितव्याः। कुतस्तद्यानं निर्यास्यति। क्वातद्यानं स्थास्यति। को वा तेन यानेन निर्यास्यति। एवमुक्ते भगवानायुष्मन्तं सुभूतिमेतदवोचत्। यत्सुभूते एवं वदसि। कतमद्बोधिसत्त्वस्य महासत्त्वस्य महायानं। षट्पारमिता सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। कतमे षट्। दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्य्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता।

इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्तैर्मनसिकारैर्दानमर्थिभ्यो ददाति यदुताऽध्यात्मिकवाह्यानि वस्तूनि तच्च सर्व्वसत्त्वैः सार्द्धं साधारणं कृत्वा अनुत्तरायां सम्यक् सम्बोधौ परिणामयत्यनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य दानपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य शीलपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वाकारज्ञता प्रतिसंयुक्तैश्चित्तोत्पादैरात्मना च दशकुशलान् कर्म्मपथान् समादाय वर्त्तते। परांश्च दशकुशलेषु कर्म्मपथेषु समादापयति निवेशयति प्रतिष्ठापयति अनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य परामृष्टा शीलपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्तै र्मनसिकारैरात्मनाचक्षान्तिसम्पन्नो भवति। परांश्च क्षान्तौ समादापयन्त्यनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य क्षान्तिपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य वीर्य्यपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञताप्रतिसंयुक्तै र्मनसिकारैरात्मना च पञ्चसु पारमितास्वनिक्षिप्तधुरो भवति। परांश्च पञ्चसु पारमितासु नियोजयत्यनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य वीर्य्यपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य ध्यानपारमिता। भगवानाह। इह सुभूते बोधिसत्त्वो महासत्त्वः सर्व्वाकारज्ञता प्रतिसंयुक्तै र्मनसिकारैरुपाय कौशलेन ध्यानानि समापद्यते। परांश्च ध्यानेषु समादापयत्यनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य ध्यानपारमिता। आह। कतमा भगवन् बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमिता। भगवानाह। इह सुभूते बोधिसत्त्वस्य महासत्त्वस्य सर्व्वाकारज्ञता प्रतिसंयुक्तैश्चित्तोत्पादैरात्मना च सर्व्वधर्म्मानाऽभिनिविशते। सर्व्वधर्म्मानाञ्च प्रकृतिं प्रत्यवेक्षते अनुपलम्भयोगेन। सर्व्वधर्म्माननभिनिविश्य सर्व्वधर्म्मप्रकृतिप्रत्यवे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षणतायां सत्त्वान् समादापयति निवेशयति प्रतिष्ठापयति अनुपलम्भयोगेन। इयं बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमिता। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुताऽध्यात्मशून्यता, वहिर्द्धाशून्यता, अध्यात्मवहिर्द्धाशून्यता, शून्यताशून्यता महाशून्यता, परमार्थशून्यता, संस्कृतशून्यता, असंस्कृतशून्यता। अत्यन्तशून्यता, अनवराग्रशून्यता, अनवकारशून्यता, प्रकृतिशून्यता, सर्व्वधर्म्मशून्यता, स्वलक्षणशून्यता, अनुपलम्भशून्यता, अभावशून्यता, स्वभावशून्यता, अभावस्वभावशून्यता।

तत्र कतमाऽध्यात्मशून्यता, आध्यात्मिकाधर्म्मा उच्यन्ते। चक्षुः श्रोत्रं घ्राणं जिह्वाकायोमनः। तत्र चक्षुश्चक्षुषाशून्यमकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। श्रोत्रं श्रोत्रेण शून्यमकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। घ्राणं घ्राणेन शून्यमकूटस्थाविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। जिह्वा जिह्वया शून्याऽकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। कायः कायेन शून्योऽकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। मनोमनसा शून्यमकूटस्थाविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यतेऽध्यात्मशून्यता।

तत्र कतमा वहिर्द्धाशून्यता, वाह्याधर्म्मा उच्यन्ते रूपशब्दगन्धरसस्पर्शधर्म्मा। तत्र रूपं रूपेण शून्यमकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। शब्दः शब्देन शून्योऽकूटस्थाऽविना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। गन्धो गन्धेन शून्यो-ऽकूटस्थाऽविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। रसो-रसेन शून्योऽकूटस्थाऽविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृति-रस्यैषा। स्पर्शः स्पर्शेन शून्योऽकूटस्थाऽविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। धर्म्माधर्म्मैः शून्या अकूटस्थाऽविनाश्रितामुपा-दाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यते वहिर्द्धाशून्यता।

तत्र कतमाऽध्यात्मवहिर्द्धाशून्यता, षडाध्यात्मिकान्यायतनानि, इमे उच्यन्ते आध्यात्मिकवाह्यधर्म्माः। तत्राध्यात्मिकाधर्म्मा वाह्य-धर्म्मैः शून्याः अकूटस्थाऽविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इमे वाह्याधर्म्माः आध्यात्मिकैधर्म्मैः शून्याः अकूटस्था-ऽविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यते अध्यात्मवहिर्द्धाशून्यता। तत्र कतमाशून्यताशून्यता। या सर्व्व-धर्म्माणां शून्यता तया शून्यतया शून्या शून्यताऽकूटस्थाऽविनाश्रिता-मुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यते शून्यता-शून्यता। तत्र कतमामहाशून्यता, पूर्व्वादिक् पूर्व्वयादिशा शून्या, दक्षिणादिग्दक्षिणयादिशाशून्या। पश्चिमादिक् पश्चिमयादिशा शून्या। उत्तरादिगुत्तरयादिशा शून्या। अधस्ताद्दिगधस्ताद्दिशा शून्या। उपरिष्टाद्दिगुपरिष्टाद्दिशा शून्या। एवं विदिशोविदिग्भिः शून्या। अकूटस्थाऽविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरा-सामियं। इयमुच्यते महाशून्यता। तत्र कतमा परमार्थशून्यता। परमार्था उच्यन्ते ये निर्व्वान्ति। तत्र निर्व्वाणं निर्व्वाणेन शून्य मकूटस्थाविनाश्रितामुपादाय। तत्कस्य हेतोः प्रकृतिरेषामियं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इयमुच्यते परमार्थशून्यता । तत्र कतमा संस्कृतशून्यता । संस्कृत-मुच्यते । कामधातुः रूपधातुः आरूप्यधातुः तत्र कामधातुः कामधातुना शून्यः । रूपधातूरूपधातुना शून्यः । आरूप्यधातु-रारूप्यधातुना शून्यः अकूटस्थाऽविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरेषामियं । इयमुच्यते संस्कृतशून्यता । तत्र कतमाऽसंस्कृत-शून्यता । असंस्कृतमुच्यते यस्य नोत्पादो न निरोधो न स्थिते-रन्यथात्वमिदमुच्यते । संस्कृतं । तत्राऽसंस्कृतमसंस्कृतेन शून्यमकूट-स्थाऽविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमु-च्यतेऽसंस्कृतशून्यता । तत्र कतमाऽत्यन्तशून्यता यस्यान्तोनोपलभ्यते तदत्यन्तं । अत्यन्तमत्यन्तेन शून्यमकूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा इयमुच्यतेऽत्यन्तशून्यता । तत्र कतमा-ऽनवराग्रशून्यता । यस्याऽवरं नोपलभ्यते । नाऽग्रं तस्यागतिर्नोप-लभ्यते नोगतिः । अनवराग्रमनवराग्रेण शून्यमकूटस्थाविनाशि-तामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यते ऽनवरा-ग्रशून्यता । तत्र कतमाऽनवकारशून्यता । यत्र न कस्यचिद्धर्म्मस्य च्छोरणमस्ति, अनवकारोऽनवकारेण शून्योऽकूटस्थाऽविनाशिता-मुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषा । इयमुच्यतेऽनवकारशून्यता । तत्र कतमाप्रकृतिशून्यता, या सर्व्वधर्म्माणां प्रकृतिः संस्कृतानां वाऽ-संस्कृतानां वा, सा न श्रावकैः कृता न प्रत्येकबुद्धैः न बोधिसत्त्वै महासत्त्वैः न तथागतैरर्हद्भिः सम्यक् सम्बुद्धैः कृता प्रकृतिः प्रकृ-त्याशून्याऽकूटस्थाऽविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्या इयं । इयमुच्यते प्रकृतिशून्यता । तत्र कतमासर्व्वधर्म्मशून्यता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वधर्म्मा उच्यन्ते। रूपं वेदनासंज्ञासंस्काराविज्ञानं चक्षुःश्रोत्र घ्राणं जिह्वा कायमनः। रूपं शब्दोगन्धोरसः स्पर्शोधर्म्माः। चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं मनोविज्ञानं। चक्षुःसंस्पर्शः श्रोत्रसंस्पर्शः घ्राणसंस्पर्शः जिह्वासंस्पर्शः कायसंस्पर्श मनःसंस्पर्शः। चक्षुःसंस्पर्शजावेदना, श्रोत्रसंस्पर्शजावेदना, घ्राणसंस्पर्शजावेदना, जिह्वासंस्पर्शजावेदना, कायसंस्पर्शजावेदना, मनःसंस्पर्शजावेदना। रूपिणोधर्म्माः। अरूपिणोधर्म्माः। संस्कृताधर्म्मा, असंस्कृताधर्म्माः। इमे उच्यन्ते सर्व्वधर्म्माः। सर्व्वधर्म्माः सर्व्वधर्म्मैः शून्याः अकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरेषामियं। इयमुच्यते सर्व्वधर्म्मशून्यता। तत्र कतमा स्वलक्षणशून्यता। रूपलक्षणं रूपमनुपलम्भनामलक्षणावेदना। उद्ग्रहणलक्षणासंज्ञा। अभिज्ञासंस्कारलक्षणाः संस्काराः। विज्ञानलक्षणं विज्ञानं। दुःखलक्षणाः स्कन्धाः। आशीविषलक्षणाधातवः। आपद्द्वारलक्षणान्यायतनानि। सामग्रीलक्षणः। प्रतीत्यसमुत्पादः। परित्यागलक्षणा दानपारमिताः। अनुद्दाहलक्षणा शीलपारमिता। अकोपनालक्षणा क्षान्तिपारमिताः। अनवमद्यलक्षणा वीर्य्यपारमिता। संग्रहलक्षणा ध्यानपारमिता। असङ्गलक्षणा प्रज्ञापारमिता। अक्षोपनालक्षणानि चत्वारि ध्यानानि, चत्वार्य्यप्रमाणानि चतस्र आरूप्यसमापत्तयः। नैर्य्यानिकलक्षणाः सप्तत्रिंशद्बोधिपक्षाधर्म्माः। विविक्तलक्षणं शून्यताविमोक्षमुखं। शान्तलक्षणमानिमित्तविमोक्षमुखं। दुःखामोहलक्षणमप्रणिहितविमोक्षमुखं। विमोचनालक्षणा विमोक्षाः। सुनिश्चितलक्षणानि बलानि। सुप्रतिष्ठितलक्षणानि वैशारद्यानि। अना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छेद्यलक्षणाः प्रतिसम्विदः। हितोपसंहारलक्षणा महामैत्री। त्राणलक्षणा महाकरुणा। प्रामोद्यलक्षणा महामुदिता। असंकीर्ण-लक्षणा महोपेक्षा। असंहार्य्यलक्षणा अष्टादशावेणिका बुद्धधर्म्माः। प्रत्यक्षालक्षणा सर्व्वाकारज्ञताज्ञानं। यच्च संस्कृतानां धर्म्माणां लक्षणं यच्चाऽसंस्कृतानां धर्म्माणां लक्षणं। स्वेनस्वेनलक्षणेन सर्व्व एते धर्म्माः शून्याः अकूटस्थाऽविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरे-षामियं। इयमुच्यते स्वलक्षण शून्यता। तत्र कतमा अनुपलम्भ शून्यता। यच्चाऽतीतं नोपलभ्यते। अनागतं नोपलभ्यते। प्रत्युत्पन्नस्य स्थितिर्नोपलभ्यते। अनुपलम्भोऽनुपलम्भेन शून्योऽकूटस्थाविनाशिता-मुपादाय। तत्खस्य हेतोः प्रकृतिरस्यैषा। इयमुच्यतेऽनुपलम्भ-शून्यता। तत्र कतमा। *भावस्वभावशून्यता। नास्ति सांयोगिकः स्वभावः प्रतीत्यसमुपन्नत्वात् सर्व्वधर्म्माणां। संयोगः संयोगेन शून्यो ऽकूटस्थाविनाशितामुपादाय। तत्कस्य हेतोः प्रकृतिरस्यैषा। इय-मुच्यतेऽभावस्वभावशून्यता। पुनरपरं सुभूते भावोभावेन शून्याः। अभावोऽभावेनशून्यः। स्वभावः स्वभावेन शून्यः। परभावः परभावेन शून्यः। तत्र कतमाभावः। भाव उच्यते पञ्चस्कन्धाः। पञ्चस्कन्धाः पञ्चस्कन्धै शून्याः। एवं भावोभावेन शून्यः। कतमभावः स्वभावेन शून्यः। अभाव उच्यतेऽसंस्कृतं। तच्चाऽसंस्कृतमसंस्कृतेन शून्यं। अभावोऽभावेन शून्यः। स्वभावः स्वभावेन शून्यं। परभावः पर-भावेन शून्यः। स्वभाव उच्यते प्रकृतिरविपरीतं। तत्र या शून्यता

---

* आदर्शपुस्तके ऽभावस्नून्यता स्वभावस्नून्यतयोरत्रनिर्देशोनास्ति किन्तु पश्चात्तयोर्व्विवरणं दृश्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानज्ञानेन ज्ञाता न दर्शनेन। इयमुच्यते स्वभावशून्यता। तत्र कतमापरभावः शून्यता। या उत्पादाद्वा तथागतानामनुत्पादाद्वा तथागतानां स्थितैरेष धर्म्मस्थितिता, धर्म्मता धर्म्मधातु धर्म्मनियामता। तथता अवितथता, अनन्य तथता, भूतकोटिः। इति हि येषां धर्म्माणां परेण शून्यता। इयमुच्यते परभावशून्यता। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत-शूरङ्गमोनाम समाधिः। रत्नमुद्रानाम समाधिः। सिंहविक्रीड़ितोनाम समाधिः। सुचन्द्रोनाम समाधिः। चन्द्रध्वजकेतुर्नाम समाधिः। सर्व्वधर्म्मोद्गतोनाम समाधिः। अधिवचनसंप्रवेशोनाम समाधिः। विलोकितमूर्द्धोनाम समाधिः। धर्म्मधातुनियतोनाम समाधिः। नियतध्वजकेतुर्नाम समाधिः। वज्रोनाम समाधिः। सर्व्वधर्म्मप्रवेशमुद्रानाम समाधिः। समाधिराजसुप्रतिष्ठितोनाम समाधिः। रश्मिप्रमुक्तोनाम समाधिः। बलव्यूहोनाम समाधिः। समुद्गतोनाम समाधिः। निरुक्तानियतप्रवेशोनाम समाधिः। अधिवचनसंप्रवेशोनाम समाधिः। दिग्विलोकितोनाम समाधिः। आधारमुद्रानाम समाधिः। असम्प्रमोषोनाम समाधिः। सर्व्वधर्म्मसमवसरणसागरमुद्रानाम समाधिः। आकाशस्फुरणोनाम समाधिः। वज्रमण्डलोनाम समाधिः। ध्वजाग्रकेयूरोनाम समाधिः। इन्द्रकेतुर्नाम समाधिः। स्रोतोऽनुगतोनाम समाधिः। सिंहविजृम्भितोनाम समाधिः। व्यस्तस्तोनामसमाधिः। रणञ्जहोनाम समाधिः। वैरोचनोनाम समाधिः। अनयोनाम समाधिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनिकेतस्थितोनाम समाधिः। निश्चिन्तोनाम समाधिः। विमल-प्रदीपोनाम समाधिः। अनन्तप्रभोनाम समाधिः। प्रभाकरोनाम समाधिः। समन्तावभासोनाम समाधिः। शुद्धसारोनाम समाधिः। विमलप्रभोनाम समाधिः। रतिङ्करोनाम समाधिः। विद्युत्प्रदीपोनाम समाधिः। अक्षयोनाम समाधिः। अजेयोनाम समाधिः। तेजोवतीनाम समाधिः। क्षयापगतोनाम समाधिः। अनिञ्जोनाम समाधिः। अविवर्त्तोनाम समाधिः। सूर्य्यप्रदीपोनाम समाधिः। चन्द्रविमलोनाम समाधिः। प्रज्ञाप्रदीपोनाम समाधिः। शुद्धप्रतिभासोनाम समाधिः। आलोककरोनाम समाधिः। काराकारोनाम समाधिः। ज्ञानकेतुर्नाम समाधिः। वज्रोपमोनाम समाधिः। चित्तस्थितिर्नाम समाधिः। समन्तालोकोनाम समाधिः। सुप्रतिष्ठितोनाम समाधिः। रत्नकोटिर्नाम समाधिः। वरधर्म्म-मुद्रानाम समाधिः। सर्व्वधर्म्मसमतानाम समाधिः। रतिजहोनाम समाधिः। धर्म्मोद्गतोनाम समाधिः। विकिरणोनाम समाधिः। सर्वधर्म्मपदप्रभेदोनाम समाधि। समाक्षरावकारोनाम समाधिः। अक्षरापगतोनाम समाधिः। आरम्बणच्छेदनोनाम समाधिः। अविकारोनाम समाधिः। प्रभाकरोनाम समाधिः। नामनियत-प्रवेशोनामसमाधिः। अनिकेतचारीनाम समाधिः। तिमिरापगतोनाम समाधिः। चारित्रवतीनाम समाधिः। अचलानाम समाधिः। विषयतीर्णोनाम समाधिः। सर्वगुणसञ्चयोनाम समाधिः। स्थित-निश्चित्तोनाम समाधिः। शुभपुष्पितशुद्धिर्नाम समाधिः। बोध्यङ्ग-वतीनाम समाधिः। अनन्तप्रतिभावोनाम समाधिः। असमसमो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाम समाधिः। सर्वधर्म्मातिक्रमणोनाम समाधिः। परिच्छेदकरो-नाम समाधिः। विमतिविकिरणोनाम समाधिः। निरधिष्ठानो-नाम समाधिः। एकव्यूहोनाम समाधिः। आकाराभिनिर्हारो-नाम समाधिः। एकाकारोनाम समाधिः। सर्वसुखदुःखनिरभि-नन्दीनाम समाधिः। सर्व्वाकारवरोपेतोनाम समाधिः। आकारा-नवकारोनाम समाधिः। नैर्वेधिकसर्वभवतलापगतोनाम समाधिः। संकेतरुतप्रवेशोनाम समाधिः। शैर्घोषाचरविमुक्तोनाम समाधिः। ज्वलनोल्कानाम समाधिः। लक्षणपरिशोधनोनाम समाधिः। अनभिलक्षितोनाम समाधिः। सर्व्वाकारवरोपेतोनाम समाधिः। सर्व्वसुखदुःखनिरभिनन्दीनाम समाधिः। अक्षयकरण्डोनाम समाधिः। धारणीमतिर्नाम समाधिः। सम्यक्त्वमिथ्यात्वसंप्रशमोनाम समाधिः। सर्वरोधनिरोधसंप्रशमनोनाम समाधिः। अनुयोधा-प्रतिरोधोनाम समाधिः। विमरप्रभोनाम समाधिः। सारवतीनाम समाधिः। परिपूर्णचन्द्रविमलोनाम समाधिः। विद्युत्प्रभोनाम समाधिः। महाव्यूहोनाम समाधिः। सर्वलोकप्रभाकरोनाम समाधिः। समाधिसमतानाम समाधिः। अरजोविरजोनयुक्तोनाम समाधिः। अरणसरणसमवसरणोनाम समाधिः। अरणसरणसर्व-समवसरणोनामसमाधिः। अनिलम्भनिकेतनिरतोनाम समाधिः। तथतास्थितनिश्चित्तोनाम समाधिः। कायकलिसंप्रमथनोनाम समाधिः। वक्कलिविध्वंसनगगणकल्पोनाम समाधिः। आकाशा-सङ्गविमुक्तिनिरूपलेपोनाम समाधिः॥ ०॥

शतसाहस्र्याः प्रज्ञापारमितायाः सप्तमः परिवर्त्तः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ अष्टमः परिवर्त्तः ।

तत्र कतमः शूरङ्गमोनाम समाधिः । यः समाधिः सर्व्वसमाधीनां गोचरमनुभवत्ययमुच्यते शूरङ्गमोनाम समाधिः । तत्र कतमा रत्नमुद्रानाम समाधिः । येन समाधिना सर्व्वसमाधयो-मुद्रिता भवन्ति । अयमुच्यते रत्नमुद्रानाम समाधिः । तत्र कतमः सिंहविक्रीड़ितोनाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वसमाधिभिर्व्विक्रीड़यत्ययमुच्यते सिंहविक्रीड़ितोनाम समाधिः ।

तत्र कतमः सुचन्द्रोनाम समाधि । यत्र समाधौ स्थित्वा सर्व्वसमाधीनवभासयति । अयमुच्यते सुचन्द्रनाम समाधिः । तत्र कतमश्चन्द्रध्वजकेतुर्नाम समधिः । यः समाधिः सर्व्वसमाधीनां ध्वजं धारयति । अयमुच्यते चन्द्रध्वजकेतुर्नाम समाधिः । तत्र कतमः सर्व्वधर्म्मोद्गतोनाम समाधिः । यत्र समाधौ स्थित्वा सर्व्व-समाधिभिरभ्युद्गच्छति । अयमुच्यते सर्वधर्म्मोद्गतोनाम समाधिः । तत्र कतमो विलोकितमूर्द्धोनाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वसमाधीनां मूर्द्धानं विलोकयति । अयमुच्यते विलोकितमूर्द्धो-नाम समाधिः । तत्र कतमो धर्म्मधातुनियतोनाम समाधिः । यत्र समाधौ स्थित्वा धर्म्मधातौ निश्चयं गच्छति । अयमुच्यते धर्म्मधातुनियतोनाम समाधिः । तत्र कतमोनियत ध्वजकेतुर्नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वसमाधीनां नियतं ध्वजं धारयति । अयमुच्यते नियतध्वजकेतुर्नाम समाधिः । तत्र कतमो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वज्रोनाम समाधिः। यत्र समाधौ स्थित्वा न भिद्यते। अयमुच्यते वज्रोनाम समाधिः। तत्र कतमः सर्व्वधर्म्मप्रवेशमुद्रानाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां मुद्रां प्रविशत्ययमुच्यते सर्व्वधर्म्म-प्रवेशमुद्रानाम समाधिः। तत्र कतमः समाधिराजसु प्रतिष्ठितो-नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिषु राजसु प्रतिष्ठानेन प्रतितिष्ठति। अयमुच्यते समाधिराजसु प्रतिष्ठितोनाम समाधिः। तत्र कतमोरश्मिप्रमुक्तोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां रश्मीनवसृजति। अयमुच्यते रश्मिप्रमुक्तो-नाम समाधिः। तत्र कतमोवलव्युहोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां वलव्युहतां कारयति। अयमुच्यते वल-व्यूहोनाम समाधिः। तत्र कतमः समुद्गतोनाम समाधिः। यत्र समाधौ स्थितस्य सर्व्वे समाधयः समुद्गच्छन्ति। अयमुच्यते समुद्गतोनाम समाधिः। तत्र कतमोनिरुक्ति नियतप्रवेशोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां निरुक्तिनिर्देशान् प्रवेशयति। अयमुच्यते निरुक्तिनियतप्रवेशोनाम समाधिः। तत्र कतमोवचनसंप्रवेशोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व-समाधीनामधिवचनानि प्रवेशयति। अयमुच्यते ऽधिवचनसंप्रवेशो-नाम समाधिः। तत्र कतमोदिग्विलोकितोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनं दिशो विलोकयति अयमुच्यते दिग्विलोकितोनाम समाधिः। तत्र कतम आधारमुद्रानाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां मुद्राधारयति। अयमुच्यते आधारमुद्रानाम समाधिः। तत्र कतमोऽसंप्रमोषोनाम

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाधिः। यत्र समाधौ स्थित्वा तस्य समाधयो न मुह्यन्ति। अयमुच्यते ऽसंप्रमोषोनाम समाधिः। तत्र कतमः सर्वधर्म्मसमवशरण सागरमुद्रा नामसमाधिः। यत्र समाधौ स्थितस्य सर्वे समाधयः संग्रहं समवशरणं गच्छन्ति। अयमुच्यते सर्वधर्म्मसमवशरण सागरमुद्रा नामसमाधिः। तत्र कतम आकाशस्फुरणोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामाकाशस्फुरणतया स्फुरति। अयमुच्यते आकाशस्फुरणोनाम समाधिः। तत्र कतमो वज्रमण्डलोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां मण्डलानि धारयति। अयमुच्यते वज्रमण्डलोनाम समाधिः। तत्र कतमोरणजहोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वक्लेशमलान् शोषयति। अयमुच्यते रणजहोनाम समाधिः। तत्र कतमो-वैरोचनोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीन-वभासयति तपति विरोचते। अयमुच्यते वैरोचनोनाम समाधिः। तत्र कतमो ऽनेषोनाम समाधिः। यत्र समाधौ स्थित्वा न कञ्चिद्धर्म्ममेषते। अयमुच्यते ऽनेषोनाम समाधिः। तत्र कतमो-ऽनिकेतस्थितोनाम समाधिः। यत्र समाधौ स्थित्वा न कञ्चिद्धर्म्मं निकेतस्थितं समनुपश्यति। अयमुच्यते ऽनिकेतस्थितोनाम समाधिः। तत्र कतमोनिश्चित्तोनाम समाधिः। यत्र समाधौ स्थितस्य न चित्तं न चेतसिकाधर्म्माप्रवर्त्तन्ते। अयमुच्यते निश्चित्तोनाम समाधिः। तत्र कतमो विमलप्रदीपोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां विमलप्रदीपं करोति। अयमुच्यते विमल-प्रदीपोनाम समाधिः। तत्र कतमोऽनन्तप्रभोनाम समाधिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्र समाधौ स्थित्वा ऽनन्तां प्रभां करोति । अयमुच्यते ऽनन्तप्रभोनाम समाधिः । तत्र कतमः प्रभाकरोनाम समाधिः । यस्य समाधेः सहप्रतिलम्भात् सर्वसमाधीनां प्रभां करोति । अयमुच्यते प्रभाकरोनाम समाधिः । तत्र कतमः समन्तावभासोनाम समाधिः । यस्य समाधेः सहप्रतिलम्भात् सर्वसमाधिसुखान्यवभासयति । अयमुच्यते समन्तावभासोनाम समाधिः । तत्र कतमः शुद्धसारोनाम समाधिः । यत्र समाधौ स्थित्वा समाधीनां शुद्धसमन्तामनुप्राप्नोति । अयमुच्यते शुद्धसारोनाम समाधिः । तत्र कतमो विमलप्रभोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीनां मलमपकर्षति । सर्वसमाधींश्च प्रतिभासयति । अयमुच्यते विमलप्रभोनाम समाधिः । तत्र कतमोरतिकरोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीनां रतिमनुभवति । अयमुच्यते रतिकरोनाम समाधिः । तत्र कतमो विद्युत् प्रदीपोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीनां प्रदीपं करोति । अयमुच्यते विद्युत्प्रदीपोनाम समाधिः । तत्र कतमो ऽक्षयोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीनां नैव क्षयं नाक्षयं समनुपश्यति । अयमुच्यते ऽक्षयोनाम समाधिः । तत्र कतम स्तेजोवतीनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीं स्तेजसाश्रिया च ज्वलयति । अयमुच्यते तेजोवतीनाम समाधिः । तत्र कतमः क्षयापगतोनाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधी न क्षयाननुपश्यति । तथा च पश्यति यथाण्वपि न समनुपश्यति । अयमुच्यते क्षयापगतोनाम समाधिः । तत्र कतमो ऽनिञ्जोनाम

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनञ्जति न मन्यते न स्यन्दते न प्रपञ्चयति ते नोच्यते ऽनिञ्जोनाम समाधिः। तत्र कतमो ऽविवर्त्तोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां विवर्त्तनं न समनुपश्यति। अयमुच्यते ऽविवर्त्तोनाम समाधिः। तत्र कतमः सूर्य्यप्रदीपोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां मुखमवभासयति। अयमुच्यते सूर्य्यप्रदीपोनाम समाधिः। तत्र कतमश्चन्द्रविमलोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामनन्धाकारं करोति। अयमुच्यते चन्द्रविमलोनाम समाधिः। तत्र कतमः शुद्धप्रतिभासोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां चतस्रः प्रतिसम्विदः प्रतिलभते ऽयमुच्यते शुद्धप्रतिभासोनाम समाधिः। तत्र कतम आलोककरोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिमुखानामालोकं करोति। अयमुच्यते आलोककरोनाम समाधिः। तत्र कतमः काराकारोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां कारगतां क्रियां करोति। अयमुच्यते काराकारोनाम समाधिः। तत्र कतमो ज्ञानकेतुर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां ज्ञानकेतुं समनुपश्यति। अयमुच्यते ज्ञानकेतुर्नाम समाधिः। तत्र कतमो वज्रोपमोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां निर्व्वेधिकं करोति। यत् समाधिमपि न समनुपश्यति। अयमुच्यते वज्रोपमोनाम समाधिः। तत्र कतमश्चित्तस्थितिर्नाम समाधिः। यत्र समाधौ स्थित्वा ऽस्य चित्तं न विचलति। न विवर्त्तते न परित्रस्यति न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विघातमापद्यते। न वा ऽस्यैवं भवति चित्तमिदमिति। अय-मुच्यते चित्तस्थितिर्नाम समाधिः। तत्र कतमः समन्तालोकोनाम समाधिः। यत्र समाधौ स्थित्वा समन्तादालोकं समनुपश्यति। अयमुच्यते समन्तालोकोनाम समाधिः। तत्र कतमः सुप्रतिष्ठि-तोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिषु सुप्रतिष्ठितो भवति। अयमुच्यते सुप्रतिष्ठितो नाम समाधिः। तत्र कतमो रत्नकोटिर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधयः समन्ता-द्रत्नकोटिरिव संदृश्यते। अयमुच्यते रत्नकोटिर्नाम समाधिः। तत्र कतमो वरधर्म्ममुद्रानाम समाधिः। यत्र समाधौ स्थित्वा सर्व्व-समाधयोमुद्रिता भवन्ति। अमुद्राकोटिमुद्रिततामुपादाय। अय-मुच्यते वरधर्म्ममुद्रानाम समाधिः। तत्र कतमा सर्व्वधर्म्मसमतानाम समाधिः। यत्र समाधौ स्थित्वा न कञ्चिद्धर्म्मं समतानिर्मुक्तं समनुपश्यति। अयमुच्यते सर्व्वधर्म्म समतानाम समाधिः। तत्र कतमो रतिञ्जहोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमा-धीनां सर्व्वधर्म्मानाञ्च रतिञ्जहाति। अयमुच्यते रतिञ्जहोनाम समाधिः। तत्र कतमो धर्म्मोद्गतोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां तमोविधर्म्मात् सर्व्वसमाधिभिश्चोद्गच्छति। अयमुच्यते धर्म्मोद्गतोनाम समधिः। तत्र कतमो विकिरणोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधिभिः सर्व्वधर्म्मान् विकि-रयति। अयमुच्यते विकिरणोनाम समाधिः। तत्र कतमः सर्व्वधर्म्मपदप्रभेदोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमा-धीनां सर्व्वधर्म्मानाञ्च पदानि प्रभिनत्ति। अयमुच्यते सर्व्वधर्म्मपद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभेदोनाम समाधिः। तत्र कतमः समाक्षराकारोनाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां समाक्षरतां प्रतिलभते। अयमुच्यते समाक्षराकारोनाम समाधिः। तत्र कतमो ऽक्षरापगतोनाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामेकाक्षरमपि नोपलभते। अयमुच्यते ऽक्षरापगतो नाम समाधिः। तत्र कतम आरम्बणच्छेदनो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनामारम्बणच्छेदो भवति। अयमुच्यते आरम्बणच्छेदनो नाम समाधिः। तत्र कतमः अविकारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां विकारान् नोपलभते। अयमुच्यते अविकारो नाम समाधिः। तत्र कतमो ऽप्रकारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां प्रकारमपि नोपलभते। अयमुच्यते ऽप्रकारो नाम समाधिः। तत्र कतमः अनिकेतचारी नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां निकेतं नोपलभते। अयमुच्यते अनिकेतचारी नाम समाधिः। तत्र कतमस्तिमिरापगतो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां तिमिरं विशोधयति। अयमुच्यते तिमिरापगतो नाम समाधिः। तत्र कतमश्चारित्रवती नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनाञ्चरन्तं समनुपश्यति। अयमुच्यते चारित्रवती नाम समाधिः। तत्र कतमः अचलो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीन्नचलान् समनुपश्यति। अयमुच्यते अचलो नाम समाधिः। तत्र कतमो विषयतीर्णो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनां विषयं समतिक्रामति। अयमुच्यते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयतीर्णो नाम समाधिः । तत्र कतमः सर्व्वगुणसञ्चयगतो नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां सर्व्वसमाधीनाञ्च गुणसञ्चयमनुप्राप्नोति । अयमुच्यते सर्व्वगुणसञ्चयगतो नाम समाधिः । तत्र कतमः स्थितनिश्चित्तो नाम समाधिः । यत्र समाधौ स्थितस्य सर्व्वसमाधिषु चित्तं न प्रवर्त्तते । अयमुच्यते स्थितनिश्चित्तो नाम समाधिः । तत्र कतमः शुभपुष्पितशुद्धिर्नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वसमाधीनां शुभपुष्पित शुद्धिं प्रतिलभते ऽयमुच्यते शुभपुष्पितशुद्धिर्नाम समाधिः । तत्र कतमो बोध्यङ्गवती नाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधीनां सप्तबोध्यङ्गानि प्रतिलभते । अयमुच्यते बोध्यङ्गवती नाम समाधिः । तत्र कतमो ऽनन्तप्रतिभानो नाम समाधिः । यत्र समाधौ स्थित्वा समाधिष्वनन्तं प्रतिलभते । अयमुच्यते अनन्तप्रतिभानो नाम समाधिः । तत्र कतमो ऽसमसमो नाम समाधिः । यत्र समाधौ स्थित्वा सर्वसमाधिष्वसमसमतां प्रतिलभते । अयमुच्यते असमसमो नाम समाधिः । तत्र कतमः सर्वधर्म्मातिक्रमणो नाम समाधिः । यत्र समाधौ स्थित्वा सर्वत्रैधातुकं समतिक्रामति । अयमुच्यते सर्वधर्म्मातिक्रमणो नाम समाधिः । तत्र कतमः परिच्छेदकरो नाम समाधिः । यत्र समाधौ स्थित्वा सर्वधर्म्माणां सर्वसमाधीनाञ्च परिच्छेदं पश्यति । अयमुच्यते परिच्छेदकरो नाम समाधिः । तत्र कतमोविमतिविकिरणो नाम समाधिः । यत्र समाधौ स्थित्वा सर्व्वसमाधीनां सर्व्वधर्म्माणाञ्च विमतिविकिरणतामनुप्राप्नोति । अयमुच्यते विमतिविकिरणो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाम समाधिः। तत्र कतमो निरधिष्ठानो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां स्थानं न समनुपश्यति। अयमुच्यते निरधिष्ठानो नाम समाधिः। तत्र कतम एकव्यूहो नाम समाधिः। यत्र समाधौ स्थित्वा न कस्यचिद्धर्म्मस्य द्वयतां समनुपश्यति। अयमुच्यते एकव्यूहोनाम समाधिः। तत्र कतम आकाराऽभिनिर्हारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधर्म्माणां सर्वं समधीनाञ्चाकाराऽभिनिर्हारं समनुपश्यति। अयमुच्यते आकाराभिनिर्हारो नाम समाधिः। तत्र कतम एकाकारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनामाकारं न समनुपश्यति। अयमुच्यते एकाकारो नाम समाधिः। तत्र कतम आकारानवकारो नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वसमाधीनामद्वयतां समनुपश्यति। अयमुच्यते आकारानवकारो नाम समाधिः। तत्र कतमो नैर्वेधिकसर्वभवतलविगतो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां नैर्वेधिकज्ञानमनुप्रविशति। यस्याऽनुप्रवेशान्न किञ्चिन्न प्रतिविध्यति। अयमुच्यते नैर्वेधिकसर्वभवतलविगतो नाम समाधिः। तत्र कतमः सङ्केतरुतप्रवेशो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां सङ्केतरुतानि प्रवेशयति। अयमुच्यते सङ्केतरुतप्रवेशो नाम समाधिः। तत्र कतमो गीर्घोषाचरविमुक्तो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां गीर्घोषाचरविमुक्तान् समनुपश्यति। अयमुच्यते गीर्घोषाऽचरविमुक्तो नाम समाधिः। तत्र कतमो ज्वलनोल्का नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधींस्तेजसाऽवभास-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यति। अयमुच्यते ज्वलनोल्का नाम समाधिः। तत्र कतमोलक्षण परिशोधनो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधीनां लक्षणानि परिशुध्यन्ते। अयमुच्यते लक्षणपरिशोधनो नाम समाधिः। तत्र कतमो ऽनभिलक्षितो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनभिलक्षितान् समनुपश्यति। अयमुच्यते अनभिलक्षितो नाम समाधिः। तत्र कतमः सर्वाकारवरोपेतो नाम समाधिः। यत्र समाधौ स्थितस्य सर्व्वसमाधयः सर्व्वाकारवरोपेता भवन्ति। अयमुच्यते सर्वाकारवरपेतो नाम समाधिः। तत्र कतमः सर्वसुखदुःखनिरभिनन्दी नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां सुखदुःखानिनानुपश्यति। अयमुच्यते सर्वसुखदुःखनिरभिनन्दी नाम समाधिः। तत्र कतमोऽक्षयकरण्डो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां क्षयं न समनुपश्यति। अयमुच्यते ऽक्षयकरण्डो नाम समाधिः। तत्र कतमाधारणीमतिर्नाम समाधिः। यत्र समाधौ स्थित्वा सर्व्वधारणी र्धारयति। अयमुच्यते धारणीमतिर्नाम समाधिः। तत्र कतमः सम्यक्त्वमिथ्यत्व सर्व्वसंग्रसनो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां सम्यक्त्वमिथ्यात्वं न समनुपश्यति। अयमुच्यते सम्यक्त्वमिथ्यात्व सर्वसंग्रसनो नाम समाधिः। तत्र कतमः सर्वरोधप्रतिरोध प्रशमनो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां रोधं विरोधं समनुपश्यति। अयमुच्यते सर्वरोधविरोधप्रशमनो नाम समाधिः। तत्र कतमो ऽनुरोधाप्रतिरोधो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वधर्म्माणां सर्वस-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माधीनाञ्चानुरोधाप्रतिरोधं न समनुपश्यति। अयमुच्यते ऽनुरोधाप्रतिरोधो नाम समाधिः। तत्र कतमो विमलप्रभो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां प्रभामण्डलं नोपलभते। अयमुच्यते विमलप्रभो नाम समाधिः। तत्र कतमः सारवती नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां सारं समनुपश्यति। अयमुच्यते सारवती नाम समाधिः। तत्र कतमः परिपूर्णचन्द्राभविमलो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधयः परिपूर्णा भवन्ति। तद्यथापि नाम पौर्णमास्यां चन्द्रमण्डलं। अयमुच्यते परिपूर्णचन्द्राभविमलो नाम समाधिः। तत्र कतमो महाव्यूहो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधि महाव्यूहसमन्नागतो भवति। अयमुच्यते महाव्यूहो नाम समाधिः। तत्र कतमः सर्व्वाकारप्रभाकरो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीन् सर्वधर्म्मांश्चावभासयति। अयमुच्यते सर्व्वाकारप्रभाकरो नाम समाधिः। तत्र कतमः समाधिसमता नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनामनुविक्षेपमेकाग्रतामुपलभते। अयमुच्यते समाधिसमतानाम समाधिः। तत्र कतमो ऽरणसरणसमवसरणो नाम समाधिः। यत्र समाधौ स्थितस्य सर्वसमाधयो नरणन्ति। अयमुच्यते ऽरणसरणसमवसरणो नाम समाधिः। तत्र कतमो ऽरणसरण सर्वसमवग्ररणो नाम समाधिः। यत्र समाधौ स्थित्वा अरणसरण सर्वसमवग्ररणतामनुप्राप्नोति। अयमुच्यते अरणसरण सर्वसमवग्ररणो नाम समाधिः। तत्र कतमो ऽनिलम्भनिकेतनिरतो नाम समाधिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्र समाधौ स्थित्वा सर्वसमाधीनामालयं नोपैति। अयमुच्यते अनिलम्भनिकेतनिरतो नाम समाधिः। तत्र कतमः तथतास्थितनिश्चित्तो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधितथतायां न विवर्द्धते। अयमुच्यते तथतास्थितनिश्चित्तो नाम समाधिः। तत्र कतमः कायकलिसंप्रमथनो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधिकायं नोपलभते। अयमुच्यते कायकलिसंप्रमथनो नाम समाधिः। तत्र कतमो वाक्कलिविध्वंसनगगणकल्पो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वसमाधीनां वाक्कर्म्मनोपलभते। अयमुच्यते वाक्कलिविध्वंसनगगणकल्पो नाम समाधिः। तत्र कतम आकाशाऽसङ्गविमुक्तिनिरुपलेपो नाम समाधिः। यत्र समाधौ स्थित्वा सर्वधर्म्माणा माकाशाऽसङ्गनिरूपलेपतामनुप्राप्नोति। अयमुच्यते आकाशाऽसङ्गविमुक्तिनिरुपलेपो नाम समाधिः। इदं सुभूते बोधसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो महायानं॥

शतसाहस्र्याः प्रज्ञापारमिताया अष्टमः परिवर्त्तः॥ ०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ नवमः परिवर्त्तः ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । चत्वारि-स्मृत्युपस्थानानि । कतमानि चत्वारि । कायस्मृत्युपस्थानं । वेदना-स्मृत्युपस्थानं । चित्तस्मृत्युपस्थानं । धर्म्मस्मृत्युपस्थानं । तत्र कतमं कायस्मृत्युपस्थानं । इह सुभूते बोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये-काया ऽनुदर्शी विहरति । न च काय सहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभि-ध्यादौर्म्मनस्ये तच्चाऽनुपलम्भयोगेन । बहिर्द्धाकायेकायानुदर्शी-विहरति । न च कायसहगतान् वितर्कान् वितर्कयत्यातापी-संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्म्मनस्ये तच्चाऽनुपलम्भ-योगेन । अध्यात्मबहिर्द्धाकायेकायाऽनुदर्शी विहरति । न च कायसहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्म्मनस्ये तच्चाऽनुपलम्भयोगेन ।

अध्यात्मवेदनासुवेदनाऽनुदर्शी विहरति । न च वेदनासहग-तान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीयलो-केऽभिध्यादौर्म्मनस्ये तच्चाऽनुपलम्भयोगेन । बहिर्द्धावेदनासुवेदना-नुदर्शी विहरति । न च वेदना सहगतान् वितर्कान् वितर्कयत्या-तापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्म्मनस्ये तच्चाऽनु-पलम्भयोगेन । अध्यात्मबहिर्द्धावेदनासु वेदनाऽनुदर्शी विहरति । न च वेदना सहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मचित्ते चित्ताऽनुदर्शी विहरति। न च चित्तसहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानान् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धा चित्तेचित्ताऽनुदर्शी विहरति। न च चित्तसहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धा चित्तेचित्ताऽनुदर्शी विहरति। न च चित्तसहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

अध्यात्मधर्मेषु धर्मानुदर्शी विहरति। न च धर्मसहगतान् वितर्कान् वितर्कयत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

कथं सुभूते बोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये कायानुदर्शी विहरति। इह सुभूते बोधिसत्त्वो महासत्त्वश्चरंश्चरामीति प्रजानातिस्थितः स्थितोऽस्मीति प्रजानाति। निषण्णो निषण्णोऽस्मीति प्रजानाति। शयानः शयितोऽस्मीति प्रजानाति। यथा यथा खलु पुनरस्य कायः स्थितो भवति प्रणीतं वा ऽप्रणीतं वा तथा-गतस्त्व न प्रजानाति। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वो ऽध्यात्मकाये कायाऽनुदर्शीविहरति। सोऽभिक्राम न वा प्रतिक्राम न वा संप्रजानचारी भवत्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोकित विलोके संप्रजानचारी च भवति। सम्मिञ्जिते प्रसारिते संप्रजानचारी भवति। संघाटीपात्रचीवरधारणे संप्रजानचारी भवति। अशितपीतखादितास्वादितान् संप्रजानचारी भवति। शयितनिद्राक्लमप्रतिविनोदिते संप्रजानचारी भवति। आगत-गत संप्रजानचारी भवति। स्थिते निषद्यायां संप्रजानचारी भवति। स्वप्नजागरिते संप्रजानचारी भवति। भाषिते तूष्णीम्भावे संप्र-जानचारी भवति। प्रतिसंलयने संप्रजानचारी भवति। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नध्यात्मकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधि-सत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् स्मृत आश्वसन् स्मृत आश्वसिमीति प्रजानाति। स्मृत प्रश्वसन् स्मृतः प्रश्वसिमीति प्रजानाति। दीर्घमाश्वसन् दीर्घमाश्वसिमीति प्रजानाति। दीर्घं प्रश्वसन् दीर्घं प्रश्वसिमीति प्रजानाति। ह्रस्वमाश्वसन् ह्रस्वमाश्वसिमीति प्रजानाति। ह्रस्वं प्रश्वसन् ह्रस्वं प्रश्वसिमीति प्रजानाति। तद्यथापि नाम सुभूते दक्षोभ्रमचक्रवर्त्ती भ्रमचक्र-वर्त्तन्तेवासी वा दीर्घमाविध्यामीति प्रजानाति। ह्रस्वं प्रविध्या-मीति प्रजानाति। एवमेव सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञा-पारमितायां चरन् स्मृत आश्वसन् स्मृत आश्वसिमीति प्रजानाति। स्मृतः प्रश्वसन् स्मृतः प्रश्वसिमीति प्रजानाति। दीर्घमाश्वसन् दीर्घमाश्वसिमीति प्रजानाति। दीर्घं प्रश्वसन् दीर्घं प्रश्वसिमीति प्रजानाति। ह्रस्वमाश्वसन् ह्रस्वमाश्वसिमीति प्रजानामिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ह्रस्वं प्रश्वसन् ह्रस्वं प्रश्वसिमीति प्रजानाति। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नध्यात्मकायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्निममेव कायधातुं यथाभूतं प्रत्यवेक्षते। अस्त्यस्मिन् काये पृथिवी धातुरब्धातु स्तेजोधातु र्वायुधातुः। तद्यथापि नाम सुभूते दक्षो गो घातको वा गोघातकान्तेवासी वा तीक्ष्णेन शस्त्रेण गां हत्वा चत्वारि फलकानि कुर्य्यात् चत्वारि फलकानि कृत्वा प्रत्यवेक्षते स्थितो वा ऽथनिषण्णः। एवमेव सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्निममेव कायधातुं स यथा भूतं प्रत्यवेक्षते। अस्त्यस्मिन् काये पृथिवीधातुरब्धातु स्तेजोधातु र्वायुधातुः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् स्थितो वा निषण्णो ऽध्यात्मकाये काया ऽनुपश्यी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्निममेव काय ऽमूर्द्धपादतलादधः केशमस्तकान्नखलोमत्वक्पर्य्यन्तं पूर्णं नानाविधस्या ऽशुचे र्यथाभूतं प्रत्यवेक्षते। सन्त्यस्मिन् काये केशालोमानि नखादन्तास्त्वक् चर्ममांसास्नायुरुधिरमस्थिमज्जावुक्कं हृदयं यकृत् क्लोमकं प्लीहा फुस्फुषमान्त्रा मान्त्रागुणा उदरयन्त्वं मूत्रं पुरीषं मश्रुर्मेदामदः खटः सिंहाणकं पूयं पित्तं श्लेष्मावसा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सीकामज्ञा मस्तकं मस्तक गङ्गामच्चि पृथकं। तद्यथापि नाम सुभूते कार्षकस्य मृतोच्चिः पूर्णा नानाधान्यजातानां तिलानां सर्षपाणां मुद्गानां माषाणां मसूराणां यवानां गोधूमानां शालीनां व्रीहीणां, तामेनां चक्षुष्मान् पुरुषामुक्ता प्रत्यवेक्षमाणः एवं जानीयादिमेतिलाः इमे सर्षपाः इमे मुद्गाः इमे माषाः इमे मसूराः इमे यवाः इमे गोधूमाः इमे शालयः इमे व्रीहयः। एवमेव सुभूते बोधिसत्त्वो महासत्त्वः इममेव कायमूर्द्धं पादतला-दधः केशमस्तकानखलोमत्वक्पर्य्यन्तं पूर्णं नानाविधस्याऽशुचे। सन्त्यस्मिन् काये केशा लोमानि नखादन्तास्त्वक्चर्ममांसस्नायु रुधिरमस्थिमज्जावुक्कं हृदयं यक्वत् क्लोमकं प्लीहा फुष्फुष मात्र मान्त्रगुना उदीरयकं मूत्रं पुरीषमश्रुस्वेदोमदः खेटः सिंहाणकं पूयं पित्तं स्लेष्मा वसालसीकामज्ञामस्तकं मस्तक शङ्कमचि गूथकं कर्ण गूथकं। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमि-तायां चरन्नध्यात्मकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये। तच्चाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापामितायां चरन् यदाश्मशानगतः पश्यति। नानारूपाणि शिवपथिकायामपविद्धानि शवशयन उद्ध्रीतान्येकाहमृतानि वा द्व्यहमृतानि वा त्र्यहमृतानि वा चतुरहमृतानि वा पञ्चाहमृतानि वा व्याध्मातकानि वा विनीलकानि वा विपूतिकानि वा विखादितकानि वा विलोहि-तकानि वा विच्छिन्नकानि वा। स इम मेव कायन्तत्रोपसंहर-त्ययमपि काय एवं धर्म्मा एवं स्वभाव एतां धर्मतामध्यति वृत्तः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये, तच्चानुपलम्भयोगेन । पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदापश्यति शिवपथिकाया मुद्गीतानि मृतशरीराणि षड्रात्रमृतानि वा सप्त रात्रमृतानि वा काकै र्वाखाद्यमानानि कङ्कै र्वा कुररै र्वा गृध्रै र्वा वास्तासै र्वा शृगालै र्वा श्वभि र्वा तदन्यै र्वा नानाविधैः प्राणकजातैः खाद्यमानानि । स इम मेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्म्मा एवं स्वभाव एतां धर्म्मतामध्यतिवृत्तः । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीय लोकेऽभिध्यादौर्म्मनस्ये तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदापश्यति शिवपथिकायामुद्गीतानि मृतशरीराणि विखादितान्य शुचीनि पूतीनि दुर्गन्धानि । स इममेव कायं तत्रोपसंहरत्य-यमपि काय एवं धर्म्मा एवं स्वभाव एतां धर्म्मतामध्यतिवृत्तः । एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये काया ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन । पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदापश्यति शिव-पथिकायामस्थिशकलान् मांसरुधिरचितान् स्नायु विनिबद्धान् स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्म्मा एवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वभाव एतां धर्मतामध्यति वृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

पुनरपुरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यथा शिवपथिकायामस्थिसकलानपगतमास रुधिरस्नायु बन्धनान् शङ्खनिभान् पश्यति। स इममेव कायं तत्रोपसंहरत्ययमपि कायं एवं धर्म्मा एवं स्वभाव एतां धर्म्मतामध्यतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके अभिध्यादौर्मनस्ये। तच्चाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति। शिवपथिकायामस्थि सकलाबन्धन विप्रमुक्ता यथाशङ्खाः पृथिव्यां विक्षिप्ताः। स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्म्मा एवं स्वभाव एतां धर्म्मतामध्यतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये काया ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थीनि पृथिव्यां दिग्विदिशो विक्षिप्तान्येव पादास्थीन्यन्येन जङ्घास्थीन्यन्येन नोर्व्वस्थीन्यन्येन श्रोणीकटाहमन्येन पृष्ठवंशान्यन्येन पार्श्वकास्थीन्यन्येन वाह्वस्थीन्यन्येन ग्रीवा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थीन्यन्येन शिरः कपालास्थीनि। स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थीन्यनेक वार्षिकानि चातपपरितापितानि श्वेतानि शङ्खनिभानि। स इममेव कायं तत्रोपसंहरत्ययमपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् बहिर्द्धाकाये कायानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चानुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् यदा पश्यति शिवपथिकायामस्थीन्यनेक वार्षिकानि तिरोभूतानि नीलानि कपोतवर्णानि पूतीनि चूर्णजातानि पृथिव्यां पांशुनासमसमीभूतानि। स इममेव कायं तत्रोपसंहरतित्ययमपि काय एवं धर्मा एवं स्वभाव एतां धर्मतामनतिवृत्तः। एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन्नध्यात्मकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

बहिर्द्धाकाये काया ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यात्मबहिर्द्धाकाये कायाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन।

अध्यात्मवेदनासुवेदनाऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चानुपलम्भयोगेन। बहिर्द्धावेदना सुवेदना ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धावेदना सुवेदना ऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मचित्ते चित्ताऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धाचित्ते चित्ताऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धा चित्ते चित्ताऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मधर्म्मेषु धर्म्माऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोकेऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। बहिर्द्धाधर्म्मेषु धर्म्मानुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्मनस्ये तच्चाऽनुपलम्भयोगेन। अध्यात्मबहिर्द्धाधर्म्मेषु धर्म्माऽनुदर्शी विहरत्यातापी संप्रजानन् स्मृतिमान् विनीयलोके ऽभिध्यादौर्म्मनस्ये तच्चाऽनुपलम्भयोगेन। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत चत्वारि सम्यक् प्रहाणानि। कतमानि। इदं सुभूते बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महासत्त्वः प्रज्ञापारमितायां चरन्ननुत्पन्नानां पापकानामकुशल-धर्म्माणामनुत्पादाय छन्दं जनयति। व्यायच्छते। वीर्य्यमारभते। चित्तं प्रगृह्णाति। सम्यक् प्रदधाति। उत्पन्नानां पापकानाम-कुशलधर्म्माणां प्रहाणाय छन्दं जनयति। व्यायच्छते वीर्य्यमारभते चित्तं प्रगृह्णाति। सम्यक् प्रदधाति। अनुत्पन्नानां कुशलधर्म्माणा-मुत्पादाय छन्दं जनयति, व्यायच्छते वीर्य्यमारभते चित्तं प्रगृह्णाति सम्यक् प्रदधाति। उत्पन्नानाकुशलानां धर्म्माणां स्थितये भूयोता-वनतायै असंमोषाय परिपूरये छन्दं जनयति। व्यायच्छते वीर्य्यमारभते चित्तं प्रगृह्णाति सम्यक् प्रदधाति। तच्चाऽनुपलम्भ-योगेन। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत-चत्वार ऋद्धिपादाः। कतमे चत्वारः इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् छन्दसमाधि प्रहाणाऽसंस्कारस-मन्वागतं ऋद्धिपादान् भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। वीर्य्यसमाधिप्रहाणां समन्वागतं ऋद्धिपादान् भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोध-निःश्रितं व्यवसर्गपरिणतं चित्तं समाधिप्रहाणाऽसंस्कारसमन्वागत-मृद्धिपादान् भावयति। विवेकनिःश्रितं विरागनिःश्रितं। निरोध-निःश्रितं व्यवसर्गपरिणतं। समाधिप्रहाणसंस्कारं समन्वागतमृद्धि-पादान् भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। इदमपि सुभूते बोधि-सत्त्वस्य महासत्त्वस्य महायानं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुत पञ्चेन्द्रियाणि । कतमानि पञ्च । श्रद्धेन्द्रियं वीर्य्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियमिदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । तच्चाऽनुपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुत पञ्चबलानि । कतमानि पञ्च । श्रद्धाबलं वीर्य्यबलं स्मृतिबलं समाधिबलं प्रज्ञाबलमिदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं तच्चाऽनुपलम्भयोगेन । पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं । यदुत सप्तबोध्यङ्गानि । कतमानि सप्तस्मृति-सम्बोध्यङ्गं धर्म्मप्रविचयसम्बोध्यङ्गं वीर्य्यसम्बोध्यङ्गं प्रीतिसम्बोध्यङ्गं प्रश्रब्धिसम्बोध्यङ्गं समाधिसम्बोध्यङ्गं उपेक्षासम्बोध्यङ्गं । तत्र कतमत् स्मृतिसम्बोध्यङ्गं । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापार-मितायां चरन् स्मृतिसम्बोध्यङ्गं भावयति विवेकनिःश्रितं विराग-निःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं । तच्चाऽनुपलम्भयोगेन । कतद्धर्म्मप्रविचय सम्बोध्यङ्गं । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् धर्म्मप्रविचयसम्बोध्यङ्गं भावयति । विवेक-निःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं । तच्चा-ऽनुपलम्भयोगेन । कतमद्वीर्य्यसम्बोध्यङ्गं । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् वीर्य्यसम्बोध्यङ्गं भावयति । विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं । तच्चाऽनुपलम्भयोगेन । तत्र कतमत्प्रीतिसम्बोध्यङ्गं । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां प्रीतिसम्बोध्यङ्गं भावयति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। तत्र कतमत्प्रस्रब्धि सम्बोध्यङ्गं।

इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् प्रस्रब्धिसम्बोध्यङ्गं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। तत्र कतमत्समाधिसम्बोध्यङ्गं। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् समाधि सम्बोध्यङ्गं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं तच्चाऽनुपलम्भयोगेन। तत्र कतमदुपेक्षासम्बोध्यङ्गं। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरनुपेक्षासम्बोध्यङ्गं भावयति विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं तच्चाऽनुपलम्भयोगेन। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं यदुतार्य्याष्टाङ्गोमार्गः। सम्यगदृष्टिः। सम्यक् सङ्कल्पः। सम्यक् वाक्। सम्यक् कर्म्मान्तः। सम्यगाजीवः। सम्यग्व्यायामः। सम्यक् स्मृतिः। सम्यक् समाधिः। तत्र कतमा सम्यगदृष्टिः। इद सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यगदृष्टिं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं तच्चाऽनुपलम्भयोगेन। तत्र कतमः सम्यक् सङ्कल्पः। इह सुभूते बोधिसत्त्वो महासत्त्वः पज्ञापारमितायां चरन् सम्यक् सङ्कल्पं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमा सम्यग्वाक्। इह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यग्वाचं भावयति विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमः सम्यक् कर्म्मान्तः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् कर्म्मान्तं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमः सम्यगाजीवः इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यगाजीवं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोध-निश्रितं व्यवसर्गपरिणतं। तच्चानुपलम्भयोगेन। कतमः सम्यग् व्यायामः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यग् व्यायामं भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यपसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमा सम्यक् स्मृतिः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् स्मृति भावयति। विवेकनिःश्रितं विरागनिःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। कतमः सम्यक् समाधिः। इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सम्यक् समाधिं भावयति। विवेकनिःश्रितं विराग-निःश्रितं निरोधनिःश्रितं व्यवसर्गपरिणतं। तच्चाऽनुपलम्भयोगेन। इदं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुत त्रयः समाधयः। कतमे समाधयस्त्रयः। शून्यता समाधिरानिमित्त समाधिरप्रणिहितसमाधिः। तत्र कतमः शून्यता समाधिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वलक्षणशून्यान् सर्व्वधर्म्मान् प्रत्यवेक्षमाणस्य या चित्तस्य स्थितिः शून्यता विमोक्षमुखमयमुच्यते शून्यता समाधिः। तत्र कतम आनिमित्तसमाधिः। आनिमित्तान् सर्व्वधर्म्मान् प्रत्यवेक्षमाणस्य या चित्तस्य स्थितिरानिमित्त विमोक्षसुखमयमुच्यते आनिमित्तः समाधिः। तत्र कतमोऽप्रणिहित समाधिः। सर्व्वधर्म्मा अनभिसंस्कारा इत्यनभिसंस्कुर्व्वतोयाचित्तस्य स्थितिरप्रणिहितविमोक्षमयमुच्यते ऽप्रणिहितः समाधिः। इमा विमोक्षमुखेषु स्मृतयः कर्त्तव्याः। अजह्रीयमाणेन। इदमपि सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। तच्चाऽनुपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य महायानं। यदुतैकादशज्ञानानि। कतमान्येकादश। दुःखज्ञानं समुदयज्ञानं निरोधज्ञानं मार्गज्ञानं क्षयज्ञानमनुत्पादज्ञानं धर्म्मज्ञानमन्वयज्ञानं संवृत्तिज्ञानं परिचयज्ञानं यथारुतज्ञानं। तत्र कतम दुःखज्ञानं यद्दुःखस्याऽनुत्पादज्ञानं। तत्र कतमत्समुदयज्ञानं यत्समुदयस्य प्रहाणज्ञानं। तत्र कतमन्निरोधज्ञानं यद्दुःखनिरोधज्ञानं। तत्र कतमत् मार्गज्ञानं यदार्य्याष्टाङ्गमार्गज्ञानं। तत्र कतमत् क्षयज्ञानं यद्रागदोषमोहक्षयज्ञानं। तत्र कतमदनुत्पादज्ञानं यद्भगवत्यनुत्पादज्ञानं। तत्र कतमद्धर्म्मज्ञानं यत्पञ्चानां स्कन्धानामपरिक्षतिमपरिच्छेदज्ञानं। तत्र कतमदन्वयज्ञानं यच्चक्षुरनित्यमितिज्ञानं श्रोत्रमनित्यमिति ज्ञानं घ्राणमनित्यमिति ज्ञानं जिह्वाऽनित्येति ज्ञानं कायोऽनित्य इति ज्ञानं मनोऽनित्यमिति ज्ञानं। रूपमनित्यमिति ज्ञानं शब्दोऽनित्य इति ज्ञानं गन्धोऽनित्य इति ज्ञानं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Nityācārapradipa, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-3 @ /10/ each Rs.	6	14
Nyāyabindutikā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa, Vol. II, Fasc. 1-3 @ /10/ each ...	1	14
Nyayasarah	2	0
Padumāwati, Fasc. 1-5 @ 2/-	10	0
Prākrita-Paiugalam, Fasc. 1-7 @ /10/ each	4	6
Prākṛta Lakṣaṇam, Fasc. 1 @ /1/8 each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1-8, Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi English) Fasc. 1-3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Saddarśana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraicca Kaha, Fasc. 1-3, @ /10/	1	14
Sāṇkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
Six Buddhist Nyaya Tracts	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā Stotra (Sanskrit and Tibetan)	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhi Kaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta, Fasc. 1	1	4
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc., 11-25 @ /10/ each	9	6
*Taittirīya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
*Tāṇdya Brāhmaṇa, Fasc. 10-19 @ /10/ each	6	4
Tantra Vārtika (English) Fasc. 1-8 @ /1/4	10	0
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-10; Vol. III, Fasc. 1-2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1-5; Part IV, Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc. 1, @ /10/ each	0	10
Ditto Prakas, Fasc. 1-3, @ /10/ each	1	14
Tattvārthādhigama Sutram, Fasc. 1-3 @ /10/	1	14
Tirthacintamoni, Fasc. 1, @ /10/ each	0	10
Trikāṇda-Maṇdanam, Fasc. 1-3 @ /10/	1	14
Tul'si Satsai, Fasc. 1-5 @ /10/	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each ...	6	14
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/-	6	0
Vallāla Carita, Fasc. 1 @ /10/	[illegible]	10
Varṣa Kriyā Kaumudī, Fasc. 1-6 @ /10/	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3-6; Vol. II, Fasc. 1-7; @ /10/ each ...	6	14
Vidhāna Pārijāta, Fasc. 1-8; Vol. II, Fasc. 1 @ /10/	5	10
Ditto Vol. II, Fasc. 2-4, @ 1/4	3	12
Vivādaratnākara, Fasc. 1-7 @ /10/ each	4	6
Vrhat Svayambhū Purāṇa, Fasc. 1-6 @ /10/	3	12
Yogaśāstra, Fasc. 1-3	3	12

Tibetan Series.

Banddhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-4, @ 1/- each ...	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Tin, Fasc. 1-4 @ 1/- each	4	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-8 @ 1/- each	16	
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	14	0

Arabic and Persian Series.

Al-Muqaddasi (English) Vol. I, Fasc. 1-4 @ 1/-	4	0
Aīn-i-Akbarī, Fasc, 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	36	0
Akbarnāmah, with Index, Fasc. 1-37 @ 1/8/ each ...	55	8
Akbarnāmah, English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-7; Vol. III, Fasc. 1, @ 1/4/ each	20	0
Arabic Bibliography, by Dr. A Sprenger @ /10/	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts 1-2 @ 1/- each ...	2	0

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	Rs.	
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each ...	3	0
Dictionary of Arabic Technical Terms, and Appendix Fasc. 1-21 @ 1/8/ each	31	8
Fara Nama	1	0
Farnang-i-Rashidī, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Tusi, or Ṭūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each ...	4	0
History of Gūjarat	1	0
Haft Āsmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each	7	8
Iqbālnamah-i-Jahāngīrī, Fasc. 1-3 @ /10/ each	1	14
Isābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1	2	0
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Marhamu 'L-Ilali 'L-Mu'Dila	1	0
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each	9	6
Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/- each	16	0
Muntākhabu-l-Lubāb, Fasc. 1-19 @ /10/ each...	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12 each ...	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ...	5	0
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each	3	2
Ditto (English) Fasc. 1-5 @ 1/-	5	0
Tadhkira-i-Khushnavisān	1	0
Tabaquat-i-Nasiri (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni, Fasc. 1-7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
The Mabani 'L Lughat: A Grammar of the Turki Language in Persian	1	8
The Persian and Turki Divans of Bayram Khan, Khan Khanan ...	1	0
Tuzuk-i-Jahāngīrī (Eng.) Fasc. 1 @ 1/-	1	0
Wis o Rāmīn, Fasc. 1-5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XIX and XX @ 10/- each 20 0
2. Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

   N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.
4. Journal and Proceedings, N.S., 1905, to date (Nos. 1–4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25°/₀ to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ... 3 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each ... 18 0
9. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notice of Sanskrit Manuscripts, Fasc. 1-35 @ 1/- each 35 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

31-5-11.

Books are supplied by V.P.P.

State Museum Lucknow 5094

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Regd 3/7/12.

सिकारोऽविद्याऽनवकारशून्येति मनसिकरोति। ताञ्चाऽनवकार-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्या प्रकृतिशून्येति मनसिकरोति। ताञ्च प्रकृतिशून्यता-मुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्यासर्व्वधर्म्मशून्येति मनसिकरोति। ताञ्च सर्व्वधर्म्म-शून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्या स्वलक्षणशून्येति मनसिकरोति। ताञ्च स्वलक्षण-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्याऽनुपलम्भशून्येति मनसिकरोति। ताञ्चाऽनुपलम्भ-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्यातो बक्रशून्येति मनसिकरोति। ताञ्चाऽभाव-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्यास्वभावशून्येति मनसिकरोति। ताञ्चस्वभावशून्यता-मुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोऽविद्याऽभावस्वभावशून्येति मनसिकरोति। ताञ्चाऽ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	Rs.	
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal, Fasc. 1-3 @ 1/- each ...	3	0
Dictionary of Arabic Technical Terms, and Appendix Fasc. 1-21 @ 1/8/ each	31	8
Fara Nama	1	0
Farnang-i-Rashidi, Fasc. 1-14 @ 1/8/ each	21	0
Fihrist-i-Tusi, or Tūsy's list of Shy'ah Books, Fasc. 1-4 @ 1/- each ...	4	0
History of Gūjarat	1	0
Haft Āsmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each	7	8
Iqbālnamah-i-Jahāngīri, Fasc. 1-3 @ /10/ each	1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āṣir-i-Raḥīmī, Part I, Fasc. 1	2	0
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12 @ /1/ each	35	0
Marhamu 'L-Ilali 'L-Mu'Dila	1	0
Muntakhabu-t-Tawarikh, Fasc. 1-15 @ 10/ each	9	6
Ditto (English), Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/- each	16	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each...	11	14
Ditto Part 3, Fasc. 1	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12 each ...	1	8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ...	5	0
Riyāzu-s-Salātīn, Fasc. 1-5 @ /10/ each	3	2
Ditto (English) Fasc. 1-5 @ 1/-	5	0
Tadhkira-i-Khushnavisān	1	0
Tabaquat-i-Nasiri (English), Fasc. 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyān-d-dīn Barni, Fasc. 1-7 @ /10/ each ...	4	6
Tārīkh-i-Firūzshāhi, of Shams-i-Sirāj Aif, Fasc. 1-6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
The Mabani 'L Lughat: A Grammar of the Turki Language in Persian	1	8
The Persian and Turki Divans of Bayram Khan, Khan Khanan ...	1	0
Tuzuk-i-Jahāngīrī (Eng.) Fasc. 1 @ 1/-	1	0
Wis o Rāmīn, Fasc. 1-5 @ /10/ each	3	2
Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /10/ each ...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/- each 20 0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16) @ 1/8 per No. to Members and @ 2/- per No. to Non-Members.

N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.

4. Journal and Proceedings, N.S., 1905, to date (Nos. 1–4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910 ... 3 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to, @ 6/- each 18 0
9. Kaçmīraçabdāmṛta, Parts I and II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notice of Sanskrit Manuscripts, Fasc. 1-35 @ 1/- each	35	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

31-5-11.

Books are supplied by V.P.P.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

State Museum Lucknow 5094

Regd 3/7/12.

सिकारोऽविद्याऽनवकारशून्येति मनसिकरोति। ताञ्चाऽनवकार-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्या प्रकृतिशून्येति मनसिकरोति। ताञ्च प्रकृतिशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्यासर्व्वधर्म्मशून्येति मनसिकरोति। ताञ्च सर्व्वधर्म्म-शून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्या स्वलक्षणशून्येति मनसिकरोति। ताञ्च स्वलक्षण-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्याऽनुपलम्भशून्येति मनसिकरोति। ताञ्चाऽनुपलम्भ-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्यातो वक्रशून्येति मनसिकरोति। ताञ्चाऽभाव-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्यास्वभावशून्येति मनसिकरोति। ताञ्चस्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽविद्याऽभावस्वभावशून्येति मनसिकरोति। ताञ्चाऽ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारः संस्कारः स्वलक्षणशून्य इति मनसिकरोति । ताञ्च स्वलक्षणशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः संस्कारोऽनुपलम्भशून्य इति मनसिकरोति । ताञ्चाऽनुपलम्भशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः संस्कारोऽभावशून्य इति मनसिकरोति । ताञ्चाऽभावशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः संस्कारः स्वभावशून्य इति मनसिकरोति । ताञ्च शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः संस्कारोऽभावस्वभावशून्य इति मनसिकरोति । ताञ्चाऽभावस्वभावशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः विज्ञानमध्यात्मशून्यमिति मनसिकरोति । तञ्चाऽध्यात्मशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोविज्ञानं वहिर्द्धाशून्यमिति मनसिकरोति । ताञ्च वहिर्द्धाशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारो विज्ञानमध्यात्मवहिर्द्धाशून्यमिति मनसिकरोति। ताञ्चा-ध्यात्मवहिर्द्धाशून्यतामुपलभते तथाच शून्यतयामन्यते उपलम्भ-योगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो विज्ञानं शून्यताशून्यमिति मनसिकरोति। ताञ्चाशून्यता-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारोविज्ञानं महाशून्यमिति मनसिकरोति। ताञ्च महा-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो विज्ञानं परमार्थशून्यमिति मनसिकरोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो विज्ञानं संस्कृतशून्यमिति मनसिकरोति। ताञ्च संस्कृत-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो विज्ञानं संस्कृतशून्यमिति मनसिकरोति। ताञ्चाऽसंस्कृत-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो विज्ञानमत्यन्तशून्यमिति मनसिकरोति। ताञ्चाऽत्यन्त-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रसिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारो विज्ञानमनवराग्रशून्यमिति मनसिकरोति। ताञ्चाऽनवराग्रशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानमनवकारशून्यमिति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानं सर्व्वधर्म्मशून्यमिति मनसिकरोति। ताञ्च सर्व्वधर्म्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानं स्वलक्षणशून्यमिति मनसिकरोति। ताञ्च स्वलक्षणशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानमनुपलम्भशून्यमिति मनसिकरोति। ताञ्चाऽनुपलम्भशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानमभावशून्यमिति मनसिकरोति। ताञ्चाऽभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानं स्वभावशून्यमिति मनसिकरोति। ताञ्च स्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो विज्ञानमभावस्वभावशून्यमिति मनसिकरोति। ताञ्चा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽभावस्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमध्यात्मशून्यमिति मनसिकरोति। ताञ्चाऽध्यात्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं बहिर्द्धाशून्यमिति मनसिकरोति। ताञ्च बहिर्द्धाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमध्यात्मबहिर्द्धाशून्यमिति मनसिकरोति। ताञ्चाऽध्यात्मबहिर्द्धाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं शून्यताशून्यमिति मनसिकरोति। ताञ्च शून्यताशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं महाशून्यमिति मनसिकरोति। ताञ्च महाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं परमार्थशून्यमिति मनसिकरोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं संस्कृतशून्यमिति मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमसंस्कृतशून्यमिति मनसिकरोति। ताञ्चाऽसंस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमत्यन्तशून्यमिति मनसिकरोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमनवराग्यशून्यमिति मनसिकरोति। ताञ्चाऽनवराग्यशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमनवकारशून्यमिति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं प्रकृतिशून्यमिति मनसिकरोति। ताञ्च प्रकृतिशून्यतामुपुलभते। तथाच शून्यतयामन्यते उपलम्भजोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं सर्व्वधर्म्मशून्यमिति मनसिकरोति। ताञ्च सर्व्वधर्म्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारो नामरूपं स्वलक्षणशून्यमिति मनसिकरोति। तांञ्च स्वलक्षणशून्यतामुपलक्षते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमनुपलम्भशून्यमिति मनसिकरोति। तांञ्चाऽनुपलम्भशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमभावशून्यमिति मनसिकरोति। तांञ्चाऽभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपं स्वभावशून्यमिति मनसिकरोति। तांञ्च स्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो नामरूपमभावस्वभावशून्यमिति मनसिकरोति। तांञ्चाऽभावस्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमध्यात्मशून्यमिति मनसिकरोति। तांञ्चाऽध्यात्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं बहिर्द्धाशून्यमिति मनसिकरोति। तांञ्च बहिर्द्धाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमध्यात्मबहिर्द्धाशून्यमिति मनसिकरोति। ताञ्चाऽध्यात्मबहिर्द्धाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं शून्यताशून्यमिति मनसिकरोति। ताञ्च शून्यताशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं महाशून्यमिति मनसिकरोति। ताञ्च महाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं परमार्थशून्यमिति मनसिकरोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं संस्कृतशून्यमिति मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमसंस्कृतशून्यमिति मनसिकरोति। ताञ्चाऽसंस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमत्यन्तशून्यमिति मनसिकरोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमनवराग्रशून्यमिति मनसिकरोति। ताञ्चाऽनवराग्यशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमनवकारशून्यमिति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं प्रकृतिशून्यमिति मनसिकरोति। ताञ्च प्रकृतिशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं सर्व्वधर्म्मशून्यमिति मनसिकरोति। ताञ्च सर्व्वधर्म्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनं स्वलचणशून्यमिति मनसिकरोति। ताञ्च स्वलचणशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमनुपलम्भशून्यमिति मनसिकरोति। ताञ्चाऽनुपलम्भशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः षड़ायतनमभावशून्यमिति मनसिकरोति। ताञ्चाऽभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारः षड़ायतनं स्वभावशून्यमिति मनसिकरोति । ताञ्च स्वभाव-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः षड़ायतनमभावस्वभावशून्यमिति मनसिकरोति । ताञ्चा-ऽभावस्वभावशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भ-योगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमिताया-ञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शोऽध्यात्मशून्य इति मनसिकरोति । ताञ्चाऽध्यात्मशून्यतामुपलभते । तथाच शून्य-तयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शो बहिर्द्धाशून्य इति मनसिकरोति । ताञ्च बहिर्द्धा-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसि-कारः स्पर्शोऽध्यात्मबहिर्द्धाशून्य इति मनसिकरोति । ताञ्चाऽध्यात्म-बहिर्द्धाशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शः शून्यताशून्य इति मनसिकरोति । ताञ्च शून्यता-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शो महाशून्य इति मनसिकरोति । ताञ्च महाशून्यता-मुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शः परमार्थशून्य इति मनसिकरोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शः संस्कृतशून्य इति मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शोऽसंस्कृतशून्य इति मनसिकरोति। ताञ्चाऽसंस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शोऽत्यन्तशून्य इति मनसिकरोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शोऽनवराग्रशून्य इति मनसिकरोति। ताञ्चाऽनवराग्रशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शोऽनवकारशून्य इति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्पर्शः प्रकृतिशून्य इति मनसिकरोति। ताञ्च प्रकृतिशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारः स्पर्शः सर्व्वधर्म्मशून्य इति मनसिकरोति । ताञ्च सर्व्वधर्म्म-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शः स्वलक्षणशून्य इति मनसिकरोति । ताञ्च स्वलक्षण-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शोऽनुपलम्भशून्य इति मनसिकरोति । ताञ्चाऽनुपलम्भ-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शोऽभावशून्य इति मनसिकरोति । ताञ्चाऽभावशून्यता-मुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शः स्वभावशून्य इति मनसिकरोति । ताञ्च स्वभाव-शून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः स्पर्शोऽभावस्वभावशून्य इति मनसिकरोति । ताञ्चा-ऽभावस्वभावशून्यतामुपलभते । तथाच शून्यतयामन्यते उपलम्भ-योगेन ।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चर-न्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽध्यात्मशून्येति मनसिकरोति । ताञ्चाऽध्यात्मशून्यतामुपलभते । तथाच शून्यतया-मन्यते उपलम्भयोगेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदना बहिर्द्धाशून्येति मनसिकरोति। ताञ्च बहिर्द्धाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽध्यात्मबहिर्द्धाशून्येति मनसिकरोति। ताञ्चाऽध्यात्मबहिर्द्धाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदना शून्यताशून्येति मनसिकरोति। ताञ्च शून्यताशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदना महाशून्येति मनसिकरोति। ताञ्च महाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदना परमार्थशून्येति मनसिकरोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदना संस्कृतशून्येति मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽसंस्कृतशून्येति मनसिकरोति। ताञ्चाऽसंस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽत्यन्तशून्येति मनसिकरोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽनवराग्रशून्येति मनसिकरोति। ताञ्चाऽनवराग्रशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽनवकारशून्येति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाप्रकृतिशून्येति मनसिकरोति। ताञ्च प्रकृतिशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनासर्व्वधर्म्मशून्येति मनसिकरोति। ताञ्च सर्व्वधर्म्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदना स्वलक्षणशून्येति मनसिकरोति। ताञ्च स्वलक्षणशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वेदनाऽनुपलम्भशून्येति मनसिकरोति। ताञ्चाऽनुपलम्भशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारोवेदना भावशून्येति मनसिकरोति। ताञ्चाऽभाव शून्यता-मुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्त-मनसिकारोवेदना स्वभावशून्येति मनसिकरोति। ताञ्च स्वभाव-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्त-मनसिकारोवेदनाऽभावस्वभावशून्येतिमनसिकरोति। ताञ्चाऽभाव-स्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायाञ्च-रन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णाऽध्यात्मशून्येति मन-सिकरोति। ताञ्चाध्यात्मशून्यतामुपलभते। तथाच शून्यतया-मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगत सर्व्वाकारज्ञताप्रतिसंयुक्तमनसि कारस्तृष्णावहिर्द्धाशून्येति मनसिकरोति। ताञ्च वहिर्द्धाशून्यता-मुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसि-कारस्तृष्णाऽध्यात्मवहिर्द्धाशून्येति मनसिकरोति। ताञ्च वहिर्द्धा-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगत सर्व्वाकारज्ञता प्रतिसंयुक्तमनसि-कारस्तृष्णाऽध्यात्मवहिर्द्धाशून्येति मनसिकरोति। ताञ्चाध्यात्मवहिर्द्धा शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारस्तृष्णाशून्यताशून्येति मनसि करोति। ताञ्च शून्यताशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारस्तृष्णामहाशून्येति मनसि करोति। ताञ्च महाशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णापरमार्थशून्येति मनसि करोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णासंस्कृतशून्येतिमनसि करोति। ताञ्च संस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णाऽसंस्कृतशून्येति मनसि करोति। ताञ्चासंस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्त मनसिकारस्तृष्णाऽत्यन्तशून्येतिमनसि करोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णाऽनवराग्रशून्येति मनसि करोति। ताञ्चाऽनवराग्रशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णाऽनवकारशून्येतिमनसि करोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णाप्रकृतिशून्येति मनसि करोति। ताञ्च प्रकृतिशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णासर्वधर्म्मशून्येतिमनसि करोति। ताञ्च सर्वधर्म्मशून्यतामुपलते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारस्तृष्णास्वलक्षणशून्येतिमनसि करोति। ताञ्च स्वलक्षणशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारस्तृष्णाऽनुपलम्भशून्येति मनसि करोति। ताञ्चाऽनुपलम्भशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारस्तृष्णाऽभावशून्येतिमनसि करोति। ताञ्चाऽभावशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारस्तृष्णास्वभावशून्येति मनसि करोति। ताञ्च स्वभावशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्त मनसिकारस्तृष्णाऽभावस्वभाव शून्येतिमनसि करोति। ताञ्चाऽभावस्वभाव शून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्वोमहासत्वः प्रज्ञापारमितायाञ्चरन्नप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकार उपादानमध्यात्मशून्यमिति मनसिकरोति। ताञ्चाध्यात्मशून्यतामुपलभते। तथाच शून्यतया-मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कार उपादानं वहिर्द्धाशून्यमिति मनसि करोति। ताञ्च वहिर्द्धा-शून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसि-कार उपादानमध्यात्मवहिर्द्धाशून्यमितिमनसि करोति। ताञ्चाऽ-ध्यात्मवहिर्द्धाशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भ-योगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कार उपादानशून्यताशून्यमिति मनसि करोति। ताञ्च शून्यता-शून्यतामुपभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि कार उपादानं महाशून्यमितिमनसि करोति। ताञ्च महाशून्यता-मुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमन-सिकार उपादानं परमार्थशून्यमितिमनसि करोति। ताञ्च पर-मार्थशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारउपादानं संस्कृतशून्यमिति मनसि करोति। ताञ्च संस्कृतशून्यता-मुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकार उपादानमसंस्कृतशून्यमितिमनसि करोति। ताञ्च ऽसंस्कृतशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्त मनसिकार उपादानमत्यन्तशून्यमितिमनसि करोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकार उपादान मनवराग्रशून्यमितिमनसि करोति। ताञ्चाऽनवराग्रशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकार उपादानमनवकारशून्यमिति मनसि करोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकार उपादानं प्रकृतिशून्यमितिमनसि करोति। ताञ्च प्रकृतिशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वकारज्ञताप्रतिसंयुक्तमनसिकार उपादानं सर्व्वधर्म्म शून्यमितिमनसि करोति। ताञ्च सर्व्वधर्म्मशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनमिकार उपादानं स्वलक्षणशून्यमिति करोति। ताञ्च स्वलक्षणशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-

5094

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कार उपादानमनुपलम्भशून्यमितिमनसि करोति। ताञ्चाऽनुपलम्भ-शून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कार उपादानमभावशून्यमिति मनसिकरोति ताञ्चाऽभावशून्यता-मुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कार उपादानं स्वभावशून्यमितिमनसिकरोति। ताञ्च स्वभाव-शून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कार उपादानमभावस्वभावशून्यमितिमनसि करोति। ताञ्चाऽभाव-स्वभावशून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायाञ्चरन्न-पगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभवोऽध्यात्म शून्य इति मनसि करोति। ताञ्चाऽध्यात्मशून्यतामुपलभते। तथा च शून्य-तयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारो भवो वहिर्द्धाशून्य इति मनसिकरोति। ताञ्च वहिर्द्धा-शून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोभवोऽध्यात्मवहिर्द्धाशून्य इति मनसि करोति। ताञ्चाऽध्यात्म-वहिर्द्धाशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्त-मनसि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारोभवः शून्यताशून्य इति मनसिकरोति। ताञ्च शून्यताशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभव महाशून्य इति मनसि करोति। ताञ्च महाशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभवः परमार्थ शून्य इति मनसिकरोति। ताञ्च परमार्थ शून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभवः संस्कृतशून्यइति मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभवोऽसंस्कृतशून्य इति मनसिकरोति। ताञ्चाऽसंस्कृतशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमिताञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभवोऽत्यन्तशून्य इति मनसिकरोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोभवोऽनवराग्रशून्य इति मनसिकरोति। ताञ्चानवराग्रशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिनंयुक्तमनसिकारोभवोऽनवकार शून्य इति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोभवःप्रकृतिशून्य इति मनसि करोति। ताञ्च प्रकृति-शून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोभवः सर्वधर्म्मशून्य इति मनसि करोति। ताञ्च सर्वधर्म्मशून्यता-मुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि कारोभवः स्वलक्षणशून्य इति मनसि करोति। ताञ्च स्वलक्षण शून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोभवोऽनुपलम्भशून्य इति मनसि करोति। ताञ्चाऽनुपलम्भ-शून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोभवोऽभावशून्य इति मनसि करोति। ताञ्चाऽभावशून्यता-मुपलभते। ताञ्चाऽभाव शून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि कारोभवः स्वभावशून्य इति मनसिकरोति। ताञ्च स्वभावशून्यता-मुपलमते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोभवोऽभावशून्य इति मनसि करोति। ताञ्चाऽभावस्वभाव-शून्यतामुपलते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरं सुभूते बोधिसत्वो महासत्वः प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिरध्यात्मशून्येति मनसि करोति। ताञ्चाऽध्यात्मशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारो जातिवहिर्द्धा शून्य इति मनसि करोति। ताञ्च वहिर्द्धाशून्यताम्मुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोजातिरध्यात्मवहिर्द्धाशून्य इति मनसिकरोति। ताञ्चाऽध्यात्म वहिर्द्धाशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारो जातिशून्यताशून्य इति मनसिकरोति। ताञ्च शून्यताशून्यताम्मुपलभते। तथा शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारो जातिमहाशून्य इति मनसि करोति। ताञ्च महाशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमिताञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिः परमार्थशून्य इति मनसि करोति। ताञ्च परमार्थ शून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिः संस्कृतशून्यता मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारो जातिरसंस्कृतशून्येति मनसिकरोति । ताञ्चाऽसंस्कृतशून्यतामुपलभते । तथा च शून्यतया मन्यते उपलम्भयोगेन ।

स प्रज्ञापारमिताताञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तयनसिकारोजातिरत्यन्तशून्येति मनसि करोति । ताञ्चात्यन्तशून्यतामुपलभते । तथा च शून्यतया मन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिरनवराग्रशून्येति मनसिकरोति । ताञ्चाऽनवराग्रशून्यतामुपलते । तथा च शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिरनवकार शून्येति मनसि करोति । ताञ्चाऽनवकारशून्यतामुपलभते । तथा च शून्यतया मन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिः प्रकृतिशून्येतिमनसिकरोति । ताञ्च प्रकृतिशून्यतामुपलभते । तथा च शून्यतया मन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिः सर्वधर्म्मशून्येति मनसिकरोति । ताञ्च सर्वधर्म्मशून्यतामुपलभते । तथा च शून्यतया मन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजातिः स्वलक्षणशून्येति मनसि करोति । ताञ्च स्वलक्षणशून्यतामुपलते । तथा च शून्यतयामन्यते उपलम्भयोगेन ।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारोजातिरनुपलम्भशून्येति मनसि करोति। ताञ्चाऽनुपलम्भ-शून्यतामुपलभते। तथा च शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोजातिरभावशून्येति मनसिकरोति। ताञ्चाऽभाव शून्यता-मुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोजातिः स्वभावशून्यइति मनसि करोति। ताञ्च स्वभाव-शून्यतामुपलमते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगत सर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोजातिरभावस्वभावशून्येति मनसिकरोति। ताञ्चाऽभावस्वभाव-शून्यतामुपलभते। तथा च शून्यतया मन्यते उपलम्भयोगेन।

पुनरपरं सुभूते बोधिसत्वोमहासत्वःस्पर्शः वेदना तृष्णा उपा-दानं भवं जातिः जरामरणं स्मृत्युपस्थानानि भावयति। तानि च स्मृत्युपस्थानान्युपलभते। तैश्च स्मृत्युपस्थानैर्मन्यते उपलम्भयोगेन। एवं, सम्यक् प्रहणानि ऋद्धिपादान् इन्द्रियाणि बलानि। बोध्य-ङ्गानि आर्य्याष्टाङ्गामार्गं आर्य्यसत्यानि ध्यानानि अप्रमाणानि आरूप्यसमापत्तीः विमोचान् अनुपूर्वविहारसमापत्तीः शून्यता-निमित्ताप्रणिहितविमोचम् खानि अभिज्ञाः समाधीन् धारणी-मुखानि तथागतबलानि वैशारद्यानि प्रतिसम्बिदः महाकरुणां आवेणिकबुद्धधर्म्मान्।

स प्रज्ञापारमिताञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसि-कारोजरामरणमध्यात्मशून्यमितिमनसिकरोति। ताञ्चाऽध्यात्म-शून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारो जरामरणं वहिर्द्धाशून्यमिति मनसि करोति। ताञ्च वहिर्द्धाशून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारो जरामरणमध्यात्मवहिर्द्धाशून्यमितिमनसि करोति। ताञ्चाऽध्यात्मवहिर्द्धाशून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजरामरणं शून्यताशून्यमितिमनसि करोति। ताञ्चशून्यताशून्यतामुपलते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारोजरामरणं महाशून्यमिति मनसिकरोति। ताञ्च महाशून्यतामुपलभते। तथाच शून्यतया मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणं परमार्थशून्यमिति मनसिकरोति। ताञ्च परमार्थशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणं संस्कृतशून्यमिति मनसिकरोति। ताञ्च संस्कृतशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणमसंस्कृतशून्यमिति मनसिकरोति। ताञ्चाऽसंस्कृतशून्यतामुपलभतें। तथाच शून्यतयामन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणमत्यन्तशून्यमिति मनसिकरोति। ताञ्चाऽत्यन्तशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणमनवराग्रशून्यमिति मनसिकरोति। ताञ्चाऽनवराग्रशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणमनवकारशून्यमिति मनसिकरोति। ताञ्चाऽनवकारशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणं प्रकृतिशून्यमिति मनसिकरोति। ताञ्च प्रकृतिशून्यतामुपुलभते। तथाच शून्यतयामन्यते उपलम्भजोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणं सर्व्वधर्म्मशून्यमिति मनसिकरोति। ताञ्च सर्व्वधर्म्मशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणं स्वलक्षणशून्यमिति मनसिकरोति। ताञ्च स्वलक्षणशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो जरामरणमनुपलम्भशून्यमिति मनसिकरोति। ताञ्चाऽनुपलम्भशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारो जरामरणमभावशून्यमिति मनसिकरोति। ताञ्चाऽभाव-शून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो जरामरणं स्वभावशून्यमिति मनसिकरोति। ताञ्च स्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारो जरामरणमभावस्वभावशून्यमिति मनसिकरोति। ताञ्चा-ऽभावस्वभावशून्यतामुपलभते। तथाच शून्यतयामन्यते उपलम्भ-योगेन।

पुनरपरं सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरन्न-पगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः स्मृत्युपस्थानानि भाव-यति। तानि च स्मृत्युपस्थानान्युपलभते। तैश्च स्मृत्युपस्थानैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः सम्यक्प्रहाणानि भावयति। तानि च सम्यक्प्रहाणान्युप-लभते। तैश्च सम्यक्प्रहाणैर्मन्यते उपलम्भयोगेन।

स प्रज्ञाप्रारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः ऋद्धिपादान् भावयति। तानि च ऋद्धिपादानुपलभते। तैश्च ऋद्धिपादैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-सिकारः इन्द्रियाणि भावयति। तानि चेन्द्रियान्युपलभते। तैश्चे-न्द्रियैर्मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो बलानि भावयति। तानि च बलान्युपलभते। तैश्च बलैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो बोध्यङ्गानि भावयति। तानि च बोध्यङ्गान्युपलभते। तैश्च बोध्यङ्गैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकार आर्य्याष्टाङ्गमार्गं भावयति। तैश्चाऽर्य्याष्टाङ्गमार्गमुपलभते। तेन चार्य्याष्टमार्गेन मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकार आर्य्यसत्यानि भावयति। तानि चार्य्यसत्यान्युपलभते। तैश्च आर्य्यसत्यैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो ध्यानानि भावयति। तानि च ध्यानान्युपलभते। तैश्च ध्यानेन मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽप्रमाणानि भावयति। तानि चाप्रमाणान्युपलभते। तैश्चाऽप्रमाणैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकार आरूप्यसमापत्तीर्भावयति। ताश्चारूप्यसमापत्तीरुपलभते। ताभिश्चारूप्यसमापत्तिभिर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्ननपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिकारो विमोक्षान् भावयति। तांश्च विमोक्षानुपलभते। तैश्च विमोक्षैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽनुपूर्व्वविहारसमापत्तीर्भावयति। ताश्चानुपूर्व्वविहारसमापत्तीरुपलभते। ताभिश्चानुपूर्व्वविहारसमापत्तिभिर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि भावयति। तानि च शून्यतानिमित्ताऽप्रणिहितविमोक्षमुखान्युपलभते। तैश्च शून्यतानिमित्ताप्रणिहितमोक्षमुखैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारोऽभिज्ञाः भावयति। ताश्चाऽभिज्ञा उपलभते। ताभिश्चाभिज्ञाभिर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः समाधीन् भावयति। तांश्च समाधीनुपलभते। तैश्च समाधिभिर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो धारणीमुखानि भावयति। तानि च धारणीमुखान्युपलभते। तैश्च धारणीमुखैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारस्तथागतबलानि भावयति। तानि च तथागतबलान्युपलभते। तैश्च तथागतबलैर्मन्यते उपलम्भयोगेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो वैशारद्यानि भावयति। तानि च वैशारद्यान्युपलभते। तैश्च वैशारद्यैर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारः प्रतिसम्विदो भावयति। ताश्च प्रतिसम्विद उपलभते। ताभिश्च प्रतिसम्विद्भिर्मन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकारो महाकरुणाम्भावयति। ताञ्च महाकरुणामुपलभते। तयाच महाकरुणयामन्यते उपलम्भयोगेन।

स प्रज्ञापारमितायाञ्चरन्नपगतसर्व्वाकारज्ञता प्रतिसंयुक्तमनसिकार आवेणिकबुद्धधर्म्मान् भावयति। तांश्च बुद्धधर्म्मानुपलभते। तैश्च बुद्धधर्म्मैर्मन्यते उपलम्भयोगेन।

एवं खलु सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायाञ्चरननुपायकुशल इमं प्रज्ञापारमितानिर्द्देशात् श्रुत्वोत्त्रस्यति सन्त्रस्यति सन्त्रासमापद्यते। आह। कथम्भगवन् बोधिसत्त्वो महासत्त्वः पापमित्रहस्तगतो भवति। येन पापमित्रेण परिगृहीत इमं प्रज्ञापारमितानिर्द्देशं श्रुत्वोत्त्रस्यति सन्त्रस्यति सन्त्रासमापद्यते। भगवानाह। इह सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं यः प्रज्ञापारमितायां चरन्तं विरेचयति विछन्दयति। ध्यानपारमितायाञ्चरन्तं विरेचयति विछन्दयति। वीर्य्यपारमितायां चरन्तं विरेचयति विछन्दयति। क्षान्तिपारमितायां चरन्तं विरेचयति विछन्दयति। शीलपारमितायाञ्चरन्तं विरेचयति विछन्दयति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दानपारमितायाश्चरन्तं विरेचयति विछन्दयति। नाऽत्र शिचितव्यं। नैतत्तथागतभाषितं नैषधर्म्मो नविनयः। कुवितर्का एते सूत्रान्ताः नैते श्रोतव्याः नोद्ग्रहीतव्याः न धारयितव्याः न वाचयितव्याः न पर्य्यवाप्तव्याः। न योनिशो मनसि कर्त्तव्याः नैतेपरेभ्यो देशयितव्याः। इत्ययं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम्।

पुनरपरं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं योऽसौ नमारकर्म्माण्युपदिशति। नमारदोषानाचष्टे इति। मारः पापीयान् बुद्धवेषेनोपसंक्रम्य बोधिसत्त्वं महासत्त्वं षड्भ्यः पारमिताभ्यो विरेचयति विछन्दयति। किन्ते कुलपुत्र प्रज्ञापारमितया भाषितया। किन्ते ध्यानपारमितया भाषितया। किन्ते वीर्य्यपारमितया भाषितया। किन्ते चान्तिपारमितया भाषितया। किन्ते शील-पारमितया भाषिताया। किन्ते दानपारमितया भाषितया। इत्येवं बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम्।

पुनरपरं सुभूते मारः पापीयान् बुद्धरूपेण बोधिसत्त्वं महासत्त्वमुपसंक्रम्य श्रावक प्रतिसंयुक्तसूत्रं गेयं व्याकरणं गाथो दाननिदानत्युक्तकजातकवैपुल्याद्भुतधर्म्मावदानोपदेशं देशयति। विवृणोति विभजते उत्तानीकरोति सम्प्रकाशयति। य इमान्येवं रूपाणि मारकर्म्माणि नाचष्टे न बोधयत्ययं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम्।

पुनरपरं सुभूते मारः पापीयान् बुद्धवेषेण बोधिसत्त्वं महासत्त्वमुपसंक्रम्यैवं वदति। न ते किञ्चित् कुलपुत्र बोधिचित्तं नापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वमवैवर्त्तिको न त्वं शक्ष्यस्यनुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुम्। य इमान्येवं रूपाणि मारकर्म्माणि नाचष्टे न बोधयति। अयं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं बोधितव्यम्।

पुनरपरं सुभूते मारः पापीयान् बुद्धवेषेण बोधिसत्त्वं महासत्त्वमुपसंक्रम्यैवं वदति। चक्षुः कुलपुत्र शून्यमात्मनात्मीयेन वा। श्रोत्रं शून्यमात्मनात्मीयेन वा। घ्राणं शून्यमात्मनात्मीयेन वा। जिह्वा शून्यात्मनात्मीयेन वा। कायः शून्य आत्मनात्मीयेन वा। मनः शून्यमात्मनात्मीयेन वा। रूपं शून्यमात्मनात्मीयेन वा। शब्दः शून्य आत्मनात्मीयेन वा। गन्धः शून्य आत्मनात्मीयेन वा। रसः शून्य आत्मनात्मीयेन वा। स्पर्शः शून्य आत्मनात्मीन वा। धर्म्मः शून्य आत्मनात्मीयेन वा। चक्षुर्व्विज्ञानं शून्यमात्मनात्मीयेन वा। श्रोत्रविज्ञानं शून्यमात्मनात्मीयेन वा। घ्राणविज्ञानं शून्यमात्मनात्मीयेन वा। जिह्वाविज्ञानं शून्यमात्मनात्मीयेन वा। कायविज्ञानं शून्यमात्मनात्मीयेन वा। मनोविज्ञानं शून्यमात्मनात्मीयेन वा। चक्षुः संस्पर्शः शून्य आत्मनात्मीयेन वा। श्रोत्रसंस्पर्शः शून्य आत्मनात्मीयेन वा। घ्राणसंस्पर्शः शून्य आत्मनात्मीयेन वा। जिह्वासंस्पर्शः शून्य आत्मनात्मीयेन वा। कायसंस्पर्शः शून्य आत्मनात्मीयेन वा। मनः संस्पर्शः शून्य आत्मनात्मीयेन वा। चक्षुः संस्पर्शप्रत्ययवेदनाशून्यात्मनात्मीयेन वा। श्रोत्रसंस्पर्शप्रत्ययवेदनाशून्यात्मनात्मीयेन वा। घ्राणसंस्पर्शप्रत्ययवेदनाशून्यात्मनात्मीयेन वा। जिह्वासंस्पर्शप्रत्ययवेदनाशून्यात्मनात्मीयेन वा। कायसंस्पर्शप्रत्ययवेदनाशून्यात्मनात्मीयेन वा। मनःसंस्पर्शप्रत्ययवेदनाशून्यात्मनात्मीयेन वा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथिवीधातुः शून्य आत्मनात्मीयेन वा। अब्धातुः शून्य आत्मनात्मीयेन वा। तेजो धातुः शून्य आत्मनात्मीयेन वा। वायु धातुः शून्य आत्मनात्मीयेन वा। आकाशधातुः शून्य आत्मनात्मीयेन वा। विज्ञानधातुः शून्य आत्मनात्मीयेन वा। अविद्याशून्यात्मनात्मीयेन वा। संस्काराः शून्या आत्मनात्मीयेन वा। विज्ञानं शून्यमात्मदात्मीयेन वा। नामरूपं शून्यमात्मनात्मीयेन वा। षड़ायतनं शून्यमात्मनात्मीयेन वा। स्पर्शः शून्य आत्मनात्मीयेन वा। वेदनाशून्यात्मनात्मीयेन वा। तृष्णाशून्यात्मनात्मीयेन वा। उपादानशून्यमात्मनात्मीयेन वा। भवः शून्य आत्मनात्मीयेन वा। जातिरशून्यात्मनात्मीयेन वा। जरामरणं शून्यमात्मनात्मीयेन वा।

दानपारमिताशून्यात्मनात्मीयेन वा। शीलपारमिताशून्यात्मनात्मीयेन वा। क्षान्तिपारमिताशून्यात्मनात्मीयेन वा। वीर्य्यपारमिताशून्यात्मनात्मीयेन वा। ध्यानपारमिताशून्यात्मनात्मीयेन वा। प्रज्ञापारमिताशून्यात्मनात्मीयेन वा।

अध्यात्मशून्यताशून्यात्मनात्मीयेन वा। बहिर्द्धाशून्यताशून्यात्मनात्मीयेन वा। अध्यात्मबहिर्द्धाशून्यतात्मनात्मीयेन वा। शून्यताशून्यताशून्यात्मनात्मीयेन वा। महाशून्यताशून्यात्मनात्मीयेन वा। परमार्थशून्यताशून्यात्मनात्मीयेन वा। संस्कृतशून्यताशून्यात्मनात्मीयेन वा। असंस्कृतशूत्यताशून्यात्मतात्मीयेन वा। अत्यन्तशून्यताशून्यात्मनात्मीयेन वा। अनवराग्रशून्यताशून्यात्मनात्मीयेन वा। अनवकारशून्यताशून्यात्मनात्मीयेन वा। प्रकृतिशून्यताशून्यात्मना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्मीयेन वा सर्व्वधर्म्मशून्यताशून्यात्मनात्मीयेन वा। स्वलक्षणशून्यता-शून्यात्मनात्मीयेन वा। अनुपलम्भशून्यताशून्यात्मनात्मीयेन वा। अभावशून्यताशून्यात्मनात्मीयेन वा। स्वभावशून्यताशून्यात्मनात्मीयेन वा। स्वभावशून्यताशून्यात्मनात्मीयेन वा।

स्मृत्युपस्थानानि शून्यान्यात्मनात्मीयेन वा। सम्यक्प्रहाणानि शून्यान्यात्मनात्मीयेन वा। ऋद्धिपादाः शून्या आत्मनात्मीयेन वा। इन्द्रियाणि शून्यान्यात्मनात्मीयेन वा। बलानि शून्यान्यात्मनात्मीयेन वा। बोध्यङ्गानि शून्यान्यात्मनात्मीयेन वा। आर्य्याष्टाङ्गमार्गः शून्य आत्मनात्मीयेन वा। आर्य्यसत्यानि शून्यान्यात्मनात्मीयेन वा। ध्यानानि शून्यान्यात्मनात्मीयेन वा। अप्रमाणानि शून्यान्यात्मनात्मीयेन वा। आरूप्यसमापत्तयः शून्या आत्मनात्मीयेन वा। विमोक्षाः शून्या आत्मनात्मीयेन वा। अनुपूर्व्वविहारसमापत्तयः शून्या आत्मनात्मीयेन वा। शून्यतानिमित्ताप्रणिहितविमोक्ष-मुखानि शून्यान्यात्मनात्मीयेन वा। अभिज्ञाः शून्या आत्मनात्मीयेन वा। समाधायः शून्या आत्मनात्मीयेन वा। धारणीमुखानि शून्यान्यात्मनात्मीयेन वा। तथागतबलानि शून्यान्यात्मनात्मीयेन वा। वैशारद्यानि शून्यान्यात्मनात्मीयेन वा। प्रतिसम्विदः शून्या आत्मनात्मीयेन वा। महाकरुणाशून्यात्मनात्मीयेन वा। आवे-णिकबुद्धधर्म्माः शून्या आत्मनात्मीयेन वा। किं करिष्यनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्य।

य इमान्येवं रूपाणि मारकर्म्माणि नाचष्टे नोपदिशत्ययं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरं सुभूते मारः पापीयान् बुद्धवेषेण नोपसंक्रम्य बोधिसत्त्वं महासत्त्वमेवं वदति । शून्या कुलपुत्रपूर्व्वादिग्बुद्धैर्भगवद्भिर्व्वोधिसत्त्वैः श्रावकैश्च । वात्र बुद्धाः न बोधिसत्त्वाः न श्रावकाः । एवं शून्या दक्षिणादिक् पश्चिमा उत्तरा अधस्तादुपरिष्टात् यावत् समन्ताद्दशदिशः शून्या बुद्धैर्भगवद्भिर्व्वोधिसत्त्वैः श्रावकैश्च । नाऽत्र बुद्धा न बोधिसत्त्वा न श्रावकाः । य इमान्येवं रूपाणि मारकर्म्माणि नाचष्टे नोपदिशत्ययं बोधिसत्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम् ।

पुनरपरं सुभूते मारः पापीयान् श्रावकवेषेणोपसंक्रम्य बोधिसत्त्वं महासत्त्वं सर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारेभ्यो विरेचयति । श्रावकप्रत्येकबुद्धप्रतिसंयुक्तमनसिकारैरववदत्यनुशास्ति । य एवं रूपाणि मारकर्म्माणि नाचष्टे नोपदिशत्ययं बोधिसत्वस्य महासत्वस्य पापमित्रं वेदितव्यम् ।

पुनरपरं सुभूते मारः पापीयानुपाध्यायाचार्य्यवेषेणोपसंक्रम्य बोधिसत्त्वं महासत्त्वं बोधिसत्त्वचर्य्याया विरेचयोः सर्व्वाकारज्ञताप्रतिसंयुक्तमनसिकारेभ्यो विरेचयति । स्मृत्युपस्थानेषु नियोजयति । सम्यक्प्रहाणेषु नियोजयति । ऋद्धिपादेषु नियोजयति । बलेषु नियोजयति । बोध्यङ्गेषु नियोजयति । आर्य्याष्टाङ्गमार्गेषु नियोजयति । आर्य्यसत्येषु नियोजयति । ध्यानेषु नियोजयति । अप्रमाणेषु नियोजयति । आरूप्यसमापत्तिषु नियोजयति । विमोक्षेषु नियोजयति । अनुपूर्व्वविहारसमापत्तिषु नियोजयति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु नियोजयति । एवं त्वं कुल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुत्रेमान् धर्म्मान् भाषित्वा श्रावकभूमिं साचात् कुरु किं करिष्यस्यनुत्तरया सम्यक्सम्बोध्या। य एवं रूपाणि मारकर्म्माणि नाचष्टे नोपदिशत्ययं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम्।

पुनरपरं सुभूते मारः पापीयान् मातापितृवेषेणोपसंक्रम्य बोधिसत्त्वं महासत्वमेवं वदति यत्र कुलपुत्र स्रोत आपत्तिफलं साचात्क्रिया। सकृदागामिफलं साचात्क्रिया। अनागामिफलं साचात्क्रिया। अर्हत्त्वं साचात्क्रिया। प्रत्येकबुद्धसाचात्क्रिया। तत्र योगमापद्यत। किन्तेऽनुत्तरया सम्यक्सम्बोध्याऽभिसम्बुद्धया। यस्याः कृतेऽप्रमेया संख्येयान् कल्पान् संसरन्नपरिमाणान् हस्तपादशिरच्छेदाननुभविष्यसि। य इमान्येवं रूपाणि मारकर्म्माणि न बोधयति नाचष्टे नोपदिशत्ययं सुभूते बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यम्।

पुनरपरं सुभूते मारः पापीयान् भिक्षुवेषेण बोधिसत्त्वं महासत्त्वमुपक्रम्य* अनात्मेति शान्तमिति शून्यमिति। अनिमित्तमिति अप्रणिहितमित्यनभिसंस्कारं इति विविक्तमित्युपलम्भयोगेनोपदिशति। वेदनाऽनित्येत्यनुपलम्भयोगेनोपदिशति। वेदनादुःखेत्यनात्मेति शान्तेति शून्येति अनिमित्तेति। अप्रणिहितेति अनभिसंस्कारेति विविक्तेति उपलम्भयोगेनोपदिशति। संज्ञा अनित्ये-

* रूपमनित्यमित्युपलम्भयोगेनोपदिशति रूपदुःखमिति उपलम्भयोगेनोपदिशतीति वाक्यभागः सर्व्वत्र प्रयोक्तव्यः आदर्शपुस्तके न तथा लिखितमस्ति। आदर्शानुरूपमत्र लिखितम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्युपलम्भयोगेनोपदिशति । संज्ञा दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारेति विविक्तेति उपलम्भयोगेनोपदिशति । संस्कारा अनित्या इति उपलम्भयोगेनोपदिशति । संस्कारा दुःखा इति अनात्मा न इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इत्युपलम्भयोगेनोपदिशति । विज्ञानमनित्यमित्युपलम्भयोगेनोपदिशति । विज्ञानं दुःखमित्यनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति।

चक्षुरनित्यमिति दुःखमित्यनात्मेति शान्तमिति शून्यमिति अनभिज्ञमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति। घ्राणमनित्यमिति। अथायुष्मान् सुभूतिर्भगवन्तामेतदवोचत् । बोधिसत्त्वोमहासत्त्व इति भगवन्नुच्यते । कोऽस्य पदार्थः । एवमुक्ते भगवानायुष्मन्तं सुभूतिमेतदवोचत् । अपदार्थः सुभूते बोधिसत्त्वपदार्थः । तत्कस्य हेतोरनुत्पादा बोधिरनुत्पादः सत्त्वः । न हि सुभूते बोधौपदमस्तिनसत्त्वे तस्मादपदार्थो बोधिसत्त्वपदार्थः । तद्यथापि नाम सुभूते आकाशेशकुनेः पदं न विद्यते । एवमेव बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते स्वप्नेपदं न विद्यते । एवमेव बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते मायायाः पदं न विद्यते एवमेव बोधिसत्त्व पदार्थो न विद्यते । तद्यथापि नाम मरीच्याः पदं न विद्यते एवमेव बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उदकचन्द्रस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम प्रतिश्रुत्कायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते प्रतिभासस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते प्रतिविम्बस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतनिर्म्मितस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते भूतकोट्याः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते। तथतायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते अवितथतायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते अनन्यतथतायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते धर्म्मतायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते धर्म्मधातोः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते धर्म्मस्थितितायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते धर्म्मनियामतायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य रूपे पदं न विद्यते। वेदनायां पदं न विद्यते संज्ञायां पदं न विद्यते संस्कारेषु पदं न विद्यते विज्ञाने पदं न विद्यते संस्कारेषु पदं न विद्यते विज्ञानेपदं न विद्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य चक्षुषि पदं न विद्यते श्रोत्रे पदं न विद्यते घ्राणेपदं न विद्यते जिह्वायां पदं न विद्यते काये पदं न विद्यते मनसि पदं न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य चक्षुर्विज्ञानेपदं न विद्यते श्रोत्रविज्ञाने पदं न विद्यते घ्राणविज्ञाने पदं न विद्यते जिह्वाविज्ञानेपदं न विद्यते कायविज्ञाने पदं न विद्यते। मनोविज्ञाने पदं न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य चक्षुः संस्पर्शे पदं न विद्यते श्रोत्रसंस्पर्शे पदं न विद्यते। घ्राणसंस्पर्शे पदं न विद्यते। जिह्वासंस्पर्शे पदं न विद्यते। कायसंस्पर्शे पदं न विद्यते। मनः संस्पर्शेपदं न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य चक्षुःसंस्पर्श प्रत्ययवेदयिते पदं न विद्यते श्रोत्र-संस्पर्शप्रत्ययवेदयिते पदं न विद्यते घ्राणसंस्पर्शप्रत्ययवेदयिते पदं न विद्यतें जिह्वासंस्पर्शप्रत्ययवेदयिते पदं न विद्यते कायसंस्पर्श-प्रत्ययवेदयिते पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदयिते पदं न विद्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याविद्यायां पदं न विद्यते संस्कारेषु पदं न विद्यते विज्ञाने पदं न विद्यते नाम रूपे पदं न विद्यते षड़ायतने पदं न विद्यते स्पर्शे पदं न विद्यते वेदनायां पदं न विद्यते तृष्णायां पदं न विद्यते उपादाने पदं न विद्यते भवे पदं न विद्यते। जातौ पदं न विद्यते जरामरणे पदं न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य दानपारमितायां चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य शीलपारमितायां चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य क्षान्तिपारमितायाञ्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य वीर्य्यपारमितायाञ्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य ध्यानपारमितायाञ्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य प्रज्ञापारमितायाञ्चरतः पदार्थो न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याध्यात्म शून्यतायाञ्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य बहिर्द्धाशून्यतायाञ्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याध्यात्म बहिर्द्धा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य शून्यताशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य महाशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यापि नाम सुभूते मायापुरुषस्य परमार्थ शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य संस्कृत-शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यासंस्कृत शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यात्यन्तशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यानवराग्र शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यानवकार-शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते माया-पुरुषस्य प्रकृतिशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य सर्व्वधर्म्मशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य स्वलक्षणशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याऽनुप-लम्भशून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याभाव शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य स्वभाव शून्यतायाश्चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याभावस्वभावशून्य-तायाश्चरतः पदार्थो न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाश्च-रतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते माया-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरुषस्य स्मृत्युपस्थानेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य सम्यक् प्रहाणेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यार्द्धपादेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्येन्द्रियेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य बलेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य बोध्यङ्गेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यार्य्याष्टाङ्गमार्गे चरतः पदार्थो न विद्यते।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यार्य्यसत्येषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य ध्यानेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याप्रमाणेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यारूप्यसमापत्तिषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याष्टसु विमोक्षेषु चरतः पदा दुःखमित्यनात्मेति शान्तमिति शून्यमित्यनिमित्तमित्यप्रणिहितमित्यनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति। जिह्वाऽनित्येति दुःखेत्यनात्मेति शान्तेति शून्येत्यनिमित्तेत्यप्रणिहितेत्यनभिसंस्कार इति विविक्तेत्युपलम्भयोगेनोपदिशति। कायोऽनित्य इति दुःख इत्यनात्मेति शान्त इति शून्य इत्यनिमित्त इत्यप्रणिहित इत्यनभिसंस्कार इति विविक्त इत्युपलम्भयोगेनोपदिशति। मनोऽनित्यमिति दुःखमित्यनात्मेति शान्तमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यमित्यनिमित्तमित्यप्रणिहितमित्यनभिसंस्कार इति विविक्त-मित्युपलम्भयोगेनोपदिशति।

रूपमनित्यमिति दुःखमित्यनात्मेति शान्तमिति शून्यमित्यनि-मित्तमित्यप्रणिहितमित्यनभिसंस्कार इति विविक्तमित्युपलम्भयो-गेनोपदिशति। शब्द*मनित्यमिति दुःखमित्यनात्मेति शान्तमिति शून्यमित्यनिमित्तमित्यप्रणिहितमित्यनभिसंस्कार इति विविक्तमि-त्युपलम्भयोगेनोपदिशति। गन्धोऽनित्य इति दुःख इत्यनात्मेति शान्त इति शून्य इत्यनिमित्त इत्यप्रणिहित इत्यनभिसंस्कार इति विविक्त इत्युपलम्भयोगेनोपदिशति। रसोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इत्यप्रणिहित इत्य-भिसंस्कार इति विविक्त इत्युपलम्भयोगेनोपदिशति। स्पर्शोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कारा इति विविक्ता इत्युपलम्भयो-गेनोपदिशति। धर्म्मा अनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अन-भिसंस्कारा इति विविक्ता इत्युपलम्भयोगेनोपदिशति।

चक्षुर्विज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति। श्रोत्रविज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति। अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोप-

* शब्दशब्दस्य पुंलिङ्गे प्रयोगोयुक्तः आदर्शपुस्तके नपुंसकेन निर्दिष्टं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिशति। घ्राणविज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति। अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति। जिह्वाविज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति। कायविज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति मनोविज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमित्युपलम्भयोगेनोपदिशति।

चक्षुःसंस्पर्शोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति। अनभिसंस्कार इति विविक्त इत्युपलम्भयोगेनोपदिशति। श्रोत्रसंस्पर्शोऽनित्य इति दुःख इति। अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इत्युपलम्भयोगेनोपदिशति। घ्राणसंस्पर्शोऽनित्य इति दुःख इति। अनात्मेति शान्त इति शून्य इति निमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इत्युपलम्भयोगेनोपदिशति।

जिह्वासंस्पर्शोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति। विविक्त इत्युपलम्भयोगेनोपदिशति। कायसंस्पर्शोऽनित्य इति दुःख इति अनात्मा इति शान्त इति शून्य इति अनिमित्त इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। मनःसंस्पर्शोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति।

चक्षुः संस्पर्शप्रत्ययवेदितमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति। श्रोत्रसंस्पर्शप्रत्ययवेदितमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति। अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति। घ्राणसंस्पर्शप्रत्ययवेदितमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति। विविक्तमिति उपलम्भयोगेनोपदिशति। जिह्वासंस्पर्शप्रत्ययवेदितमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति।

कायसंस्पर्शप्रत्ययवेदितमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति। मनः संस्पर्शप्रत्ययवेदितमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति।

पृथिवीधातुरनित्य इति दुःख इति अनात्मेति शान्त इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। अवधातुरनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। तेजोधातुरनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। वायुधातुरनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। आकाश धातुरनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति।

विज्ञानधातुरनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। अविद्याऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कार इति विविक्तेति उपलम्भयोगेनोपदिशति। संस्कारा अनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इत्युपलम्भयोगेनोपदिशति। विज्ञानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिशति। नामरूपमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति। षडायतनमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति। स्पर्शोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति। अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। वेदनाऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति। अप्रणिहितेति अनभिसंस्कार इति विविक्तेति उपलम्भयोगेनोपदिशति। तृष्णाऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। उपादानमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति। भवोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगेनोपदिशति। जातिरनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कार इति विविक्तेति उपलम्भयोगेनोपदिशति। जरामरणमनित्यमिति दुःखमिति अनात्मेति शान्तमिति शून्यमिति अनिमित्तमिति अप्रणिहितमिति अनभिसंस्कार इति विविक्तमिति उपलम्भयोगेनोपदिशति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दानपारमिताऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कार इति विविक्तेति उपलम्भयोगेनोपदिश्यति। शीलपारमिताऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कार इति विविक्तेति उपलम्भयोगेनोपदिश्यति। क्षान्तिपारमिताऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कार इति विविक्तेति उपलम्भयोगेनोपदिश्यति। वीर्य्यपारमिता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति। ध्यानपारमिता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति निमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति। प्रज्ञापारमिताऽनित्येति दुःखेति अनात्मेति शान्तेभि शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति।

अध्यात्मशून्यताऽनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति। वहिर्द्धाशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति। अध्यात्मवहिर्द्धाशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति। शून्यता शून्यता अनित्येति दुःखेति अनात्मेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। महाशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। परमार्थ-शून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमि-त्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगे-नोपदिशति। संस्कृतशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। असंस्कृतशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। अत्यन्त शून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमि-त्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगे नोपदिशति। अनवराग्रशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। अनवकारशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिशति। प्रकृति-शून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमि-त्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भ-योगेनोपदिशति। सर्वधर्म्मशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विविक्तेति उपलम्भयोगेनोपदिश्यति । स्वलक्षणशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति । अनुपलम्भशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति । अभावशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति । स्वभाव शून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति । अभावस्वभावशून्यता अनित्येति दुःखेति अनात्मेति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारा इति विविक्तेति उपलम्भयोगेनोपदिश्यति ।

स्मृत्युपस्थानानि अनित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारा इति विविक्तानीति उपलम्भयोगेनोपदिश्यति । सम्यक् प्रहाणान्यनित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारा इति विविक्तानीति उपलम्भयोगेनोपदिश्यति । ऋद्धिपादा अनित्या इति दुःखाइति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिश्यति । इन्द्रियान्यनित्यानीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्ता-नीति अप्रणिहितानीति अनभिसंस्कारानीति* विविक्तानीति उपलम्भयोगेनोपदिश्यति। बलान्यनित्यानीति दुःखानीति अना-त्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहिता-नीति अनभिसंस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिश्यति। बोध्यङ्गान्यनित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिश्यति। आर्य्याष्टाङ्गमार्गोऽनित्य इति दुःख इति अनात्मेति शान्त इति शून्य इति अनिमित्त इति अप्रणिहित इति अनभिसंस्कार इति विविक्त इति उपलम्भयोगे-नोपदिश्यति। आर्य्यसत्यान्यनित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीतिअप्रणिहितानीति अनभि-संस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिश्यति। ध्यानान्य-नित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारानीति विविक्ता-नीति उपलम्भयोगेनोपदिश्यति। अप्रमाणान्यनित्यानीति दुःखा-नीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारानीति विविक्तानीति उपलम्भ-योगेनोपदिश्यति। आरूप्यसमापत्तयोऽनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति

---

* पूर्व्वं सर्वत्रानेभिसंस्कारा इति पाठः इह तु अनभिसंस्कारानीति विशेष्यलिङ्गभागितया निर्दिष्टं एवं परत्रापि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अप्रणिहिता इति अनभिसंस्कारा इति विविक्त इति उपलम्भयोगेनोपदिश्यति। विमोक्षा अनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिश्यति। अनुपूर्व्वविहारसमापत्तयोऽनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिश्यति। शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यनित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिश्यति। अभिज्ञा अनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिश्यति। समाधयोऽनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिश्यति।

धारणीमुखानि अनित्यानि दुःखानि अनात्मानि शान्तानि शून्यानि अनिमित्तानि अप्रणिहितानि अनभिसंस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिश्यति। तथागत बलानि अनित्यानीति दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिश्यति। वैशारद्यानि अनित्यानीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुःखानीति अनात्मानीति शान्तानीति शून्यानीति अनिमित्तानीति अप्रणिहितानीति अनभिसंस्कारानीति विविक्तानीति उपलम्भयोगेनोपदिशति। प्रतिसम्विदोऽनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिशति। महामैत्री अनित्या इति दुःखा इति अनात्मानति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारेति विविक्तेति उपलम्भयोगेनोपदिशति। महाकरुणा अनित्येति दुःखेति अनात्मानति शान्तेति शून्येति अनिमित्तेति अप्रणिहितेति अनभिसंस्कारेति विविक्तेति उपलम्भयोगेनोपदिशति। आवेणिकबुद्धधर्म्मा अनित्या इति दुःखा इति अनात्मान इति शान्ता इति शून्या इति अनिमित्ता इति अप्रणिहिता इति अनभिसंस्कारा इति विविक्ता इति उपलम्भयोगेनोपदिशति। य एकरूपाणि मारकर्म्माणि नाचष्टे नोपदिशत्ययं बोधिसत्त्वस्य महासत्त्वस्य पापमित्रं वेदितव्यं। एवं हि सुभूते बोधिसत्त्वेन महासत्त्वेन पापमित्राणि वेदितव्यानि। विदित्वा च परिवर्ज्जयितव्यानि॥ ०॥

शतसाहस्रयां प्रज्ञापारमितायाः षष्ठः परिवर्त्तः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ सप्तमः परिवर्त्तः ।

अथायुष्मान् सुभूतिर्भगवन्तमेतदवोचत् । बोधिसत्त्वो महासत्त्व इति भगवत्युच्यते, कोऽस्य पदार्थः । एवमुक्ते भगवानायुष्मन्तं सुभूतिमेतदवोचत् । अपदार्थः सुभूते बोधिसत्त्वपदार्थः । तत्कस्य हेतोरनुत्पादो बोधिरनुत्पादः सत्त्वः । नहि सुभूते बोधौपदमस्ति नवासत्त्वे तस्मादपदार्थो बोधिसत्त्वपदार्थः तद्यथापि नाम सुभूते आकाशेशकुनेः पदं न विद्यते । एवमेव बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम स्वप्नेपदं न विद्यते । एवमेव बोधिसत्त्व-पदार्थो न विद्यते । तद्यथापि नाम सुभूते मायायाः पदं न विद्यते । एवमेव बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते मरीच्याः पदं न विद्यते । एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते उदकचन्द्रस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते प्रतिश्रुत्कायाः पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते प्रतिभासस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते विम्बस्य पदं न विद्यते। एव-मेव बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथा-गतनिर्म्मितस्य पदं न विद्यते। एवमेव बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते मायापुरुषस्यार्य्याष्टाङ्गमार्गेचरतः पदार्थो न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यार्य्यसत्येषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य ध्यानेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याऽप्रमाणेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते माया-पुरुषस्यारूप्यसमापत्तिषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याष्टसुविमोक्षेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य नवस्वनुपूर्व्वविहारसमापत्तिषु चरतः पदं न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य शून्यतानिमित्ताऽप्रणिहितविमोक्षेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्याऽभिज्ञासु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य समाधिषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य धारणी-मुखेषु चरतः पदार्थो न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते मायापुरुषस्य तथागतबलेषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य वैशार-द्येषु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते माया-पुरुषस्य प्रतिसम्बित्सु चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्य महामैत्र्यां चरतः पदार्थो न विद्यते। तद्य-थापि नाम सुभूते मायापुरुषस्य महाकरुणायां चरतः पदार्थो न विद्यते। तद्यथापि नाम सुभूते मायापुरुषस्यावेणिक बुद्धधर्म्मेषु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चरतः पदार्थो न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य रूपेपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य रूपस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य वेदनायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या वेदनायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य संज्ञायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्त्वात्तस्याः संज्ञायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य संस्कारेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषां संस्काराणां।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य विज्ञानेपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य विज्ञानस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्बुद्धस्य चक्षुषिपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य चक्षुषः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य श्रोत्रेपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य श्रोत्रस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य घ्राणेपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य घ्राणस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य जिह्वायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या जिह्वायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य कायपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य कायस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य मनसिपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य मनसः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य रूपे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य रूपस्य एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्व पदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य शब्दे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्तस्य शब्दस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हत सम्यक् सम्बुद्धस्य गन्धे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य गन्धस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य रसे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य रसस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य स्पर्शे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य स्पर्शस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य धर्म्मेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषां धर्म्माणां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य चक्षुर्व्विज्ञाने पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य चक्षुर्व्विज्ञानस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य श्रोत्रविज्ञाने पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य श्रोत्रविज्ञानस्य। एवमेव सुभूते बोधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य घ्राणविज्ञाने पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य घ्राण-विज्ञानस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य जिह्वाविज्ञाने पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य जिह्वाविज्ञानस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य कायविज्ञाने पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य काय-विज्ञानस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य मनोविज्ञाने पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य मनोविज्ञानस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते ।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य चक्षुः-संस्पर्शे पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य चक्षुःसंस्पर्शस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्या-र्हतः सम्यक् सम्बुद्धस्य श्रोत्रसंस्पर्शे पदं न विद्यते । तत्कस्य हेतोर-विद्यमानत्वात्तस्य श्रोत्रसंस्पर्शस्य । एवमेव सुभूते बोधिसत्त्वस्य महा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य घ्राणसंस्पर्शं पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य घ्राणसंस्पर्शस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्बुद्धस्य जिह्वासंस्पर्शं पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य जिह्वासंस्पर्शस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य कायसंस्पर्शं पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य कायसंस्पर्शस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य मनः संस्पर्शं पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य मनः संस्पर्शस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य चक्षुःसंस्पर्शं पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य चक्षुःसंस्पर्शप्रत्ययवेदितस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य श्रोत्रसंस्पर्शप्रत्ययवेदिते पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य श्रोत्रसंस्पर्शप्रत्ययवेदितस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य घ्राणसंस्पर्शप्रत्ययवेदिते पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य घ्राणसंस्पर्शप्रत्ययवेदितस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य जिह्वासंस्पर्शप्रत्ययवेदिते पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य जिह्वासंस्पर्शप्रत्ययवेदितस्य ।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य कायसंस्पर्शप्रत्ययवेदिते पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य कायसंस्पर्शप्रत्ययवेदितस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य मनःसंस्पर्शप्रत्ययवेदिते पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य मनःसंस्पर्शप्रत्ययवेदितस्य । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते ।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्याऽविद्यायां पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तस्य अविद्यायाः । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य संस्कारेषु पदं न विद्यते । तत्कस्य हेतोर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विद्यमानत्वात्तेषां संस्काराणाम्। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य विज्ञाने पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य विज्ञानस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य नामरूपे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य नाम रूपस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य षडायतने पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य षडायतनस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य स्पर्शे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य स्पर्शस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य वेदनायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या वेदनाया। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य तृष्णायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः तृष्णायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्याऽर्हतः सम्यक् सम्बुद्धस्योपादानेपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्योपादानस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य भवे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य भवस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य जातौ पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याजातेः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य जरामरणे पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य जरामरणस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य दानपारमितायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य दानपारमितायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य शीलपारमितायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः शीलपारमितायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्हतः सम्यक् सम्बुद्धस्य क्षान्तिपारमितायां पदं न विद्यते । तत् कस्य हेतोरविद्यमानत्वात्तस्याः क्षान्तिपारमितायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य वीर्य्यपारमितायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या वीर्य्यपारमितायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञा-पारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य ध्यानपारमितायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या ध्यानपारमितायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्या-र्हतः सम्यक् सम्बुद्धस्य प्रज्ञापारमितायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः प्रज्ञापारमितायाः। एवमेव सुभूते बोधि-सत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्या-ध्यात्मशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वा-त्तस्या अध्यात्मशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महास-त्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य वहिर्द्धा-शून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या वहिर्द्धा शून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुध्यात्मवहिर्द्धाशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या अध्यात्मवहिर्द्धा शून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य शून्यता शून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः शून्यता शून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य महाशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या महाशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य परमार्थ शून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः परमार्थशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथायतस्यार्हतः सम्यक्सम्बुद्धस्य संस्कृतशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः संस्कृतशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्याऽसंस्कृतशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या असंस्कृतशून्यतायाः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्यात्यन्तशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः अत्यन्तशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्यानवराग्रशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या अनवराग्रशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हत सम्यक्सम्बुद्धस्यानवकारशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वत्तस्यानवकारशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य प्रकृतिशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वत्तस्याः प्रकृतिशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य सर्व्वधर्म्मशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानात्वात्तस्याः सर्व्वधर्म्मशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स्वलक्षणशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वात्तस्याः स्वलक्षणशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्याऽनुपलम्भ-शून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या ऽनुपलम्भशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्याभावशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः अभावशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागत-स्यार्हतः सम्यक्सम्बुद्धस्य स्वभावशून्यतायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्याः स्वभावशून्यतायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधि-सत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्याभावस्वभावशून्यतायां पदं न विद्यते। तत्कस्य हेतो-रविद्यमानत्वात्तस्या अभावस्वभावशून्यतायाः।

तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य स्मृत्युपस्थानेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषां स्मृत्युपस्थानानां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञा-पारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक्सम्बुद्धस्य सम्यक्प्रहाणेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषां सम्यक्प्रहाणानां। एवमेव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य ऋद्धिपादेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषामृद्धिपादानां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य इन्द्रियेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषामिन्द्रियाणां।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य बलेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषां बलानां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य बोध्यङ्गेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषां बोध्यङ्गानां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य मार्गेपदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्य मार्गस्य। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्यार्य्यसत्येषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषामार्य्यसत्यानां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य ध्यानेषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषां ध्यानानां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्याप्रमाणेषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषामप्रमाणानां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्यारूप्यसमापत्तिषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तास्यामारूप्यसमापत्तीनां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य विमोचेषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषां विमोचाणां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्यानुपूर्व्वविहारसमापत्तिषु पदं नविद्यते । तत्कस्य हेतोरविद्यमानत्वत्तास्यामनुपूर्व्वविहारसमापत्तिनां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य शून्यतानिमित्ताप्रणिहितविमोचमुखेषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषां शून्यतानिमित्ताप्रणिहितविमोचाणां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्याभिज्ञानुपदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तासामभिज्ञानां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य समाधिषु पदं न विद्यते । तत् कस्य हेतोरविद्यमानत्वात्तेषां समाधीनां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य धारणीसुखेषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषां धारणीसुखानां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य तथागतबलेषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषां तथागतबलानां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य चतुर्षुवैशारद्येषु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तेषां वैशारद्यानां ।

एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते । तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य चतसृषु प्रतिसम्वित्सु पदं न विद्यते । तत्कस्य हेतोरविद्यमानत्वात्तासां प्रतिसम्विदां । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्य महाकरुणायां पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तस्या महाकरुणायाः। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते तथागतस्यार्हतः सम्यक् सम्बुद्धस्याष्टादशावेणिकबुद्धधर्म्मेषु पदं न विद्यते। तत्कस्य हेतोरविद्यमानत्वात्तेषामावेणिकबुद्धधर्म्माणां। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूतेऽसंस्कृतधातौ संस्कृतधातु पदं न विद्यते। संस्कृतधातवसंस्कृतधातुपदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूतेऽनुत्पादे पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूते ऽनिरोधेपदा न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायां चरतो बोधिसत्त्वपदं न विद्यते। तद्यथापि नाम सुभूतेऽसंक्लेशाऽव्यवदाने पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूतेऽनभिसंस्कारे पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते। तद्यथापि नाम सुभूतेऽप्रादुर्भावे पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न विद्यते । तद्यथापि नाम सुभूतेऽनुपलम्भे पदं न विद्यते । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते ।

आह । कस्य भगवन्ननुत्पादे पदं न विद्यते । कस्यानिरोधे पदं न विद्यते । कस्यासंक्लेशाव्यवदाने पदं न विद्यते । कस्याऽप्रादुर्भावे पदं न विद्यते । कस्याऽनभिसंस्कारे पदं न विद्यते । कस्याऽनुपलम्भे पदं न विद्यते । भगवानाह । रूपस्य सुभूतेऽनुत्पादे पदं न विद्यते । रूपस्याऽनिरोधे पदं न विद्यते । रूपस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । रूपस्याऽनभिसंस्कारे पदं न विद्यते । रूपस्याऽप्रादुर्भावे पदं न विद्यते । रूपस्याऽनुपलम्भे पदं न विद्यते । वेदनायाः सुभूते अनुत्पादे पदं न विद्यते । वेदनाया अनिरोधे पदं न विद्यते । वेदनाया असंक्लेशा व्यवदाने पदं न विद्यते । वेदनाया अनभिसंस्कारे पदं न विद्यते । वेदनाया अप्रादुर्भावे पदं न विद्यते । वेदनाया अनुपलम्भे पदं न विद्यते । संज्ञायाः सुभूतेऽनुत्पदे पदं न विद्यते । संज्ञाया अनिरोधे पदं न विद्यते । संज्ञाया असंक्लेशाव्यवदाने पदं न विद्यते । संज्ञाया अनभिसंस्कारे पदं न विद्यते । संज्ञाया अप्रादुर्भावे पदं न विद्यते । संज्ञाया अनुपलम्भे पदं न विद्यते । संस्काराणां सुभूतेऽनुत्पादे पदं न विद्यते । संस्काराणामनिरोधे पदं न विद्यते । संस्काराणामसंक्लेशाव्यवदाने पदं न विद्यते । संस्काराणामनभिसंस्कारे पदं न विद्यते । संस्काराणामप्रादुर्भावे पदं न विद्यते । संस्काराणामनुपलम्भे पदं न विद्यते । विज्ञानस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूतेऽनुत्पादे पदं न विद्यते। विज्ञानस्यानिरोधे पदं न विद्यते। विज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। विज्ञानस्यानभिसंस्कारे पदं न विद्यते। विज्ञानस्याऽप्रादुर्भावे पदं न विद्यते। विज्ञानस्याऽनुपलम्भे पदं न विद्यते।

चक्षुषः सुभूतेऽनुत्पादे पदं न विद्यते। चक्षुषोऽनिरोधे पदं न विद्यते। चक्षुषोऽसंक्लेशाव्यवदाने पदं न विद्यते। चक्षुषोऽनभिसंस्कारे पदं न विद्यते। चक्षुषोऽप्रादुर्भावे पदं न विद्यते। चक्षुषोऽनुपलम्भे पदं न विद्यते। श्रोत्रस्य सुभूतेऽनुत्पादे पदं न विद्यते। श्रोत्रस्याऽनिरोधे पदं न विद्यते। श्रोत्रस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। श्रोत्रस्याऽनभिसंस्कारे पदं न विद्यते। श्रोत्रस्याऽप्रादुर्भावे पदं न विद्यते। श्रोत्रस्याऽनुपलम्भे पदं न विद्यते। घ्राणस्य सुभूतेऽनुत्पादे पदं न विद्यते। घ्राणस्यानिरोधे पदं न विद्यते। घ्राणस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। घ्राणस्याऽनभिसंस्कारे पदं न विद्यते। घ्राणस्याऽप्रादुर्भावे पदं न विद्यते। घ्राणस्याऽनुपलम्भे पदं न विद्यते। जिह्वायाः सुभूतेऽनुत्पादे पदं न विद्यते। जिह्वाया अनिरोधे पदं न विद्यते। जिह्वाया असंक्लेशाव्यवदाने पदं न विद्यते। जिह्वाया अनभिसंस्कारे पदं न विद्यते। जिह्वाया अप्रादुर्भावे पदं न विद्यते। जिह्वाया अनुपलम्भे पदं न विद्यते। कायस्य सुभूतेऽनुत्पादे पदं न विद्यते। कायस्याऽनिरोधे पदं न विद्यते। कायस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। कायस्याऽनभिसंस्कारे पदं न विद्यते। कायस्याऽप्रादुर्भावे पदं न विद्यते। कायस्याऽनुपलम्भे पदं न विद्यते। मनसः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभूतेऽनुत्पादे पदं न विद्यते । मनसोऽनिरोधे पदं न विद्यते । मनसोऽसंक्लेशाव्यवदाने पदं न विद्यते । मनसोऽनभिसंस्कारे पदं न विद्यते । मनसोप्रादुर्भावे पदं न विद्यते मनसोऽनुपलम्भे पदं न विद्यते ।

रूपस्य सुभूतेऽनुत्पादे पदं न विद्यते । रूपस्याऽनिरोधे पदं न विद्यते । रूपस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । रूपस्याऽनभिसंस्कारे पदं न विद्यते । रूपस्याऽप्रादुर्भावे पदं न विद्यते । रूपस्याऽनुपलम्भे पदं न विद्यते । शब्दस्य सुभूतेऽनुत्पादे पदं न विद्यते । शब्दस्याऽनिरोधे पदं न विद्यते । शब्दस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । शब्दस्यानभिसंस्कारे पदं न विद्यते । शब्दस्याऽप्रादुर्भावे पदं न विद्यते । शब्दस्याऽनुपलम्भे पदं न विद्यते । गन्धस्य सुभूतेऽनुत्पादे पदं न विद्यते । गन्धस्याऽनिरोधे पदं न विद्यते । गन्धस्याऽसंक्लेशाऽव्यवदाने पदं न विद्यते । गन्धस्याऽनभिसंस्कारे पदं न विद्यते । गन्धस्याऽप्रादुर्भावे पदं न विद्यते । गन्धस्याऽनुपलम्भे पदं न विद्यते । रसस्य सुभूतेऽनुत्पादे पदं न विद्यते । रसस्याऽनिरोधे पदं न विद्यते । रसस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । रसस्याऽनभिसंस्कारे पदं न विद्यते । रसस्याप्रादुर्भावे पदं न विद्यते । रसस्याऽनुपलम्भे पदं न विद्यते । स्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते । स्पर्शस्याऽनिरोधे पदं न विद्यते । स्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । स्पर्शस्याऽनभिसंस्कारे पदं न विद्यते । स्पर्शस्याऽप्रादुर्भावे पदं न विद्यते । स्पर्शस्याऽनुपलम्भे पदं न विद्यते । धर्म्माणांसुभूतेऽनुत्पादे पदं न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विद्यते । धर्म्माणामनिरोधे पदं न विद्यते । धर्म्माणामसंक्लेशाव्यवदाने पदं न विद्यते । धर्म्माणामनभिसंस्कारे पदं न विद्यते । धर्म्माणामप्रादुर्भावे पदं न विद्यते । धर्म्माणामनुपलम्भे पदं न विद्यते ।

चक्षुर्व्विज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते । चक्षुर्व्विज्ञानस्याऽनिरोधे पदं न विद्यते । चक्षुर्व्विज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । चक्षुर्व्विज्ञानस्याऽनभिसंस्कारे पदं न विद्यते । चक्षुर्व्विज्ञानस्याऽप्रादुर्भावे पदं न विद्यते । चक्षुर्व्विज्ञानस्याऽनुपलम्भे पदं न विद्यते । श्रोत्रविज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते । श्रोत्रविज्ञानस्याऽनिरोधे पदं न विद्यते । श्रोत्रविज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । श्रोत्रविज्ञानस्याऽनभिसंस्कारे पदं न विद्यते । श्रोत्रविज्ञानस्याऽप्रादुर्भावे पदं न विद्यते । श्रोत्रविज्ञानस्यानुपलम्भे पदं न विद्यते । घ्राणविज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते । घ्राणविज्ञाणस्याऽनिरोधे पदं न विद्यते । घ्राणविज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । घ्राणविज्ञानस्याऽनभिसंस्कारे पदं न विद्यते । घ्राणविज्ञानस्याऽप्रादुर्भावे पदं न विद्यते । घ्राणविज्ञानस्याऽनुपलम्भे पदं न विद्यते । जिह्वाविज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते । जिह्वाविज्ञानस्याऽनिरोधे पदं न विद्यते । जिह्वाविज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते । जिह्वाविज्ञानस्याऽनभिसंस्कारे पदं न विद्यते । जिह्वाविज्ञानस्याऽप्रादुर्भावे पदं न विद्यते । जिह्वाविज्ञानस्याऽनुपलम्भे पदं न विद्यते । कायविज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते । कायविज्ञानस्याऽनि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रोधे पदं न विद्यते। कायविज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। कायविज्ञानस्याऽनभिसंस्कारे पदं न विद्यते। कायविज्ञानस्याऽप्रादुर्भावे पदं न विद्यते। कायविज्ञानस्याऽनुपलम्भे पदं न विद्यते। मनविज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते। मनविज्ञानस्याऽनिरोधे पदं न विद्यते। मनविज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। मनविज्ञानस्याऽनभिसंस्कारे पदं न विद्यते। मनविज्ञानस्याऽप्रादुर्भावे पदं न विद्यते। मनविज्ञानस्याऽनुपलम्भे पदं न विद्यते।

चक्षुःसंस्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। चक्षुःसंस्पर्शस्याऽनिरोधे पदं न विद्यते। चक्षुःसंस्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। चक्षुःसंस्पर्शस्याऽनभिसंस्कारे पदं न विद्यते। चक्षुःसंस्पर्शस्याऽप्रादुर्भावे पदं न विद्यते। चक्षुःसंस्पर्शस्याऽनुपलम्भे पदं न विद्यते। श्रोत्रसंस्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। श्रोत्रसंस्पर्शस्याऽनिरोधे पदं न विद्यते। श्रोत्रसंस्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। श्रोत्रसंस्पर्शस्यानभिसंस्कारे पदं न विद्यते। श्रोत्रसंस्पर्शस्याऽप्रादुर्भावे पदं न विद्यते। श्रोत्रसंस्पर्शस्याऽनुपलम्भे पदं न विद्यते। घ्राणसंस्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। घ्राणसंस्पर्शस्यानिरोधे पदं न विद्यते। घ्राणसंस्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। घ्राणसंस्पर्शस्यानभिसंस्कारे पदं न विद्यते। घ्राणसंस्पर्शस्याप्रादुर्भावे पदं न विद्यते। घ्राणसंस्पर्शस्याऽनुपलम्भे पदं न विद्यते। जिह्वासंस्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। जिह्वासंस्पर्शस्याऽनिरोधे पदं न विद्यते। जिह्वासंस्पर्श-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्याऽसंक्लेशाव्यवदाने पदं न विद्यते। जिह्वासंस्पर्शस्यानभिसंस्कारे पदं न विद्यते। जिह्वासंस्पर्शस्याऽप्रादुर्भावे पदं न विद्यते। जिह्वासंस्पर्शस्याऽनुपलम्भे पदं न विद्यते।

कायसंस्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। कायसंस्पर्शस्याऽनिरोधे पदं न विद्यते। कायसंस्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। कायसंस्पर्शस्याऽनभिसंस्कारे पदं न विद्यते। कायसंस्पर्शस्याऽप्रादुर्भावे पदं न विद्यते। कायसंस्पर्शस्याऽनुपलम्भे पदं न विद्यते। मनःसंस्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। मनःसंस्पर्शस्याऽनिरोधे पदं न विद्यते। मनःसंस्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। मनःसंस्पर्शस्याऽनभिसंस्कारे पदं न विद्यते। मनःसंस्पर्शस्याऽप्रादुर्भावे पदं न विद्यते। मनःसंस्पर्शस्याऽनुपलम्भे पदं न विद्यते।

चक्षुःसंस्पर्शप्रत्ययवेदितस्य सुभूतेऽनुत्पादे पदं न विद्यते। चक्षुःसंस्पर्शप्रत्ययवेदितस्याऽनिरोधे पदं न विद्यते। चक्षुःसंस्पर्शप्रत्ययवेदितस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। चक्षुःसंस्पर्शप्रत्ययवेदितस्याऽनभिसंस्कारे पदं न विद्यते। चक्षुःसंस्पर्शप्रत्ययवेदितस्याऽप्रादुर्भावे पदं न विद्यते। चक्षुःसंस्पर्शप्रत्ययवेदितस्याऽनुपलम्भे पदं न विद्यते। श्रोत्रसंस्पर्शप्रत्ययवेदितस्य सुभूतेऽनुत्पादे पदं न विद्यते। श्रोत्रसंस्पर्शप्रत्ययवेदितस्याऽनिरोधे पदं न विद्यते। श्रोत्रसंस्पर्शप्रत्ययवेदितस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। श्रोत्रसंस्पर्शप्रत्ययवेदितस्याऽनभिसंस्कारे पदं न विद्यते। श्रोत्रसंस्पर्शप्रत्ययवेदितस्याऽप्रादुर्भावे पदं न विद्यते। श्रोत्रसंस्पर्शस्याऽनुपलम्भे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदितस्य सुभूतेऽनुत्पादे पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदितस्याऽनिरोधे पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदितस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदितस्याऽनभिसंस्कारे पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदितस्याऽप्रादुर्भावे पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदितस्याऽनुपलम्भे पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदितस्य सुभूतेऽनुत्पादे पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदितस्याऽनिरोधे पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदितस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदितस्याऽनभिसंस्कारे पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदितस्याऽप्रादुर्भावे पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदितस्याऽनुपलम्भे पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदितस्य सुभूतेऽनुत्पादे पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदितस्याऽनिरोधे पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदितस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदितस्याऽनभिसंस्कारे पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदितस्याऽप्रादुर्भावे पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदितस्याऽनुपलम्भे पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदितस्य सुभूतेऽनुत्पादे पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदितस्याऽनिरोधे पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदितस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदितस्याऽनभिसंस्कारे पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदितस्या अप्रादुर्भावे पदं न विद्यते। मनःसंस्पर्शप्रत्ययवेदितस्याऽनुपलम्भे पदं न विद्यते।

पृथिवीधातोः सुभूतेऽनुत्पादे पदं न विद्यते। पृथिवीधातो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रनिरोधे पदं न विद्यते। पृथिवीधातोरसंक्लेशाव्यवदाने पदं न विद्यते। पृथिवीधातोरनभिसंस्कारे पदं न विद्यते। पृथिवीधातोरप्रादुर्भावे पदं न विद्यते। पृथिवीधातोरनुपलम्भे पदं न विद्यते। अब्धातोः सुभूतेऽनुत्पादे पदं न विद्यते। अब्धातोरनिरोधे पदं न विद्यते। अब्धातोरसंक्लेशाव्यवदाने पदं न विद्यते। अब्धातोरनभिसंस्कारे पदं न विद्यते। अब्धातोरप्रादुर्भावे पदं न विद्यते। अब्धातोरनुपलम्भे पदं न विद्यते। तेजोधातोः सुभूतेऽनुत्पादे पदं न विद्यते। तेजोधातोरनिरोधे पदं न विद्यते। तेजोधातोरसंक्लेशाव्यवदाने पदं न विद्यते। तेजोधातोरनभिसंस्कारे पदं न विद्यते। तेजोधातोरप्रादुर्भावे पदं न विद्यते। तेजोधातोरनुपलम्भे पदं न विद्यते। वायुधातोः सुभूतेऽनुत्पादे पदं न विद्यते। वायुधातोरनिरोधे पदं न विद्यते। वायुधातोरसंक्लेशाव्यवदाने पदं न विद्यते। वायुधातोरनभिसंस्कारे पदं न विद्यते। वायुधातोरप्रादुर्भावे पदं न विद्यते। वायुधातोरनुपलम्भे पदं न विद्यते। आकाशधातोः सुभूतेऽनुत्पादे पदं न विद्यते। आकाशधातोरनिरोधे पदं न विद्यते। आकाशधातोरसंक्लेशाव्यवदाने पदं न विद्यते। आकाशधातोरनभिसंस्कारे पदं न विद्यते। आकाशधातोरप्रादुर्भावे पदं न विद्यते। आकाशधातोरनुपलम्भे पदं न विद्यते।

विज्ञानधातोः सुभूतेऽनुत्पादे पदं न विद्यते। विज्ञानधातोरनिरोधे पदं न विद्यते। विज्ञानधातोरसंक्लेशाव्यवदाने पदं न विद्यते। विज्ञानधातोरनभिसंस्कारे पदं न विद्यते। विज्ञानधातोरप्रादुर्भावे पदं न विद्यते। विज्ञानधातोरनुपलम्भे पदं न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विद्यते। अविद्यायाः सुभूतेऽनुत्पादे पदं न विद्यते। अविद्याया अनिरोधे पदं न विद्यते। अविद्याया असंक्लेशाव्यवदाने पदं न विद्यते। अविद्याया अनभिसंस्कारे पदं न विद्यते। अविद्याया अप्रादुर्भावे पदं न विद्यते। अविद्याया अनुपलम्भे पदं न विद्यते। संस्काराणां सुभूतेऽनुत्पादे पदं न विद्यते। संस्काराणामनिरोधे पदं न विद्यते। संस्काराणामसंक्लेशाव्यवदाने पदं न विद्यते। संस्काराणामनभिसंस्कारे पदं न विद्यते। संस्काराणामप्रादुर्भावे पदं न विद्यते। संस्काराणामनुपलम्भे पदं न विद्यते। विज्ञानस्य सुभूतेऽनुत्पादे पदं न विद्यते। विज्ञानस्यानिरोधे पदं न विद्यते। विज्ञानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। विज्ञानस्यानभिसंस्कारे पदं न विद्यते। विज्ञानस्याऽप्रादुर्भावे पदं न विद्यते। विज्ञानस्यानुपलम्भे पदं न विद्यते। नामरूपस्य सुभूतेऽनुत्पादे पदं न विद्यते। नामरूपस्याऽनिरोधे पदं न विद्यते। नामरूपस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। नामरूपस्याऽनभिसंस्कारे पदं न विद्यते। नामरूपस्याऽप्रादुर्भावे पदं न विद्यते। नामरूपस्याऽनुपलम्भे पदं न विद्यते। षडायतनस्य सुभूतेऽनुत्पादे पदं न विद्यते। षडायतनस्याऽनिरोधे पदं न विद्यते। षडायतनस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। षडायतनस्यानभिसंस्कारे पदं न विद्यते। षडायतनस्याऽप्रादुर्भावे पदं न विद्यते। षडायतनस्याऽनुपलम्भे पदं न विद्यते। स्पर्शस्य सुभूतेऽनुत्पादे पदं न विद्यते। स्पर्शस्याऽनिरोधे पदं न विद्यते। स्पर्शस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। स्पर्शस्याऽनभिसंस्कारे पदं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न विद्यते। स्पर्शस्याप्रादुर्भावे पदं न विद्यते। स्पर्शस्याऽनुपलम्भे पदं न विद्यते। वेदनायाः सुभूतेऽनुत्पादे पदं न विद्यते। वेदनाया अनिरोधे पदं न विद्यते। वेदनाया असंक्लेशाव्यवदाने पदं न विद्यते। वेदनाया अनभिसंस्कारे पदं न विद्यते। वेदनाया अप्रादुर्भावे पदं न विद्यते। वेदनाया अनुपलम्भे पदं न विद्यते। तृष्णायाः सुभूतेऽनुत्पादे पदं न विद्यते। तृष्णाया अनिरोधे पदं न विद्यते। तृष्णाया असंक्लेशाव्यवदाने पदं न विद्यते। तृष्णाया अनभिसंस्कारे पदं न विद्यते। तृष्णाया अप्रादुर्भावे पदं न विद्यते। तृष्णाया अनुपलम्भे पदं न विद्यते। उपादानस्य सुभूतेऽनुत्पादे पदं न विद्यते। उपादानस्याऽनिरोधे पदं न विद्यते। उपादानस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। उपादानस्याऽनभिसंस्कारे पदं न विद्यते। उपादानस्याऽप्रादुर्भावे पदं न विद्यते। उपादानस्याऽनुपलम्भे पदं न विद्यते। भवस्य सुभूतेऽनुत्पादे पदं न विद्यते। भवस्याऽनिरोधे पदं न विद्यते। भवस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। भवस्याऽनभिसंस्कारे पदं न विद्यते। भवस्याऽप्रादुर्भावे पदं न विद्यते। भवस्याऽनुपलम्भे पदं न विद्यते। जातेः सुभूतेऽनुत्पादे पदं न विद्यते। जातेरनिरोधे पदं न विद्यते। जातेरसंक्लेशाव्यवदाने पदं न विद्यते। जातेरनभिसंस्कारे पदं न विद्यते। जातेरप्रादुर्भावे पदं न विद्यते। जातेरनुपलम्भे पदं न विद्यते। जरामरणस्य सुभूतेऽनुत्पादे पदं न विद्यते। जरामरणस्याऽनिरोधे पदं न विद्यते। जरामरणस्याऽसंक्लेशाव्यवदाने पदं न विद्यते। जरामरणस्याऽन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिसंस्कारे पदं न विद्यते। जरामरणस्याऽप्रादुर्भावे पदं न विद्यते। जरामरणस्याऽनुपलम्भे पदं न विद्यते।

दानपारमितायाः सुभूतेऽनुत्पादे पदं न विद्यते। दानपारमिताया अनिरोधे पदं न विद्यते। दानपारमिताया असंक्लेशाव्यवदाने पदं न विद्यते। दानपारमिताया अनभिसंस्कारे पदं न विद्यते। दानपारमिताया अप्रादुर्भावे पदं न विद्यते। दानपारमिताया अनुपलम्भे पदं न विद्यते। शीलपारमितायाः सुभूतेऽनुत्पादे पदं न विद्यते। शीलपारमिताया अनिरोधे पदं न विद्यते। शीलपारमिताया असंक्लेशाव्यवदाने पदं न विद्यते। शीलपारमिताया अनभिसंस्कारे पदं न विद्यते। शीलपारमिताया अप्रादुर्भावे पदं न विद्यते। शीलपारमिताया अनुपलम्भे पदं न विद्यते। चान्तिपारमितायाः सुभूतेऽनुत्पादे पदं न विद्यते। चान्तिपारमिताया अनिरोधे पदं न विद्यते। चान्तिपारमिताया असंक्लेशाव्यवदाने पदं न विद्यते। चान्तिपारमिताया अनभिसंस्कारे पदं न विद्यते। चान्तिपारमिताया अप्रादुर्भावे पदं न विद्यते। चान्तिपारमिताया अनुपलम्भे पदं न विद्यते। वीर्य्यपारमितायाः सुभूतेऽनुत्पादे पदं न विद्यते। वीर्य्यपारमिताया अनिरोधे पदं न विद्यते। वीर्य्यपारमिताया असंक्लेशाव्यवदाने पदं न विद्यते। वीर्य्यपारमिताया अनभिसंस्कारे पदं न विद्यते। वीर्य्यपारमिताया अप्रादुर्भावे पदं न विद्यते। वीर्य्यपारमिताया अनुपलम्भे पदं न विद्यते। ध्यानपारमितायाः सुभूतेऽनुत्पादे पदं न विद्यते। ध्यान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पारमितायाः अनिरोधे पदं न विद्यते। ध्यानपारमितायाः असंक्लेशाव्यवदाने पदं न विद्यते। ध्यानपारमितायाः अनभिसंस्कारे पदं न विद्यते। ध्यानपारमितायाः अप्रादुर्भावे पदं न विद्यते। ध्यानपारमितायाः अनुपलम्भे पदं न विद्यते। प्रज्ञापारमितायाः सुभूते ऽनुत्पादे पदं न विद्यते। प्रज्ञापारमितायाः अनिरोधे पदं न विद्यते। प्रज्ञापारमितायाः असंक्लेशाव्यवदाने पदं न विद्यते। प्रज्ञापारमितायाः अनभिसंस्कारे पदं न विद्यते। प्रज्ञापारमितायाः अप्रादुर्भावे पदं न विद्यते। प्रज्ञापारमितायाः अनुपलम्भे पदं न विद्यते।

अध्यात्मशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अध्यात्मशून्यतायाः अनिरोधे पदं न विद्यते। अध्यात्मशून्यतायाः असंक्लेशाव्यवदाने पदं न विद्यते। अध्यात्मशून्यतायाः अनभिसंस्कारे पदं न विद्यते। अध्यात्मशून्यतायाः अप्रादुर्भावे पदं न विद्यते। अध्यात्मशून्यतायाः अनुपलम्भे पदं न विद्यते। बहिर्द्धाशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। बहिर्द्धाशून्यतायाः अनिरोधे पदं न विद्यते। बहिर्द्धाशून्यतायाः असंक्लेशाव्यवदाने पदं न विद्यते। बहिर्द्धाशून्यतायाः अनभिसंस्कारे पदं न विद्यते। बहिर्द्धाशून्यतायाः अप्रादुर्भावे पदं न विद्यते। बहिर्द्धाशून्यतायाः अनुपलम्भे पदं न विद्यते। अध्यात्मबहिर्द्धाशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अध्यात्मबहिर्द्धाशून्यतायाः अनिरोधे पदं न विद्यते। अध्यात्मबहिर्द्धाशून्यतायाः असंक्लेशाव्यवदाने पदं न विद्यते। अध्यात्मबहिर्द्धाशून्यतायाः अनभिसंस्कारे पदं न विद्यते। अध्यात्मबहिर्द्धाशून्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ताया अप्रादुर्भावे पदं न विद्यते। अध्यात्मबहिर्द्धाशून्यताया अनुपलम्भे पदं न विद्यते। शून्यताशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। शून्यताशून्यताया अनिरोधे पदं न विद्यते। शून्यताशून्यतायाः असंक्लेशाव्यवदाने पदं न विद्यते। शून्यताशून्यताया अनभिसंस्कारे पदं न विद्यते। शून्यताशून्यताया अप्रादुर्भावे पदं न विद्यते। शून्यताशून्यताया अनुपलम्भे पदं न विद्यते। महाशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। महाशून्यताया अनिरोधे पदं न विद्यते। महाशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। महाशून्यताया अनभिसंस्कारे पदं न विद्यते। महाशून्यताया अप्रादुर्भावे पदं न विद्यते। महाशून्यताया अनुपलम्भे पदं न विद्यते। परमार्थशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। परमार्थशून्यताया अनिरोधे पदं न विद्यते। परमार्थशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। परमार्थशून्यताया अनभिसंस्कारे पदं न विद्यते। परमार्थशून्यताया अप्रादुर्भावे पदं न विद्यते। परमार्थशून्यताया अनुपलम्भे पदं न विद्यते। संस्कृतशून्यताया सुभूतेऽनुत्पादे पदं न विद्यते। संस्कृतशून्यताया अनिरोधे पदं न विद्यते। संस्कृतशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। संस्कृतशून्यताया अनभिसंस्कारे पदं न विद्यते। संस्कृतशून्यताया अप्रादुर्भावे पदं न विद्यते। संस्कृतशून्यताया अनुपलम्भे पदं न विद्यते। असंस्कृतशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। असंस्कृतशून्यताया अनिरोधे पदं न विद्यते। असंस्कृतशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। असंस्कृतशून्यताया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनभिसंस्कारे पदं न विद्यते। असंस्कृतशून्यताया अप्रादुर्भावे पदं न विद्यते। असंस्कृतशून्यताया अनुपलम्भे पदं न विद्यते। अत्यन्तशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अत्यन्तशून्यताया अनिरोधे पदं न विद्यते। अत्यन्तशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। अत्यन्तशून्यताया अनभिसंस्कारे पदं न विद्यते। अत्यन्तशून्यताया अप्रादुर्भावे पदं न विद्यते। अत्यन्तशून्यताया अनुपलम्भे पदं न विद्यते। अनवराग्रशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अनवराग्रशून्यताया अनिरोधे पदं न विद्यते। अनवराग्रशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। अनवराग्रशून्यतायाः अनभिसंस्कारे पदं न विद्यते। अनवराग्रशून्यताया अप्रादुर्भावे पदं न विद्यते। अनवराग्रशून्यताया अनुपलम्भे पदं न विद्यते। अनवकारशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अनवकारशून्यताया अनिरोधे पदं न विद्यते। अनवकार शून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। अनवकारशून्यताया अनभिसंस्कारे पदं न विद्यते। अनवकारशून्यताया अप्रादुर्भावे पदं न विद्यते। अनवकार शून्यताया अनुपलम्भे पदं न विद्यते। प्रकृतिशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। प्रकृतिशून्यताया अनिरोधे पदं न विद्यते। प्रकृतिशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। प्रकृतिशून्यताया अनभिसंस्कारे पदं न विद्यते। प्रकृतिशून्यताया अप्रादुर्भावे पदं न विद्यते। प्रकृतिशून्यताया अनुपलम्भे पदं न विद्यते। सर्व्वधर्म्मशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। सर्व्वधर्म्मशून्यताया अनिरोधे पदं न विद्यते। सर्व्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्म्मशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। सर्व्वधर्म्मशून्यताया अनभिसंस्कारे पदं न विद्यते। सर्व्वधर्म्मशून्यताया अप्रादुर्भावे पदं न विद्यते। सर्व्वधर्म्मशून्यताया अनुपलम्भे पदं न विद्यते। स्वलक्षणशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। स्वलक्षणशून्यताया अनिरोधे पदं न विद्यते। स्वलक्षणशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। स्वलक्षणशून्यताया अनभिसंस्कारे पदं न विद्यते। स्वलक्षणशून्यताया अप्रादुर्भावे पदं न विद्यते। स्वलक्षणशून्यताया अनुपलम्भे पदं न विद्यते। अनुपलम्भशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अनुपलम्भशून्यताया अनिरोधे पदं न विद्यते। अनुपलम्भशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। अनुपलम्भशून्यताया अनभिसंस्कारे पदं न विद्यते। अनुपलम्भशून्यताया अप्रादुर्भावे पदं न विद्यते। अनुपलम्भशून्यताया अनुपलम्भे पदं न विद्यते। अभावशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। अभावशून्यताया अनिरोधे पदं न विद्यते। अभावशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। अभावशून्यताया अनभिसंस्कारे पदं न विद्यते। अभावशून्यताया अप्रादुर्भावे पदं न विद्यते। अभावशून्यताया अनुपलम्भे पदं न विद्यते। स्वभावशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते। स्वभावशून्यताया अनिरोधे पदं न विद्यते। स्वभावशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। स्वभावशून्यतायाः अनभिसंस्कारे पदं न विद्यते। स्वभावशून्यताया अप्रादुर्भावे पदं न विद्यते। स्वभावशून्यताया अनुपलम्भे पदं न विद्यते। अभावस्वभावशून्यतायाः सुभूतेऽनुत्पादे पदं न विद्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभावस्वभावशून्यताया अनिरोधे पदं न विद्यते। अभावस्वभावशून्यताया असंक्लेशाव्यवदाने पदं न विद्यते। अभावस्वभावशून्यताया अनभिसंस्कारे पदं न विद्यते। अभावस्वभावशून्यताया अप्रादुर्भावे पदं न विद्यते। अभावस्वभावशून्यताया अनुपलम्भे पदं न विद्यते।

स्मृत्युपस्थानानां सुभूतेऽनुत्पादे पदं न विद्यते। स्मृत्युपस्थानानामनिरोधे पदं न विद्यते। स्मृत्युपस्थानानामसंक्लेशाव्यवदाने पदं न विद्यते। स्मृत्युपस्थानानामनभिसंस्कारे पदं न विद्यते। स्मृत्युपस्थानानामप्रादुर्भावे पदं न विद्यते। स्मृत्युपस्थानानामनुपलम्भे पदं न विद्यते। सम्यक्प्रहाणानां सुभूतेऽनुत्पादे पदं न विद्यते। सम्यक्प्रहाणानामनिरोधे पदं न विद्यते। सम्यक्प्रहाणानामसंक्लेशाव्यवदाने पदं न विद्यते। सम्यक्प्रहाणानामनभिसंस्कारे पदं न विद्यते। सम्यक्प्रहाणानामप्रादुर्भावे पदं न विद्यते। सम्यक्प्रहाणानामनुपलम्भे पदं न विद्यते। ऋद्धिपादानां सुभूतेऽनुत्पादे पदं न विद्यते। ऋद्धिपादानामनिरोधे पदं न विद्यते। ऋद्धिपादानामसंक्लेशाव्यवदाने पदं न विद्यते। ऋद्धिपादानामनभिसंस्कारे पदं न विद्यते। ऋद्धिपादानामप्रादुर्भावे पदं न विद्यते। ऋद्धिपादानामनुपलम्भे पदं न विद्यते।

इन्द्रियाणां सुभूतेऽनुत्पादे पदं न विद्यते। इन्द्रियाणामनिरोधे पदं न विद्यते। इन्द्रियाणामसंक्लेशाव्यवदाने पदं न विद्यते। इन्द्रियाणामनभिसंस्कारे पदं न विद्यते। इन्द्रियाणामप्रादुर्भावे पदं न विद्यते। इन्द्रियाणामनुपलम्भे पदं न विद्यते। बलानां सुभूतेऽनुत्पादे पदं न विद्यते। बलानामनिरोधे पदं न विद्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बलानामसंक्लेशाव्यवदाने पदं न विद्यते। बलानामनभिसंस्कारे पदं न विद्यते। बलानामप्रादुर्भावे पदं न विद्यते। बलानामनुपलम्भे पदं न विद्यते। बोध्यङ्गानां सुभूतेऽनुत्पादे पदं न विद्यते। बोध्यङ्गानामनिरोधे पदं न विद्यते। बोध्यङ्गानामसंक्लेशाव्यवदाने पदं न विद्यते। बोध्यङ्गानामनभिसंस्कारे पदं न विद्यते। बोध्यङ्गानामप्रादुर्भावे पदं न विद्यते। बोध्यङ्गानामनुपलम्भे पदं न विद्यते। आर्य्याष्टाङ्गमार्गस्य सुभूतेऽनुत्पादे पदं न विद्यते। आर्य्याष्टाङ्गामार्गस्यानिरोधे पदं न विद्यते। आर्य्याष्टाङ्गमार्गस्या-संक्लेशाव्यवदाने पदं न विद्यते। आर्य्याष्टाङ्गामार्गस्यानभिसंस्कारे पदं न विद्यते। आर्य्याष्टाङ्गमार्गस्याप्रादुर्भावे पदं न विद्यते। आर्य्याष्टाङ्गमार्गस्याऽनुपलम्भे पदं न विद्यते। आर्य्यासत्यानां सुभूतेऽनुत्पादे पदं न विद्यते। आर्य्यासत्यानामनिरोधे पदं न विद्यते। आर्य्यासत्यानामसंक्लेशाव्यवदाने पदं न विद्यते। आर्य्यासत्यानामनभिसंस्कारे पदं न विद्यते। आर्य्यासत्यानामप्रादुर्भावे पदं न विद्यते। आर्य्यासत्यानामनुपलम्भे पदं न विद्यते। ध्यानानां सुभूतेऽनुत्पादे पदं न विद्यते। ध्यानानामनिरोधे पदं न विद्यते। ध्यानानामसंक्लेशाव्यवदाने पदं न विद्यते। ध्यानानामनभिसंस्कारे पदं न विद्यते। ध्यानानामप्रादुर्भावे पदं न विद्यते। ध्यानानामनुपलम्भे पदं न विद्यते। अप्रमाणानां सुभूतेऽनुत्पादे पदं न विद्यते। अप्रमाणानामनिरोधे पदं न विद्यते। अप्रमाणाना-मसंक्लेशाव्यवदाने पदं न विद्यते। अप्रमाणानामनभिसंस्कारे पदं न विद्यते। अप्रमाणानामप्रादुर्भावे पदं न विद्यते। अप्रमाणाना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनुपलम्भे पदं न विद्यते। आरूप्यसमापत्तीनां सुभूतेऽनुत्पादे पदं न विद्यते। आरूप्यसमापत्तीनामनिरोधे पदं न विद्यते। आरूप्यसमापत्तीनामसंक्लेशाव्यवदाने पदं न विद्यते। आरूप्यसमापत्तीनामनभिसंस्कारे पदं न विद्यते। आरूप्यसमापत्तीनामप्रादुर्भावे पदं न विद्यते। आरूप्यसमापत्तीनामनुपलम्भे पदं न विद्यते। विमोक्षाणां सुभूतेऽनुत्पदे पदं न विद्यते। विमोक्षाणामनिरोधे पदं न विद्यते। विमोक्षाणामसंक्लेशाव्यवदाने पदं न विद्यते। विमोक्षाणामनभिसंस्कारे पदं न विद्यते। विमोक्षाणामप्रादुर्भावे पदं न विद्यते। विमोक्षाणामनुपलम्भे पदं न विद्यते। अनुपूर्व्वविहारसमापत्तीनां सुभूतेऽनुत्पादे पदं न विद्यते। अनुपूर्व्वविहारसमापत्तीनामनिरोधे पदं न विद्यते। अनुपूर्व्वविहारसमापत्तीनामसंक्लेशाव्यवदाने पदं न विद्यते। अनुपूर्व्वविहारसमापत्तीनामनभिसंस्कारे पदं न विद्यते। अनुपूर्व्वविहारसमापत्तीनामप्रादुर्भावे पदं न विद्यते। अनुपूर्व्वविहारसमापत्तीनामनुपलम्भे पदं न विद्यते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां सुभूतेऽनुत्पादे पदं न विद्यते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानामनिरोधे पदं न विद्यते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानामसंक्लेशाव्यवदाने पदं न विद्यते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानामनभिसंस्कारे पदं न विद्यते शून्यतानिमित्ताप्रणिहितविमोक्षमुखानामप्रादुर्भावे पदं न विद्यते। शून्यतानिमित्ताप्रणिहितविमोक्षमुखानामनुपलम्भे पदं न विद्यते। अभिज्ञानां सुभूतेऽनुत्पादे पदं न विद्यते। अभिज्ञानामनिरोधे पदं न विद्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिज्ञानामसंक्लेशाव्यवदाने पदं न विद्यते। अभिज्ञानामनभिसंस्कारे पदं न विद्यते। अभिज्ञानामप्रादुर्भावे पदं न विद्यते। अभिज्ञानामनुपलम्भे पदं न विद्यते। समाधीनां सुभूतेऽनुत्पादे पदं न विद्यते। समाधीनामनिरोधे पदं न विद्यते। समाधीनामसंक्लेशाव्यवदाने पदं न विद्यते। समाधीनामनभिसंस्कारे पदं न विद्यते। समाधीनामप्रादुर्भावे पदं न विद्यते। समाधीनामनुपलम्भे पदं न विद्यते। धारणीमुखानां सुभूतेऽनुत्पादे पदं न विद्यते। धारणीमुखानामनिरोधे पदं न विद्यते। धारणीमुखानामसंक्लेशाव्यवदाने पदं न विद्यते। धारणीमुखानामनभिसंस्कारे पदं न विद्यते। धारणीमुखानामप्रादुर्भावे पदं न विद्यते। धारणीमुखानामनुपलम्भे पदं न विद्यते। तथागतबलानां सुभूतेऽनुत्पादे पदं न विद्यते। तथागतबलानामनिरोधे पदं न विद्यते। तथागतबलानामसंक्लेशाव्यवदाने पदं न विद्यते। तथागतबलानामनभिसंस्कारे पदं न विद्यते। तथागतबलानामप्रादुर्भावे पदं न विद्यते। तथागतबलानामनुपलम्भे पदं न विद्यते। वैशारद्यानां सुभूतेऽनुत्पादे पदं न विद्यते। वैशारद्यनामनिरोधे पदं न विद्यते। वैशारद्यानामसंक्लेशाव्यवदाने पदं न विद्यते। वैशारद्यानामनभिसंस्कारे पदं न विद्यते। वैशारद्यानामप्रादुर्भावे पदं न विद्यते। वैशारद्यानामनुपलम्भे पदं न विद्यते। प्रतिसम्विदां सुभूतेऽनुत्पादे पदं न विद्यते। प्रतिसम्विदामनिरोधे पदं न विद्यते। प्रतिसम्विदामसंक्लेशाव्यवदाने पदं न विद्यते। प्रतिसम्विदामनभिसंस्कारे पदं न विद्यते। प्रतिसम्विदामप्रादुर्भावे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदं न विद्यते । प्रतिसम्बिदामनुपलम्भे पदं न विद्यते । महामैत्र्याः सुभूतेऽनुत्पादे पदं न विद्यते । महामैत्र्या अनिरोधे पदं न विद्यते । महामैत्र्या असंक्लेशाव्यवदाने पदं न विद्यते । महामैत्र्या अनभिसंस्कारे पदं न विद्यते । महामैत्र्या अप्रादुर्भावे पदं न विद्यते । महामैत्र्या अनुपलम्भे पदं न विद्यते । महाकरुणायाः सुभूतेऽनुत्पादे पदं न विद्यते । महाकरुणाया अनिरोधे पदं न विद्यते । महाकरुणाया असंक्लेशाव्यवदाने पदं न विद्यते । महाकरुणाया अनभिसंस्कारे पदं न विद्यते । महाकरुणाया अनुपलम्भे पदं न विद्यते । आवेणिकबुद्धधर्म्माणां सुभूतेऽनुत्पादे पदं न विद्यते । आवेणिकबुद्धधर्म्माणामनिरोधे पदं न विद्यते । आवेणिकबुद्धधर्म्माणामसंक्लेशाव्यवदाने पदं न विद्यते । आवेणिकबुद्धधर्म्माणामनभिसंस्कारे पदं न विद्यते । आवेणिकबुद्धधर्म्माणामप्रादुर्भावे पदं न विद्यते । आवेणिकबुद्धधर्म्माणामनुपलम्भे पदं न विद्यते ।

तद्यथापि नाम सुभूते रूपस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते । वेदनाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते । संज्ञाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते । संस्काराणामत्यन्तविशुद्धौ निमित्ते पदं न विद्यते । विज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते । एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वस्य पदार्थो न विद्यते ।

तद्यथापि नाम सुभूते चक्षुषोऽत्यन्तविशुद्धौ निमित्ते पदं न विद्यते । श्रोत्रस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते । घ्राणस्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वन्तविशुद्धौ निमित्ते पदं न विद्यते। जिह्वाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। कायस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। मनसोऽत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते रूपस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। शब्दस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। गन्धस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। रसस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। स्पर्शस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। धर्म्माणामत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्व पदार्थो न विद्यते।

तद्यथापि नाम सुभूते चक्षुर्विज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। श्रोत्रविज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। घ्राणविज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। जिह्वाविज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। कायविज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। मनोविज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते चक्षुःसंस्पर्शस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। श्रोत्रसंस्पर्शस्यात्यन्तविशुद्धौ पदं न विद्यते। घ्राणसंस्पर्शस्यात्यन्तविशुद्धौ पदं न विद्यते। जिह्वासंस्पर्शविज्ञानस्यात्यन्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशुद्धौ पदं न विद्यते। कायसंस्पर्शविज्ञानस्यात्यन्तविशुद्धौ पदं न विद्यते। मनःसंस्पर्शस्यात्यन्तविशुद्धौ पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते चक्षुःसंस्पर्शप्रत्ययवेदनाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। श्रोत्रसंस्पर्शप्रत्ययवेदनाया अत्यन्तविशुद्धौ पदं न विद्यते। घ्राणसंस्पर्शप्रत्ययवेदनाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। जिह्वासंस्पर्शप्रत्ययवेदनाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। कायसंस्पर्शप्रत्ययवेदनाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। मनः संस्पर्शप्रत्ययवेदनाया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते पृथिवीधातोरत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। अब्धातोरत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। तेजोधातोरत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। वायुधातोरत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। आकाशधातोरत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। विज्ञानधातोरत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। एवमेव सुभूते बोधिसत्त्वस्य महासत्त्वस्य प्रज्ञापारमितायाञ्चरतो बोधिसत्त्वपदार्थो न विद्यते।

तद्यथापि नाम सुभूते अविद्याया अत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। संस्काराणामत्यन्तविशुद्धौ निमित्ते पदं न विद्यते। विज्ञानस्यात्यन्तविशुद्धौ निमित्ते पदं न विद्यते। नामरूपस्यात्यन्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शतसाहस्रिका प्रज्ञापारमिता

State Museum Library Lucknow 5093

अथ त्रयोदशः परिवर्त्तः ।

पृथिवीधातुसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुसत्तया मध्यतो बोधिसत्त्वो नोपैति । पृथिवीधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । पृथिवीधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । पृथिवीधातुस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र पृथिवीधातुसत्तायां पृथिवीधातुशून्यतायां पृथिवीधातुविविक्ततायां पृथिवीधातुस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चान्या पृथिवीधातुसत्ताऽन्या पृथिवीधातुशून्यताऽन्या पृथिवीधातुविविक्तताऽन्या पृथिवीधातुस्वभावता । अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च पृथिवीधातुसत्ता या च पृथिवीधातुशून्यता या च पृथिवीधातुविविक्तता या च पृथिवी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

अब्धात्वसत्त्वयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अब्धातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अब्धातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अब्धात्वस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अब्धात्वसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। अब्धातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अब्धातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अब्धात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अब्धात्वसत्त्वया मध्यतो बोधिसत्त्वो नोपैति। अब्धातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अब्धातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अब्धात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राब्धात्वसत्त्वयां। अब्धातुशून्यतयां। अब्धातुविविक्ततायां। अब्धात्वस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽब्धात्वसत्ताऽन्याऽब्धातुशून्यताऽन्याऽब्धातुविविक्तताऽन्याऽब्धातुस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या चाऽब्धात्वसत्ता या चाऽब्धातुशून्यता या चाऽब्धातुविविक्तता या चाब्धात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरन्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

तेजोधात्वसत्त्वयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपति। तेजोधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेजोधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तेजोधातुस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तेजोधातुसत्त्वतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तेजोधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तेजोधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। तेजोधातुस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तेजोधातुसत्त्वतयामध्यतो बोधिसत्त्वो नोपैति। तेजोधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति। तेजोधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। तेजोधातुस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र तेजोधातुसत्त्वतायां तेजोधातुशून्यतायां तेजोधातुविविक्ततायां तेजोधातुस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या तेजोधातुसत्त्वताऽन्या तेजोधातुशून्यताऽन्या तेजोधातुविविक्तताऽन्या तेजोधातुस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या च तेजोधातुसत्त्वता या च तेजोधातुशून्यता या च तेजोधातुविविक्तता या च तेजोधातुस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

वायुधातुसत्त्वतयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वायुधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वायुधातुस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वायुधातुसत्त्वतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वायुधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वायुधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। वायुधातुस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वायुधातुसत्तया मध्यतो बोधिसत्त्वो नोपैति। वायुधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति। वायुधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। वायुधातुस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वायुधातुसत्तयां वायुधातुशून्यतायां वायुधातुविविक्ततायां वायुधातुस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या वायुधातुसत्ताऽन्या वायुधातुशून्यताऽन्या वायुधातुविविक्तताऽन्या वायुधातुस्वभावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वायुधातुसत्ता या च वायुधातुशून्यता या च वायुधातुविविक्तता या च वायुधातुस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

आकाशधातुसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आकाशधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आकाशधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आकाशधातुस्वभावतयापूर्व्वान्ततो बोधिसत्त्वो नोपैति। आकाशधातुसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। आकाशधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आकाशधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। आकाशधातुस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आकाशधातुसत्तया मध्यतो बोधिसत्त्वो नोपैति। आकाशधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति। आकाशधातु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। आकाशधातुस्वभावतया
मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वती-
पुत्राकाशधातुसत्तायामाकाशधातुशून्यतायामाकाशधातुविविक्तता-
यामाकाशधातुस्वभावतायां पूर्व्वान्त उपलभ्यते नापरान्त उप-
लभ्यते न मध्यमुपलभ्यते। न चान्या आकाशधातुसत्ताऽन्या
आकाशधातुशून्यताऽन्या आकाशधातुविविक्तताऽन्या आकाशधातु-
स्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्य-
मिति ह्यायुष्मञ्छारद्वतीपुत्र या चाकाशधातुसत्ता या चाकाश
धातुशून्यता या चाकाशधातुविविक्तता या चाकाशधातुस्वभावता
यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेत-
दद्वयमद्वैधीकारम्।

विज्ञानधातुसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो
नोपैति। विज्ञानधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति।
विज्ञानधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विज्ञान-
धातुस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानधातु-
सत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानधातुशून्यतयाऽप-
रान्ततो बोधिसत्त्वो नोपैति। विज्ञानधातुविविक्ततयाऽपरान्ततो
बोधिसत्त्वो नोपैति। विज्ञानधातुस्वभावतयाऽपरान्ततो बोधिसत्त्वो
नोपैति। विज्ञानधातुसत्तया मध्यतो बोधिसत्त्वो नोपैति।
विज्ञानधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानधातु-
विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानधातुस्वभावतया
मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विज्ञानधात्वसत्तयां विज्ञानधातुशून्यतायां विज्ञानधातुविविक्ततायां विज्ञानधात्वस्वभावतायां पूर्व्वान्त उपलभ्यते नापरान्त उपलभ्यते न मध्यमुपलभ्यते। न चाऽन्या विज्ञानधात्वसत्ताऽन्या विज्ञानधातुशून्यताऽन्या विज्ञानधातुविविक्तताऽन्या विज्ञानधात्वस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या च विज्ञानधात्वसत्ता या च विज्ञानधातुशून्यता या च विज्ञानधातुविविक्तता या च विज्ञानधात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अविद्याऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अविद्याशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अविद्याविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अविद्याऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अविद्याऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अविद्याशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अविद्याविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अविद्याऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अविद्याऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अविद्याशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अविद्याविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अविद्याऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राविद्याऽसत्तायामविद्याशून्यतायामविद्याविविक्ततायामविद्याऽस्वभावतायां पूर्व्वान्त उपलभ्यते नापरान्त उपलभ्यते न मध्यमुपलभ्यते। न चान्योऽविद्याऽसत्ताऽन्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽविद्याशून्यताऽन्या अविद्याविविक्तताऽन्याऽविद्याऽस्वभावतान्य। यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

संस्काराऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कारशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कारविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कारास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्काराऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्काराशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कारविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्काराऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्काराऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। संस्कारशून्यतया मध्यतो बोधिसत्त्वो नोपैति। संस्कारविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। संस्काराऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र संस्कारासत्तायां संस्कारशून्यतायां संस्कारविविक्ततायां संस्काराऽस्वभावतायां पूर्व्वान्त उपलभ्यते नाऽपरान्त उपलभ्यते न मध्यमुपलभ्यते। न चाऽन्या संस्काराऽसत्ताऽन्या संस्काराशून्यतान्या संस्काराविविक्तताऽन्या संस्कारास्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्माञ्छारद्वतीपुत्र या च संस्कारासत्ता या च संस्काराशून्यता या च संस्काराविविक्तता या च संस्काराऽस्वभावता। यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विज्ञानाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानाऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति। विज्ञानाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। विज्ञानाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानशून्यतया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। विज्ञानाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र विज्ञानाऽसत्तायां विज्ञानशून्यतायां विज्ञानविविक्ततायां विज्ञानाऽस्वभावतायां पूर्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याविज्ञानाऽसत्ताऽन्याविज्ञानशून्यताऽन्याविज्ञानविविक्तताऽन्याविज्ञानाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च विज्ञानाऽसत्ता या च विज्ञानशून्यता या च विज्ञानविविक्तता या च विज्ञानाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतद्द्वयमद्वैधीकारम्।

नामरूपाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति। नामरूपशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति। नामरूपविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। नामरूपा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। नामरूपाऽसत्तया-
ऽपरान्ततो बोधिसत्त्वो नोपैति। नामरूपशून्यतयाऽपरान्ततो
बोधिसत्त्वो नोपैति। नामरूपविविक्ततयाऽपरान्ततो बोधिसत्त्वो
नोपैति। नामरूपाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति।
नामरूपाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। नामरूपशून्यतया
मध्यतो बोधिसत्त्वो नोपैति। नामरूपविविक्ततया मध्यतो बोधि-
सत्त्वो नोपैति। नामरूपाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति।
तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र नामरूपाऽसत्तायां नामरूप-
शून्यतायां नामरूपविविक्ततायां नामरूपाऽस्वभावतायां पूर्व्वान्त
उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न
चाऽन्यानामरूपाऽसत्ताऽन्यानामरूपशून्यताऽन्यानामरूपविविक्तताऽ-
न्यानामरूपाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तो-
ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च नामरूपाऽसत्ता या च
नामरूपशून्यता या च नामरूपविविक्तता या च नामरूपाऽस्व-
भावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं
सर्व्वमेतदद्वयमद्वैधीकारम्॥

षडायतनाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो
नोपैति। षडायतनशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति।
षडायतनविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। षडाय-
तनाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। षडायतना-
ऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। षडायतनशून्यतयाऽप-
रान्ततो बोधिसत्त्वो नोपैति। षडायतनविविक्ततयाऽपरान्ततो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्त्वो नोपैति। षडायतनाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। षडायतनाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। षडायतनशून्यतया मध्यतो बोधिसत्त्वो नोपैति। षडायतनविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। षडायतनाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र षडातनाऽसत्तायां षडायतनशून्यतायां षडायतनविविक्ततायां षडायतनाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या षडायतनाऽसत्ताऽन्या षडायतनशून्यताऽन्या षडायतनविविक्तताऽन्या षडायतनाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च षडायतनाऽसत्ता या च षडायतनशून्यता या च षडायतनविविक्तता या च षडायतनाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

स्पर्शाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्पर्शशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्पर्शविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्पर्शाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्पर्शाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्पर्शशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्पर्शविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्पर्शाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्पर्शाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। स्पर्शशून्यतया मध्यतो बोधिसत्त्वो नोपैति। स्पर्शविविक्ततया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्यतो बोधिसत्त्वो नोपैति। स्पर्शाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र स्पर्शाऽसत्तायां स्पर्शशून्यतायां स्पर्शविविक्ततायां स्पर्शाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते न मध्यमुपलभ्यते। न चाऽन्या स्पर्शासत्ताऽन्या स्पर्शशून्यताऽन्या स्पर्शविविक्तताऽन्या स्पर्शाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च स्पर्शाऽसत्ता या च स्पर्शशून्यता या च स्पर्शविविक्तता या च स्पर्शाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

वेदनाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वेदनाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वेदनाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। वेदनाशून्यतया मध्यतो बोधिसत्त्वो नोपैति। वेदनाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। वेदनाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वेदनाऽसत्तायां वेदनाशून्यतायां वेदनाविविक्ततायां वेदनाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते न मध्यमुपलभ्यते। न चाऽन्या वेदनाऽसत्ताऽन्या वेदनाशून्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ताऽन्या वेदनाविविक्तताऽन्या वेदनाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वेदनाऽसत्ता या च वेदनाशून्यता या च वेदनाविविक्तता या च वेदनाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

तृष्णाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तृष्णाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तृष्णाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तृष्णाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तृष्णाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। तृष्णाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तृष्णाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। तृष्णाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तृष्णाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। तृष्णाशून्यतया मध्यतो बोधिसत्त्वो नोपैति। तृष्णाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। तृष्णाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र तृष्णाऽसत्तायां तृष्णाशून्यतायां तृष्णाविविक्ततायां तृष्णाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या तृष्णाऽसत्ताऽन्या तृष्णाशून्यताऽन्या तृष्णाविविक्तताऽन्या तृष्णाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च तृष्णाऽसत्ता या च तृष्णाशून्यता या च तृष्णाविविक्तता या च तृष्णाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपादानाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। उपादानशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। उपादानविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। उपादानाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। उपादानाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। उपादानशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। उपादानविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। उपादानाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। उपादानाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। उपादानशून्यतया मध्यतो बोधिसत्त्वो नोपैति। उपादानविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। उपादानाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र उपादानाऽसत्तायामुपादानशून्यतायामुपादानविविक्ततायामुपादानाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या उपादानाऽसत्तान्या उपादानशून्यताऽन्या उपादानविविक्तताऽन्या उपादानाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चोपादानाऽसत्ता या चोपादानशून्यता या चोपादानविविक्तता या चोपादानाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

भवासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति। भवशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। भवविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। भवाऽस्वभावतया पूर्व्वान्ततो बोधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वो नोपैति। भवाऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवासत्त्वया मध्यतो बोधिसत्त्वो नोपैति। भवशून्यतया मध्यतो बोधिसत्त्वो नोपैति। भवविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। भवाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र भवाऽसत्तायां भवशून्यतायां भवविविक्ततायां भवाऽस्वभावतायां पूर्वान्त उपलभ्यते नापरान्त उपलभ्यते न मध्यमुपलभ्यते। न चान्या भवाऽसत्ताऽन्या भवशून्यताऽन्या भवविविक्तताऽन्या भवाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च भवाऽसत्ता या च भवशून्यता या च भवविविक्तता या च भवाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

जात्यसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति। जातिशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति। जातिविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। जात्यस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति। जात्यसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। जातिशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जातिविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। जात्यस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जात्यसत्तया मध्यतो बोधिसत्त्वो नोपैति। जातिशून्यतया मध्यतो बोधिसत्त्वो नोपैति। जातिविविक्ततया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्यतो बोधिसत्त्वो नोपैति। जात्यस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र जात्यसत्तायां जातिशून्यतायां जातिविविक्ततायां जात्यस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या जात्यसत्ताऽन्या जातिशून्यताऽन्या जातिविविक्तताऽन्या जात्यस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च जात्यसत्ता या च जातिशून्यता या च जातिविविक्ततो या च जात्यस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

जरामरणाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जरामरणशून्यतया पूर्व्वान्ततो बोधिसत्वो नोपैति। जरामरणविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। जरामरणशून्यतया मध्यतो बोधिसत्त्वो नोपैति। जरामरणविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। जरामरणाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र जरामरणाऽसत्तायां जरामरणशून्यतायां जरामरणविविक्ततायां जरा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मरणाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या जरामरणाऽसत्ताऽन्या जरामरणशून्यताऽन्या जरामरणविविक्तताऽन्या जरामरणाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च जरामरणाऽसत्ता या च जरामरणशून्यता या च जरामरणविविक्तता या च जरामरणाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

दानपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। दानपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। दानपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। दानपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र दानपारमिताऽसत्तायां दानपारमिताशून्यतायां दानपारमिताविविक्ततायां दानपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते नाऽपरान्त उपलभ्यते, न मध्यमुपलभ्यते। न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चाऽन्या दानपारमिताऽसत्ताऽन्या दानपारमिताशून्यताऽन्या दानपारमिताविविक्तताऽन्या दानपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च दानपारमिताऽसत्ता या च दानपारमिताशून्यता या च दानपारमिताविविक्तता या च दानपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

शीलपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। शीलपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। शीलपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। शीलपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र शीलपारमिताऽसत्तायां शीलपारमिताशून्यतायां शीलपारमिताविविक्ततायां शीलपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या शीलपारमिताऽसत्ताऽन्या शीलपारमिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यताऽन्या शीलपारमिताविविक्तताऽन्या शीलपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च शीलपारमिताऽसत्ता या च शीलपारमिताशून्यता या च शीलपारमिताविविक्तता या च शीलपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्॥

क्षान्तिपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। क्षान्तिपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र क्षान्तिपारमिताऽसत्तायां क्षान्तिपारमिताशून्यतायां क्षान्तिपारमिताविविक्ततायां क्षान्तिपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या क्षान्तिपारमिताऽसत्ताऽन्या क्षान्तिपारमिताशून्यताऽन्या क्षान्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पारमिताविविक्तताऽन्या क्षान्तिपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च क्षान्तिपारमिताऽसत्ता या च क्षान्तिपारमिताशून्यता या च क्षान्तिपारमिताविविक्तता या च क्षान्तिपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

वीर्य्यपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नापैति । वीर्य्यपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नापैति । वीर्य्यपारमिताशून्यतया मध्यतो बोधिसत्त्वो नापैति । वीर्य्यपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नापैति । वीर्य्यपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नापैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वीर्य्यपारमिताऽसत्तायां वीर्य्यपारमिताशून्यतायां वीर्य्यपारमिताविविक्ततायां वीर्य्यपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या वीर्य्यपारमिताऽसत्ताऽन्या वीर्य्यपारमिताशून्यताऽन्या वीर्य्यपारमिताविविक्तताऽन्या वीर्य्यपार-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्य-न्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वीर्य्यपारमिताऽसत्ता या च वीर्य्यपारमिताशून्यता या च वीर्य्यपारमिताविविक्तता या च वीर्य्यपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

ध्यानपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानपारमिताशून्यतायाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यान-पारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानपार-मिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानपार-मिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। ध्यानपारमिताशून्य-तया मध्यतो बोधिसत्त्वो नोपैति। ध्यानपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। ध्यानपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र ध्यान-पारमिताऽसत्तायां ध्यानपारमिताशून्यतायां ध्यानपारमिता-विविक्ततायां ध्यानपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या ध्यानपार-मिताऽसत्ताऽन्या ध्यानपारमिताशून्यताऽन्या ध्यानपारमिता-विविक्तताऽन्या ध्यानपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति शारद्वतीपुत्र या च ध्यानपारमितासत्ता या च ध्यानपारमिताशून्यता या च ध्यानपारमिताविविक्तता या च ध्यानपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

प्रज्ञापारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताशून्यताया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताविविक्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताशून्यतायाऽपरान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताविविक्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताशून्यताया मध्यतो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताविविक्तया मध्यतो बोधिसत्त्वो नोपैति। प्रज्ञापारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र प्रज्ञापारमिताऽसत्तायां प्रज्ञापारमिताशून्यतायां प्रज्ञापारमिताविविक्ततायां प्रज्ञापारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या प्रज्ञापारमिताऽसत्ताऽन्या प्रज्ञापारमिताशून्यताऽन्या प्रज्ञापारमिताविविक्तताऽन्या प्रज्ञापारमिताऽस्वभावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्य-

5093

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च प्रज्ञापारमिताऽसत्त्वा या च प्रज्ञापारमिताशून्यता या च प्रज्ञापारमिताविविक्तता या च प्रज्ञापारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

अध्यात्मशून्यताऽसत्त्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आध्यात्मशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽस्वभावतया पूर्व्वान्तो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽसत्त्तयापरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽस्वभावतयापरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽसत्त्तया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राऽध्यात्मशून्यताऽसत्त्तायां अध्यात्मशून्यताशून्यतायां अध्यात्मशून्यताविविक्ततायां अध्यात्मशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपउपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्याऽध्यात्मशून्यताऽसत्त्ताऽन्या अध्यात्मशून्यताशून्यताऽन्या अध्यात्मशून्यताविविक्तताऽन्या अध्यात्मशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽध्यात्मशून्यताऽसत्त्ता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

या चाऽध्यात्मशून्यताशून्यता या चाऽध्यात्मशून्यताविविक्तता या चाध्यात्मशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

बहिर्द्धाशून्यताऽसत्ततायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यतास्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र बहिर्द्धाशून्यताऽसत्तायां बहिर्द्धाशून्यताशून्यतायां बहिर्द्धाशून्यताविविक्तायां बहिर्द्धाशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या बहिर्द्धाशून्यताऽसत्ताऽन्या बहिर्द्धाशून्यताशून्यताऽन्या बहिर्द्धाशून्यताविविक्तताऽन्या बहिर्द्धाशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च बहिर्द्धाशून्यताऽसत्ता या च बहिर्द्धाशून्यताशून्यता या च बहिर्द्धाशून्यता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विविक्तता या च बहिर्द्धाशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्॥

अध्यात्मबहिर्द्धाशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अध्यात्मबहिर्द्धाशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राध्यात्मबहिर्द्धाशून्यताऽसत्तायामध्यात्मबहिर्द्धाशून्यताशून्यतायामध्यात्मबहिर्द्धाशून्यताविविक्ततायामध्यात्मबहिर्द्धाशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या अध्यात्मबहिर्द्धाशून्यताऽसत्ताऽन्याऽध्यात्मबहिर्द्धाशून्यताशून्यताऽन्याऽध्यात्मबहिर्द्धाशून्यताविविक्तताऽन्याऽध्यात्मबहिर्द्धाशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽध्यात्मबहिर्द्धाशून्यताऽसत्ता या चाध्यात्म-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बहिर्द्धाशून्यताशून्यता या चाध्यात्मबहिर्द्धाशून्यताविविक्तता या चाध्यात्मबहिर्द्धाशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

शून्यताशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । शून्यताशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । शून्यताशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र शून्यताशून्यताऽसत्तायां शून्यताशून्यताशून्यतायां शून्यताशून्यताविविक्ततायां शून्यताशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या शून्यताशून्यताऽसत्ताऽन्या शून्यताशून्यताशून्यताऽन्या शून्यताशून्यताविविक्तताऽन्या शून्यताशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च शून्यताशून्यताऽसत्ता या च शून्यताशून्यताशून्यता या च शून्यताशून्यताविविक्तता या च शून्यताशून्यताऽस्वभावता यश्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

महाशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। महाशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। महाशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। महाशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र महाशून्यताऽसत्तायां महाशून्यताशून्यतायां महाशून्यताविविक्ततायां महाशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या महाशून्यताऽसत्ताऽन्या महाशून्यताशून्यताऽन्या महाशून्यताविविक्तताऽन्या महाशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च महाशून्यताऽसत्ता या च महाशून्यताशून्यता या च महाशून्यताविविक्तता या च महाशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परमार्थशून्यताऽसत्तया युष्मच्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽस्वभावतया पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽसत्तयापरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। परमार्थशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। परमार्थशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मच्छारद्वतीपुत्र परमार्थशून्यताऽसत्तायां परमार्थशून्यताशून्यतायां परमार्थशून्यताविविक्ततायां परमार्तशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या परमार्थशून्यताऽसत्ताऽन्या परमार्थशून्यताशून्यताऽन्या परमार्थशून्यताविविक्तताऽन्या पतमार्थशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मच्छारद्वतीपुत्र या च परमार्थशून्यताऽसत्ता या च परमार्थशून्यताशून्यता या च परमार्थशून्यताविविक्तता या च परमार्थशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कृतशून्यताऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । संस्कृतशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । संस्कृतशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । संस्कृतशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । संस्कृतशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र संस्कृतशून्यता सत्तायां संस्कृतशून्यताशून्यतायां संस्कृतशून्यताविविक्ततायां संस्कृतशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या संस्कृतशून्यताऽसत्ताऽन्या संस्कृतशून्यताशून्यताऽन्या संस्कृतशून्यताविविक्तताऽन्या संस्कृतशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च संस्कृतशून्यताऽसत्ता या च संस्कृतशून्यताशून्यता या च संस्कृतशून्यताविविक्तता या च संस्कृतशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

असंस्कृतशून्यताऽसत्तया, युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वो नोपैति। असंस्कृतशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राऽसंस्कृतशून्यताऽसत्तायामसंस्कृतशून्यताशून्यतायामसंस्कृतशून्यताविविक्ततायामसंस्कृतशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽसंस्कृतशून्यताऽसत्ताऽन्याऽसंस्कृतशून्यताशून्यताऽन्या ऽसंस्कृतशून्यताविविक्तताऽन्याऽसंस्कृतशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र सा चाऽसंस्कृतशून्यताऽसत्ता या चाऽसंस्कृतशून्यताशून्यता या चाऽसंस्कृतशून्यताविविक्तता या चाऽसंस्कृतशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अत्यन्तशून्यताऽसत्तया, युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। अत्यन्तशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्रात्यन्तशून्यता ऽसत्तायामत्यन्तशून्यताशून्यतायामत्यन्तशून्यताविविक्ततायामत्यन्तशून्यता ऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या ऽत्यन्तशून्यता ऽसत्ताऽन्या ऽत्यन्तशून्यताशून्यता ऽन्या ऽत्यन्तशून्यताविविक्ततोऽन्या ऽत्यन्तशून्यता ऽस्वभावताऽन्यो बोधिसत्त्वो ऽन्यः पूर्वान्तोऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽत्यन्तशून्यता ऽसत्ता या चात्यन्तशून्यताशून्यताया चात्यन्तशून्यताविविक्ततो या चाऽत्यन्तशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अनवराग्रशून्यता ऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। अनवराग्रशून्यता ऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता शून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता विविक्ततया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽस्वभावतया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता शून्यतया मध्यतो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र ऽनवराग्रशून्यता ऽसत्तयामनवराग्रशून्यता शून्यतयामनवराग्रशून्यता विविक्ततया मनवराग्रशून्यतया ऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या ऽनवराग्रशून्यता ऽसत्ता ऽन्या ऽनवराग्रशून्यता शून्यता ऽन्या ऽनवराग्रशून्यता विविक्तता ऽन्या ऽनवराग्रशून्यता ऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्व्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चानवराग्रशून्यता ऽसत्ता या चानऽवराग्रशून्यता शून्यता या चानवराग्रशून्यता विविक्तता या चाऽनवराग्रशून्यता ऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चा ऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अनवकारशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवकारशून्यता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवकारशून्यता विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति । अनवकारशून्यता ऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता शून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता विविक्ततया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽस्वभावतया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । अनवकारशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अनवकारविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छरद्वतीपुत्रानवकारशून्यताऽसत्तायामनवकारशून्यता शून्यतायामनवकारशून्यता विविक्ततायामनवकारशून्यता ऽस्वभावतायां पूर्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या ऽनवकारशून्यता ऽसत्ता ऽन्या ऽनवकारशून्यता शून्यता ऽन्या ऽनवकारशून्यता विविक्तता ऽन्या ऽनवकारशून्यता ऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽनवकारशून्यता ऽसत्ता या चाऽनवकारशून्यता शून्यता या चाऽनवकारशून्यता विविक्तता या चाऽनवकारशून्यता ऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं । सर्वमेतदद्वयमद्वैधीकारम् ।

प्रकृतिशून्यता ऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता शून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता विविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकृतिशून्यता ऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति। प्रकृतिशून्यता ऽसत्तया अपरान्ततो बोधिसत्त्वो नोपैति। प्रकृतिशून्यता शून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति। प्रकृतिशून्यता विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। प्रकृतिशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्वो नोपैति। प्रकृतिशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। प्रकृतिशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। प्रकृतिशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। प्रकृतिशून्यताऽस्वभावतया मध्यतो बोधिसत्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र प्रकृतिशून्यताऽसत्तायां प्रकृतिशून्यताशून्यतायां प्रकृतिशून्यताविविक्ततायां प्रकृतिशून्यताऽस्वभावतायां पूर्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्यो प्रकृतिशून्यताऽसत्ताऽन्या प्रकृतिशून्यताशून्दताऽन्या प्रकृतिशून्यताविविक्तताऽन्याप्रकृतिशून्यताऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या च प्रकृतिशून्यताऽसत्ता या च प्रकृतिशून्यताशून्यता या च प्रकृतिशून्यताविविक्तया या च प्रकृतिशून्यताऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्वान्तो यस्याऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

सर्व्वधर्म्मशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्म्मशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्म-शून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यता-विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताऽस्वभाव-तयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। सर्वधर्म्मशून्यताविविक्ततया मध्यतो बोधि-सत्त्वो नोपैति। सर्वधर्म्मशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र सर्वधर्म्मशून्यता-ऽसत्तायां सर्वधर्म्मशून्यताशून्यतायां सर्वधर्म्मशून्यताविविक्ततायां सर्व-धर्म्मशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उप-लभ्यते। न मध्यमुपलभ्यते। न चाऽन्या सर्वधर्म्मशून्यताऽसत्ताऽन्या सर्वधर्म्मशून्यताशून्यताऽन्या सर्वधर्म्मशून्यताविविक्तताऽन्या सर्वधर्म्म-शून्यताऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तो-ऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या च सर्वधर्म्मशून्यताऽसत्ता या च सर्वधर्म्मशून्यताशून्यता या च सर्वधर्म्मशून्यताविविक्तता या च सर्वधर्म्मशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाप-रान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्॥

स्वलक्षणशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपति। स्वलक्षणशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वलक्षणशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वल-क्षणशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वल-क्षणशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वलक्षण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वलक्षणशून्यता-विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वलक्षणशून्यताऽस्व-भावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वलक्षणशून्यताऽसत्तया-मध्यतो बोधिसत्त्वो नोपैति। स्वलक्षणशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। स्वलक्षणशून्यताविविक्ततया मध्यतो बोधि-सत्त्वो नोपैति। स्वलक्षणशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्शारद्वतीपुत्र स्वलक्षणशून्यता-ऽसत्तयां स्वलक्षणशून्यताशून्यतायां स्वलक्षणशून्यताविविक्ततायां स्वलक्षणशून्यताऽस्वभावतायां पूर्वान्त उपलभ्यते। नाऽपरान्त उप-लभ्यते। न मध्यमुपलभ्यते। न चान्या स्वलक्षणशून्यताऽसत्ताऽन्या स्वलक्षणशून्यताशून्यताऽन्या स्वलक्षणशून्यताविविक्तताऽन्या स्वलक्षण-शून्यताऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तो-ऽन्यन्मध्यमिति। ह्यायुष्मञ्शारद्वतीपुत्र या च स्वलक्षणशून्यताऽसत्ता या च स्वलक्षणशून्यताशून्यता या च स्वलक्षणशून्यताविविक्तता या च स्वलक्षणशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चा-ऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अनुपलम्भशून्यताऽसत्तयायुष्मञ्शारद्वतीपुत्र पूर्वान्ततो बोधि-सत्त्वो नोपैति। अनुपलम्भशून्यताशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अनुप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लम्भशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अनुपलम्भशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र अनुपलम्भशून्यताऽसत्तायामनुपलम्भशून्यताशून्यतायामनुपलम्भशून्यताविविक्ततायामनुपलम्भशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽनुपलम्भशून्यताऽसत्ताऽन्याऽनुपलम्भशून्यताशून्यताऽन्याऽनुपलम्भशून्यताविविक्तताऽन्याऽनुपलम्भशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽनुपलम्भशून्यताऽसत्ता या चाऽनुपलम्भशून्यताशून्यता या चाऽनुपलम्भशून्यताविविक्तता या चाऽनुपलम्भशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अभावशून्यतासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावशून्यताऽस्वभावतयाऽपरान्ततो बोधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वो नोपैति। अभावशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अभावशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अभावशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अभावशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र अभावशून्यताऽसत्तायामभावशून्यताशून्यतायामभावशून्यताविविक्ततायामभावशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या अभावशून्यताऽसत्ताऽन्या अभावशून्यताशून्यताऽन्या अभावशून्यताविविक्तताऽन्याऽभावशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽभावशून्यताऽसत्ता या चाऽभावशून्यताशून्यता या चाऽभावशून्यताविविक्तता या चाऽभावशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

स्वभावशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्वभावशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। स्वभावशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वभावशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । स्वभाव-शून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र स्वभावशून्यताऽसत्तायां स्वभावशून्यता-शून्यतायां स्वभावशून्यताविविक्ततायां स्वभावशून्यताऽस्वभावतायां पूर्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या स्वभावशून्यताऽसत्ताऽन्या स्वभावशून्यताशून्यताऽन्या स्वभाव-शून्यताविविक्तताऽन्या स्वभावशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च स्वभावशून्यताऽसत्ता या च स्वभावशून्यताशून्यता या च स्वभाव-शून्यताविविक्तता या च स्वभावशून्यताऽस्वभावता यश्च बोधि-सत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वय-मद्वैधीकारम् ।

अभावस्वभावशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताऽस्वभावतया पूर्व्वा-न्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अभावस्वभावशून्यताऽसत्तया मध्यतो बोधि-सत्त्वो नोपैति । अभावस्वभावशून्यताशून्यतया मध्यतो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। अभावस्वभावशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र अभावस्वभावशून्यताऽसत्तायामभावस्वभावशून्यताशून्यतायामभावस्वभावशून्यताविविक्ततायामभावस्वभावशून्यताऽस्वभावतायां पूर्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽभावस्वभावशून्यताऽसत्ताऽन्याऽभावस्वभावशून्यताशून्यताऽन्याऽभावस्वभावशून्यताविविक्तताऽन्याऽभावस्वभावशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाभावस्वभावशून्यताऽसत्ता या चाभावस्वभावशून्यताशून्यता या चाभावस्वभावशून्यताविविक्तता या चाभावस्वभावशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

स्मृत्युपस्थानाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानाऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानशून्यतया मध्यतो बोधिसत्त्वो नोपैति। स्मृत्युपस्थान-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। स्मृत्युपस्थानाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र स्मृत्युपस्थानाऽसत्तायां स्मृत्युपस्थानशून्यतायां स्मृत्युपस्थानविविक्ततायां स्मृत्युपस्थानाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या स्मृत्युपस्थानाऽसत्ताऽन्या स्मृत्युपस्थानशून्यतान्या स्मृत्युपस्थानविविक्तताऽन्या स्मृत्युपस्थानाऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्माञ्छारद्वतीपुत्र या च स्मृत्युपस्थानाऽसत्ता या च स्मृत्युपस्थानशून्यता या च स्मृत्युपस्थानविविक्तता या च स्मृत्युपस्थानाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

सम्यक्प्रहाणाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणशून्यतया मध्यतो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। सम्यक्प्रहाणाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ह्यायुष्मञ्छारद्वतीपुत्र सम्यक्प्रहाणाऽसत्तायां सम्यक्प्रहाणशून्यतायां सम्यक्प्रहाणविविक्ततायां सम्यक्प्रहाणाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या सम्यक्प्रहाणाऽसत्ताऽन्या सम्यक्प्रहाणशून्यताऽन्या सम्यक्-प्रहाणविविक्तताऽन्या सम्यक्प्रहाणाऽस्वभावता अन्योबोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च सम्यक्प्रहाणाऽसत्ता या च सम्यक्प्रहाणशून्यता या च सम्यक्-प्रहाणविविक्तता या च सम्यक्प्रहाणाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

ऋद्धिपादासत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपा-दाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादाऽ-सत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादशून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। ऋद्धिपादाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। ऋद्धिपादशून्यतया मध्यतो बोधिसत्त्वो नोपैति। ऋद्धिपाद-विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। ऋद्धिपादाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र ऋद्धिपादाऽसत्तायामृद्धिपाद शून्यतायामृद्धिपाद विविक्तताया-मृद्धिपादाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऋद्धिपादाऽसत्त्वाऽन्या-ऋद्धिपादशून्यताऽन्या ऋद्धिपादविविक्तताऽन्या ऋद्धिपादाऽस्वभाव-ताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायु-ष्मञ्छारद्वतीपुत्र या च ऋद्धिपादाऽसत्ता या च ऋद्धिपादशून्यता या च ऋद्धिपादविविक्तता या च ऋद्धिपादाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतद-द्वयमद्वैधीकारम् ॥

इन्द्रियाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति। इन्द्रियशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति। इन्द्रियविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति। इन्द्रिया-ऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति। इन्द्रियाऽसत्तया-ऽपरान्ततो बोधिसत्त्वो नोपैति। इन्द्रियशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। इन्द्रियविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। इन्द्रियाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। इन्द्रियाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। इन्द्रियशून्यतया मध्यतो बोधिसत्त्वो नोपैति। इन्द्रियविविक्ततया मध्यतो बोधि सत्त्वो नोपैति। इन्द्रियाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र इन्द्रियाऽसत्तायामिन्द्रियशून्य-तायामिन्द्रियविविक्ततायामिन्द्रियाऽस्वभावतायां पूर्वान्त उपल-भ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्या इन्द्रियाऽसत्ताऽन्या इन्द्रियशून्यताऽन्या इन्द्रियविविक्तताऽन्या इन्द्रि-याऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिति शारद्वतीपुत्र या च इन्द्रियाऽसत्ता या च इन्द्रियशून्यता या च इन्द्रियविविक्तता या च इन्द्रियाऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्याऽपरान्तो यच्च मध्यं सर्व्वमेतद्द्वयमद्वैधीकारम्।

बलाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बलशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बलविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बलाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बलाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। बलशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। बलविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। बलाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। बलाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। बलाशून्यतया मध्यतो बोधिसत्त्वो नोपैति। बलविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। बलाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न शारद्वतीपुत्र बलाऽसत्तायां बलशून्यतायां बलविविक्ततायां बलाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या बलासत्ताऽन्या बलशून्यताऽन्या बलविविक्तताऽन्या बलऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति शारद्वतीपुत्र या च बलाऽसत्ता या च बलशून्यता या च बलविविक्तता या च बलाऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्यापरान्तो यच्च मध्यं सर्व्वमेतद्द्वयमद्वैधीकारम्।

बोध्यङ्गाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति । बोध्यङ्गशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । बोध्यङ्गाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । बोध्यङ्गशून्यतया मध्यतो बोधिसत्त्वो नोपैति । बोध्यङ्गविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । बोध्यङ्गाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र बोध्यङ्गाऽसत्तायां बोध्यङ्गशून्यतायां बोध्यङ्गविविक्ततायां बोध्यङ्गाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या बोध्यङ्गाऽसत्ताऽन्या बोध्यङ्गशून्यताऽन्या बोध्यङ्गाविविक्तताऽन्या बोध्यङ्गाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च बोध्यङ्गाऽसत्ता या च बोध्यङ्गशून्यता या च बोध्यङ्गविविक्तता या च बोध्यङ्गाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

आर्य्याष्टाङ्गमार्गाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आर्य्याष्टाङ्गमार्गशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अर्य्याष्टाङ्गमार्गविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । आर्य्याष्टाङ्गमार्गाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र आर्य्याष्टाङ्गमार्गाऽसत्तायामार्य्याष्टाङ्गमार्गशून्यतायामार्य्याष्टाङ्गमार्गविविक्तायमार्य्याष्टाङ्गमार्गाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्यार्य्याष्टाङ्गमार्गाऽसत्ताऽन्या आर्य्याष्टामार्गशून्यताऽन्या आर्य्याष्टाङ्गमार्गविविक्तताऽन्या आर्य्याष्टाङ्गमार्गाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चार्य्याष्टाङ्गमार्गाऽसत्ता या चार्य्याष्टाङ्गमार्गशून्यता या चार्य्याष्टाङ्गमार्गविविक्तता या चार्य्याष्टाङ्गमार्गाऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्याऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

आर्य्यसत्याऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्यसत्यशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्यसत्यविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्यसत्याऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आर्य्यसत्याऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । आर्य्यसत्यशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । आर्य्यसत्यविविक्ततयाऽपरान्ततो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्त्वो नोपैति। आर्य्यसत्याऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आर्य्यसत्याऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। आर्य्यसत्यशून्यतया मध्यतो बोधिसत्त्वो नोपैति। आर्य्यसत्यविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। आर्य्यसत्याऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र आर्य्यसत्याऽसत्तायामार्य्यसत्यशून्यतायामार्य्यसत्यविविक्ततायामार्य्यसत्याऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्यार्य्यसत्याऽसत्तान्यार्य्यसत्यशून्यताऽन्यार्य्यसत्यविविक्तताऽन्यार्य्यसत्याऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चार्य्यसत्याऽसत्ता या चार्य्यसत्यशून्यता या चार्य्यसत्यविविक्तता या चार्य्यसत्याऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

ध्यानासत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति। ध्यानशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। ध्यानाऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। ध्यानाऽसत्त्वया मध्यतो बोधिसत्त्वो नोपैति। ध्यानशून्यतया मध्यतो बोधिसत्त्वो नोपैति। ध्यानविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। ध्यानाऽस्वभावतया मध्यतो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र ध्यानऽसत्तायां ध्यानशून्यतायां ध्यानविविक्ततायां ध्यानाऽस्वभावतायां पूर्व्वान्त उपलभ्यते नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या ध्यानाऽसत्ताऽन्या ध्यानशून्यताऽन्या ध्यानविविक्तताऽन्या ध्यानाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च ध्यानाऽसत्ता या च ध्यानशून्यता या च ध्यानविविक्तता या च ध्यानाऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्याऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अप्रमाणाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अप्रमाणशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अप्रमाणविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अप्रमाणाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अप्रमाणासत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अप्रमाणशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अप्रमाणविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अप्रमाणाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अप्रमाणाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अप्रमाणशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अप्रमाणविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अप्रमाणाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र अप्रमाणाऽसत्तायामप्रमाणशून्यतायामप्रमाणविविक्ततायामप्रमाणाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽप्रमाणाऽसत्ताऽन्याऽप्रमाणशून्यता अन्या अप्रमाणविविक्तता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्या अप्रमाणाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽप्रमाणासत्ता या चाऽप्रमाणशून्यता या चाऽप्रमाणविविक्तता या चाऽप्रमाणऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

आरूप्यसमापत्त्यसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्तिशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्तिविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्त्यस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्त्यसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्तिशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्तिविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्त्यस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आरूप्यसमापत्त्यसत्तया मध्यतो बोधिसत्त्वो नोपैति। आरूप्यसमापत्तिशून्यतया मध्यतो बोधिसत्त्वो नोपैति। आरूप्यसमापत्तिविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। आरूप्यसमापत्त्यस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र आरूप्यसमापत्त्यसत्तायामारूप्यसमापत्तिशून्यतायामारूप्यसमापत्तिविविक्ततायामारूप्यसमापत्त्यस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या आरूप्यसमापत्त्यसत्ता अन्या आरूप्यसमापत्तिशून्यताऽन्या आरूप्यसमापत्तिविविक्तताऽन्या आरूप्यसमापत्त्यस्वभावताऽन्यो बोधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चारूप्यसमापत्त्यसत्ता या चारूप्यसमापत्तिशून्यता या चारूप्यसमापत्तिविविक्तता या चारूप्यसमापत्त्यस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

विमोचाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विमोचशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विमोचविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विमोचाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। विमोचाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। विमोचशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। विमोचविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। विमोचाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। विमोचाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। विमोचशून्यतया मध्यतो बोधिसत्त्वो नोपैति। विमोचविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। विमोचाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र विमोचाऽसत्तायां विमोचशून्यतायां विमोचविविक्ततायां विमोचाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या विमोचाऽसत्ताऽन्या विमोचशून्यताऽन्या विमोचविविक्तताऽन्या विमोचाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च विमोचाऽसत्ता या च विमोचशून्यता या च विमोचविविक्तता या च विमोचाऽस्वभा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतद्द्वयमद्वैधीकारम् ।

अनुपूर्व्वविहारसमापत्त्यऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमापत्तिशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमापत्तिविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमापत्त्यास्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमापत्त्यासत्तया-ऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमापत्तिशून्यत-याऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमापत्ति-विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहारसमा-पत्त्यास्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहार-समापत्त्यासत्तया मध्यतो बोधिसत्त्वो नोपैति । अनुपूर्व्वविहार-समापत्तिशून्यतया मध्यतो बोधिसत्त्वोनोपैति । अनुपूर्व्वविहार-समापत्तिविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अनुपूर्व्ववि-हारसमापत्त्यास्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राऽनुपूर्व्वविहारसमापत्त्यासत्तायामनु-पूर्व्वविहारसमापत्तिशून्यतायामनुपूर्व्वविहारसमापत्तिविविक्तताया-मनुपूर्व्वविहारसमापत्त्यास्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽप-रान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या अनुपूर्व्व-विहारसमापत्त्यासत्ताऽन्या अनुपूर्व्वविहारसमापत्तिशून्यताऽन्या अनुपूर्व्वविहारसमापत्तिविविक्तताऽन्या अनुपूर्व्वविहारसमापत्त्यास्व-भावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ह्यायुष्मञ्छारद्वतीपुत्र या चाऽनुपूर्व्वविहारसमापत्त्यासत्ता या चाऽनुपूर्व्वविहारसमापत्तिशून्यता या चाऽनुपूर्व्वविहारसमापत्तिविविक्तता या चाऽनुपूर्व्वविहारसमापत्त्यास्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहिताविमोक्षमुखाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यतया मध्यतो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽसत्तायां शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यतायां शून्यतानिमित्ताप्रणिहितविमोक्ष-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुखविविक्ततायां शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽसत्ताऽन्या शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यताऽन्या शून्यतानिमित्ताप्रणिहितविमोक्षमुखविविक्तताऽन्या शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽसत्ता या च शून्यतानिमित्ताप्रणिहितविमोक्षमुखशून्यता या च शून्यतानिमित्ताप्रणिहितविमोक्षमुखविविक्तता या च शून्यतानिमित्ताप्रणिहितविमोक्षमुखाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारं।

अभिज्ञाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभिज्ञाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अभिज्ञाशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अभिज्ञाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अभिज्ञाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र अभिज्ञाऽसत्तायामभिज्ञाशून्यतायामभिज्ञाविविक्ततायामभिज्ञाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽभिज्ञाऽसत्ताऽन्याऽभिज्ञाशून्यताऽन्याऽभिज्ञाविविक्तताऽन्याऽभिज्ञाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽभिज्ञाऽसत्ता या चाऽभिज्ञाशून्यता या चाऽभिज्ञाविविक्तता या चाऽभिज्ञाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

समाध्यसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। समाधिशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। समाधिविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। समाध्यस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। समाध्यसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। समाधिशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। समाधिविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। समाध्यस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। समाध्यसत्तया मध्यतो बोधिसत्त्वो नोपैति। समाधिशून्यतया मध्यतो बोधिसत्त्वो नोपैति। समाधिविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। समाध्यस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र समाध्यसत्तायां समाधिशून्यतायां समाधिविविक्ततायां समाध्यस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या समाध्यसत्ताऽन्या समाधिशून्यताऽन्या समाधिविविक्तताऽन्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाध्यस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्म-ध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च समाध्यसत्ता या च समाधिशून्यता या च समाधिविविक्तता या च समाध्यस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेत-दद्वयमद्वैधीकारं।

धारणीमुखाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धारणीमुखशून्यताया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धारणीमुखविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धारणीमुखाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धारणीमुखाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। धारणी-मुखशून्यतायाऽपरान्ततो बोधिसत्त्वो नोपैति। धारणीमुखविवि-क्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। धारणीमुखाऽस्वभावत-याऽपरान्ततो बोधिसत्त्वो नोपैति। धारणीमुखाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। धारणीमुखशून्यताया मध्यतो बोधिसत्त्वो नोपैति। धारणीमुखविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। धारणीमुखाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र धारणीमुखाऽसत्तायां धारणीमुख-शून्यतायां धारणीमुखविविक्ततायां धारणीमुखाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या धारणीमुखाऽसत्ताऽन्या धारणीमुखशून्यताऽन्या धारणीमुखविविक्तताऽन्या धारणीमुखाऽस्वभावताऽन्यो बोधि-सत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

या च धारणीमुखाऽसत्त्वा या च धारणीमुखशून्यता या च धारणीमुखविविक्तता या च धारणीमुखाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

तथागतबलाऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तथागतबलशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तथागतबलविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तथागतबलाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तथागतबलाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । तथागतबलशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । तथागतबलविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । तथागतबलाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । तथागतबलाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । तथागतबलशून्यतया मध्यतो बोधिसत्त्वो नोपैति । तथागतबलविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । तथागतबलाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र तथागतबलाऽसत्तायां तथागतबलशून्यतायां तथागतबलविविक्ततायां तथागतबलाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या तथागतबलाऽसत्ताऽन्या तथागतबलशून्यताऽन्या तथागतबलविविक्तताऽन्या तथागतबलाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च तथागतबलाऽसत्ता या च तथागतबलशून्यता या च तथागतबलविविक्तता या च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथागतवत्ताऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्या-परान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

वैशारद्याऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वैशारद्यशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वैशारद्यविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वैशारद्या-ऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वैशारद्याऽसत्तया-ऽपरान्ततो बोधिसत्त्वो नोपैति । वैशारद्यशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । वैशारद्यविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । वैशारद्याऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । वैशारद्याऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । वैशारद्यशून्यतया मध्यतो बोधिसत्त्वो नोपैति । वैशारद्यविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । वैशारद्याऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वैशारद्याऽसत्तायां वैशारद्यशून्यतायां वैशारद्यविविक्ततायां वैशारद्याऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या वैशारद्या-ऽसत्ताऽन्या वैशारद्यशून्यताऽन्या वैशारद्यविविक्तताऽन्या वैशारद्याऽ-स्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वैशारद्याऽसत्ता या च वैशारद्यशून्यता या च वैशारद्यविविक्तता या च वैशारद्याऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्याऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

प्रतिसम्विदा*ऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो

* प्रतिसम्विद शब्दोऽकारान्तोऽत्रदृश्यते । पूर्व्वत्र चतस्रः प्रतिसम्विदः इति हलन्तोनिर्द्दिष्टः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति । प्रतिसम्विद्शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति ! प्रतिसम्विद्विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । प्रतिसम्विदाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । प्रतिसम्विदाऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रतिसम्विदाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रतिसम्विद्विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रतिसम्विदाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रतिसम्विदाऽसत्त्वया मध्यतो बोधिसत्त्वो नोपैति । प्रतिसम्विद्शून्यतया मध्यतो बोधिसत्त्वो नोपैति । प्रतिसम्विद्विविक्ततया मध्यतो बोधिसत्त्वो नोपैति । प्रतिसम्विदाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र प्रतिसम्विदाऽसत्तायां प्रतिसम्विद्शून्यतायां प्रतिसम्विद्विविक्ततायां प्रतिसम्विदाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या प्रतिसम्विदाऽसत्ताऽन्या प्रतिसम्विद्शून्यताऽन्या प्रतिसम्विद्विविक्तताऽन्या प्रतिसम्विदाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च प्रतिसम्वादाऽसत्ता या च प्रतिसम्विद्शून्यता या च प्रतिसम्विद्विविक्तता या च प्रतिसम्विदाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

महाकरुणाऽसत्त्वयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । महाकरुणाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । महाकरुणाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । महा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करुणाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । महाकरुणा-ऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । महाकरुणाशून्यतया-ऽपरान्ततो बोधिसत्त्वो नोपैति । महाकरुणाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । महाकरुणाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । महाकरुणाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । महाकरुणाशून्यतया मध्यतो बोधिसत्त्वो नोपैति । महाकरुणा-विविक्ततया मध्यतो बोधिसत्त्वो नोपैति । महाकरुणाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र महाकरुणाऽसत्तायां महाकरुणाशून्यतायां महाकरुणाविविक्ततायां महाकरुणाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उप-लभ्यते । न मध्यमुपलभ्यते । न चाऽन्या महाकरुणाऽसत्ताऽन्या महाकरुणाशून्यताऽन्या महाकरुणाविविक्तताऽन्या महाकरुणाऽस्व-भावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च महाकरुणाऽसत्ता या च महा-करुणाशून्यता या च महाकरुणाविविक्तता या च महाकरुणा-ऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

आवेणिकबुद्धधर्म्माऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधि-सत्त्वो नोपैति । आवेणिकबुद्धधर्म्मशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आवेणिकबुद्धधर्म्मविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आवेणिकबुद्धधर्म्माऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आवेणिकबुद्धधर्म्माऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवेणिकबुद्धधर्म्मशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आवेणिकबुद्धधर्म्मविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। आवेणिकबुद्धधर्म्माऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। आवेणिकबुद्धधर्म्माऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। आवेणिकबुद्धधर्म्मशून्यतया मध्यतो बोधिसत्त्वो नोपैति। आवेणिकबुद्धधर्म्मविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। आवेणिकबुद्धधर्म्माऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र आवेणिकबुद्धधर्म्माऽसत्तायामावेणिकबुद्धधर्म्मशून्यतायामावेणिकबुद्धधर्म्मविविक्ततायामावेणिकबुद्धधर्म्माऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या आवेणिकबुद्धधर्म्माऽसत्ताऽन्या आवेणिकबुद्धधर्म्मशून्यताऽन्या आवेणिकबुद्धधर्म्मविविक्तताऽन्या आवेणिकबुद्धधर्म्माऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च आवेणिकबुद्धधर्म्माऽसत्ता या च आवेणिकबुद्धधर्म्मशून्यता या च आवेणिकबुद्धधर्म्मविविक्तता या च आवेणिकबुद्धधर्म्माऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्॥

पुनरपरमायुष्मञ्छारद्वतीपुत्र धर्म्मधात्वसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धर्म्मधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धर्म्मधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। धर्म्मधात्वस्वभावतया पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति। धर्म्मधात्वसत्तयापरान्ततो बोधिसत्त्वो नोपैति। धर्म्मधातुशून्यतयाऽपरान्ततो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्त्वो नोपैति। धर्म्मधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। धर्म्मधात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। धर्म्मधात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति। धर्म्मधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति। धर्म्मधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। धर्म्मधात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र धर्म्मधात्वसत्तायां धर्म्मधातुशून्यतायां धर्म्मधातुविविक्ततायां धर्म्मधात्वस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या धर्म्मधात्वसत्ताऽन्या धर्म्मधातुशून्यताऽन्या धर्म्मधातुविविक्तताऽन्या धर्म्मधात्वस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च धर्म्मधात्वसत्ता या च धर्म्मधातुशून्यता या च धर्म्मधातुविविक्तता या च धर्म्मधात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

पुनरपरमायुष्मञ्छारद्वतीपुत्र तथताऽसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तथता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तथता विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तथताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तथताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। तथता शून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तथता विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। तथताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। तथताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। तथता शून्यतया मध्यतो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। तथता विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। तथताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र तथता सत्तायां तथता शून्यतायां तथता विविक्ततायां तथताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या तथताऽसत्ताऽन्या तथता शून्यताऽन्या तथता विविक्तताऽन्या तथताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च तथताऽसत्ता या च तथता शून्यता या च तथता विविक्तता या च तथताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

पुनरपरमायुष्मञ्छारद्वतीपुत्र भूतकोट्यसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। भूतकोटिशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। भूतकोटिविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। भूतकोट्यस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। भूतकोट्यसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। भूतकोटिशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। भूतकोटिविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। भूतकोट्यस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। भूतकोट्यसत्तया मध्यतो बोधिसत्त्वो नोपैति। भूतकोटिशून्यतया मध्यतो बोधिसत्त्वो नोपैति। भूतकोटिविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। भूतकोट्यस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र भूतकोट्यसत्तायां भूतकोटिशून्यतायां भूतकोटिविविक्ततायां भूतकोट्यस्वभावतायां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्याभूतकोय्यसत्ता न्याभूतकोटिशून्यताऽन्या भूतकोटिविविक्तताऽन्या भूतकोय्यस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च भूतकोय्यसत्ता या च भूतकोटिशून्यता या च भूतकोटिविविक्तता या च भूतकोय्यस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

पुनरपरमायुष्मञ्छारद्वतीपुत्राऽचिन्त्यधात्वसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधात्वऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अचिन्त्यधात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति । अचिन्त्यधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अचिन्त्यधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अचिन्त्यधात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राचिन्त्यधात्वसत्तायामचिन्त्यधातुशून्यतायामचिन्त्यधातुविविक्ततायामचिन्त्यधात्वस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्याऽचिन्त्यधात्वसत्ता ऽन्याऽचिन्त्यधातुशून्यता ऽन्याऽचिन्त्यधातुविविक्तता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽन्याऽचिन्त्यधातुस्वभावताऽन्यो बोधिसत्त्वो ऽन्यः पूर्व्वान्तोऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽचिन्त्यधातुसत्ता या चाऽचिन्त्यधातुशून्यता या चाऽचिन्त्यधातुविविक्तता या चाऽचिन्त्यधातुस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

पुनरपरमायुष्मञ्छारद्वतीपुत्र श्रावकाऽसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रावकशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रावकविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रावकाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। श्रावकाऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति। श्रावकशून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति। श्रावकविविक्ततया ऽपरान्ततो बोधिसत्त्वो नोपैति। श्रावकाऽस्वभावतया ऽपरान्ततो बोधिसत्त्वो नोपैति। श्रावका ऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। श्रावकशून्यतया मध्यतो बोधिसत्त्वो नोपैति। श्रावकविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। श्रावकाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र श्रावकाऽसत्तायां श्रावकशून्यतायां श्रावकविविक्ततायां श्रावकाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या श्रावकाऽसत्ता ऽन्या श्रावकशून्यता ऽन्या श्रावकविविक्तता ऽन्या श्रावकाऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्व्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च श्रावकासत्ता या च श्रावकशून्यता या च श्रावकविविक्तता या च श्रावकाऽस्वभावता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चा ऽपरान्तो यच्च मध्यं सर्व्वमे-तदद्वयमद्वैधीकारम् ।

पुनरपरमायुष्मञ्छारद्वतीपुत्र प्रत्येकबुद्धाऽसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धाऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धाऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धशून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धविविक्ततया ऽपरान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धाऽस्वभावतया ऽपरान्ततो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । प्रत्येक-बुद्धशून्यतया मध्यतो बोधिसत्त्वो नोपैति ; प्रत्येकबुद्धविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । प्रत्येकबुद्धाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र प्रत्येक-बुद्धाऽसत्तायां प्रत्येकबुद्धशून्यतायां प्रत्येकबुद्धविविक्ततायां प्रत्येक-बुद्धाऽस्वभावतायां पूर्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या प्रत्येकबुद्धाऽसत्ता ऽन्या प्रत्येकबुद्ध-शून्यता ऽन्या प्रत्येकबुद्धविविक्तता ऽन्या प्रत्येकबुद्धाऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च प्रत्येकबुद्धाऽसत्ता या च प्रत्येकबुद्ध-शून्यता या च प्रत्येकबुद्धविविक्तता या च प्रत्येकबुद्धाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं । सर्वमेतदद्वयमद्वैधीकारम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरपरमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वाऽसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। बोधिसत्त्वाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। बोधिसत्वशून्यतया मध्यतो बोधिसत्त्वो नोपैति। बोधिसत्त्वविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। बोधिसत्त्वाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वाऽसत्तायां बोधिसत्त्वशून्यतायां बोधिसत्त्वविविक्ततायां बोधिसत्त्वाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या बोधिसत्त्वाऽसत्ता ऽन्या बोधिसत्त्वशून्यता ऽन्या बोधिसत्त्वविविक्तता ऽन्या बोधिसत्त्वाऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्व्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च बोधिसत्त्वाऽसत्ता या च बोधिसत्त्वशून्यता या च बोधिसत्त्वविविक्तता या च बोधिसत्त्वाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

पुनरपरमायुष्मञ्छारद्वतीपुत्र सर्व्वज्ञाऽसत्तया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञशून्यतया पूर्व्वान्ततो बोधिसत्त्वो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नोपैति। सर्व्वज्ञविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। सर्व्वज्ञाऽसत्तयामध्यतो बोधिसत्त्वो नोपैति। सर्व्वज्ञशून्यतयामध्यतो बोधिसत्त्वो नोपैति। सर्वज्ञविविक्ततयामध्यतो बोधिसत्त्वो नोपैति। सर्व्वज्ञाऽस्वभावतयामध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र सर्वज्ञाऽसत्तायां सर्वज्ञशून्यतायां सर्वज्ञविविक्ततायां सर्वज्ञाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चान्यासर्वज्ञाऽसत्ता ऽन्या सर्वज्ञशून्यता ऽन्या सर्वज्ञविविक्तता ऽन्या सर्वज्ञाऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्व्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च सर्वज्ञाऽसत्ता या च सर्वज्ञशून्यता या च सर्वज्ञविविक्तता या च सर्वज्ञाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्वमेतदद्वयमद्वैधीकारम्।

अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अपरान्ततो बोधिसत्त्वो नोपैति। मध्यतो बोधिसत्त्वो नोपैति। यत्पुनरायुष्मञ्छारद्वतीपुत्र एवं वदसि केन कारणेन रूपापर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्ततावेदितव्येति। रूपमायुष्मञ्छारद्वतीपुत्राकाशसमं। तत्कस्य हेतोः। तद्यथापि नामायुष्मञ्छारद्वतीपुत्र आकाशस्य न पूर्व्वान्त उपलभ्यते। नाऽपरान्त

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपलभ्यते। न मध्यमुपलभ्यते। अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते। एवमेवायुष्मञ्छारद्वतीपुत्र न रूपस्य पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। रूपशून्यता-मुपादाय। न च शून्यताया अन्तो वा मध्यं वोपलभ्यते। अनेना-युष्मञ्छारद्वतीपुत्र पर्य्यायेण रूपाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या। यत् पुनरपरं वदसि केन कारणेन वेदनाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति। वेदनायुष्मञ्छारद्वतीपुत्राकाश-समं। तत्कस्य हेतोः। तद्यथापि नामाकाशस्य न पूर्व्वान्त उप-लभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। अनन्ताऽपर्य्यन्त-तया या आकाशमिति नाम व्यवह्रियते। एवमायुष्मञ्छारद्वतीपुत्र वेदनाया न पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। वेदनाशून्यतामुपलभ्यते। न च शून्यताया अन्तो वा मध्यं वोपलभ्यते। अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण वेदना-ऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या। यत् पुनरेवं वदसि केन कारणेन संज्ञाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति। संज्ञा आयुष्मञ्छारद्वतीपुत्राकाशसमा। तत्कस्य हेतोः। तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुलभ्यते। अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते। एवमेवायुष्मञ्छारद्वतीपुत्र संज्ञाया न पूर्व्वान्त उपलभ्यते। नाऽप-रान्त उपलभ्यते। न मध्यमुपलभ्यते। संज्ञाशून्यतामुपादाय। न च शून्यताया अन्तो वा मध्यं वोपलभ्यते। अनेनायुष्मञ्छारद्वती-पुत्र पर्य्यायेण संज्ञाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत् पुनरेवं वदसि केन कारणेन संस्काराऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति । संस्कारा आयुष्मञ्छारद्वतीपुत्राकाशसमाः । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते । एवमेवायुष्मञ्छारद्वतीपुत्र संस्काराणां न पुर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । संस्कार शून्यतामुपादाय । न च शून्यताया अन्तो वा मध्यं वोपलभ्यते । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण संस्काराऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या ॥

यत् पुनरेवं वदसि केन कारणेन विज्ञानाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति । विज्ञानमायुष्मञ्छारद्वतीपुत्राकाशसमं । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते । एवमेवायुष्मञ्छारद्वतीपुत्र विज्ञानस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । विज्ञानशून्यतामुपादाय । न च शून्यताया अन्तो वा मध्यं वोपलभ्यते । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण विज्ञानाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या ॥

यत् पुनरेवं वदसि केन कारणेन चक्षुषोऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति । चक्षुरायुष्मञ्छारद्वतीपुत्राकाशसमं । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्ताऽपर्य्यन्ततया आकाशमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाम व्यवह्रियते। एवमेवायुष्मञ्छारद्वतीपुत्र चक्षुषो न पूर्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते चक्षु-शून्यतामुपादाय। न च शून्यताया अन्तो वा मध्यं वोपलभ्यते। अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण चक्षुषोऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या॥

यत् पुनरेवं वदसि केन कारणेन श्रोत्राऽपर्य्यन्ततया बोधि-सत्त्वापर्य्यन्तता वेदितव्येति। श्रोत्रमायुष्मञ्छारद्वतीपुत्राकाशसमं। तत्कस्य हेतोः। तद्यथापि नामाकाशस्य न पूर्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते। एवमेवायुष्मञ्छारद्वतीपुत्र श्रोत्रस्य न पूर्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। श्रोत्र शून्यतामुपादाय। न च शून्यताया अन्तो वा मध्यं वोप-लभ्यते। अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण श्रोत्राऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या॥

यत् पुनरेवं वदसि केन कारणेन घ्राणाऽपर्य्यन्ततया बोधिस-त्त्वाऽपर्य्यन्तता वेदितव्येति। घ्राणमायुष्मञ्छारद्वतीपुत्राकाशसमं। तत्कस्य हेतोः। तद्यथापि नामाकाशस्य न पूर्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। अनन्[illegible]

आकाशमिति नाम व्यवह्रियते। [illegible]न्त उपलभ्यते। न मध्यमुपलभ्यते।

न पूर्वान्त [illegible] न च शून्यताया अन्तो वा मध्यं वोपलभ्यते।

घ्राणशून्यतामुपादाय

अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण घ्राणाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत् पुनरेवं वदसि केन कारणेन जिह्वाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति । जिह्वा आयुष्मञ्छारद्वतीपुत्राकाशसमा । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते । एवमेवायुष्मञ्छारद्वतीपुत्र जिह्वाया न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । जिह्वाशून्यतामुपादाय । न च शून्यताया अन्तो वा मध्यं वोपलभ्यते । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण जिह्वाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या ॥

यत् पुनरेवं वदसि केन कारणेन कायाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति । काय आयुष्मञ्छारद्वतीपुत्राकाशसमः । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते । एवमेवायुष्मञ्छारद्वतीपुत्र कायस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । कायशून्यतामुपादाय । न च शून्यताया अन्तो वा मध्यं वोपलभ्यते । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण कायाऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या ॥

यत् पुनरेवं वदसि केन कारणेन मनोऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्येति । मन आयुष्मञ्छारद्वतीपुत्राकाशसमं । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्तापर्य्यन्ततया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आकाशमिति नाम व्यवह्रियते । एवमेवायुष्मञ्छारद्वतीपुत्र मनसो न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । मनः शून्यतामुपादाय । न च शून्यताया अन्तो वा मध्यं वोपलभ्यते । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण मनोऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या ॥

यत् पुनरेवं वदसि केन कारणेन रूपाऽय्यन्ततया बोधिसत्त्वापर्य्यन्तता वेदितव्येति । रूपमायुष्मञ्छारद्वतीपुत्राकाशसमं । तत्कस्य हेतोः । तद्यथापि नामाकाशस्य न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । अनन्ताऽपर्य्यन्ततया आकाशमिति नाम व्यवह्रियते । एवमेवायुष्मञ्छारद्वतीपुत्र रूप न पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । रूपशून्यतामुपादाय । न च शून्यताया अन्तो वा मध्यं वोपलभ्यते । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण रूपोऽपर्य्यन्ततया बोधिसत्त्वाऽपर्य्यन्तता वेदितव्या ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh